जाठरामयरुजाञ्च ताड़कां दुःसहं ह्यरुचिकं कबन्धकम् ।
संग्रहग्रहणिकुम्भकर्णकं सामवातखरदूषणं जयेत् ॥ ३१ ॥

अजीर्णकण्टको रसः ।—

शुद्धसूतं विषं गन्धं समं सर्वं विचूर्णयेत् ।
मरिचं सर्वतुल्यञ्च कण्टकार्य्याः फलद्रवैः ॥ ३२ ॥
मर्दयेद्‌ भावयेत् सर्वमेकविंशतिवारकम् ।
त्रिगुञ्जां वटिकां खादेत् सर्वाजीर्णप्रशान्तये ।
अजीर्णकण्टकः सोऽयं रसो हन्ति विसूचिकाम् ॥ ३३ ॥

पाशुपतो रसः ।—

शुद्धसूतं द्विधा गन्धं त्रिभागं तीक्ष्णभस्मकम् ।
त्रिभिः समं विषं देयं चित्रकक्काथभावितम् ॥ ३४ ॥
धूर्त्तवीजस्य भस्मापि द्वात्रिंशद्भागसंयुतम् ।
कटुत्रयं त्रिभागं स्यात् लवङ्गैले च तत्समे ॥ ३५ ॥
जातीफलं तथा कोषमर्द्धभागं नियोजयेत् ।
तथार्द्धं लवणं पञ्च स्नुह्यर्कौरण्डतिन्तिड़ी- ॥ ३६ ॥
अपामार्गाश्वत्थजञ्च क्षारं दद्यात् विचक्षणः ।
हरीतकी यवक्षारं स्वर्जिका हिङ्गु जीरकम् ॥ ३७ ॥
टङ्कणं सूततुल्यञ्च अम्लयोगेन मर्दयेत् ।
भोजनान्ते प्रयोक्तव्यो गुञ्जाफलप्रमाणतः ॥ ३८ ॥

एकभागापेक्षया द्विगुणं, मिलितापेक्षयेति केचित् । "जातिकाफलमथार्द्धभागिकम्" इति एकभागापेक्षया । तिन्तिड़ीफलम्—अपक्वतिन्तिड़ीफलम् । रामबाणस्य मुद्गप्रमाणां वटीं व्यवहरन्ति वृद्धाः ॥ २६—३३ ॥

रसः पाशुपतो नाम सद्यः प्रत्ययकारकः।
दीपनः पाचनो हृद्यः सद्यो हन्ति विसूचिकाम् ॥ ३९ ॥
तालमूलीरसेनैव उदरामयनाशनः।
अतीसारं मोचरसैः ग्रहणीं तक्रसैन्धवैः ॥ ४० ॥
सौवर्चलकणाशुण्ठी-युतः शूलं विनाशयेत्।
अर्शो हन्ति च तक्रेण पिप्पल्या राजयक्ष्मकम् ॥ ४१ ॥
वातरोगं निहन्त्याशु शुण्ठीसौवर्चलान्वितः।
शर्कराधान्ययोगेन पित्तरोगं निहन्त्ययम् ॥ ४२ ॥
पिप्पलीक्षौद्रयोगेन श्लेष्मरोगञ्च तत्क्षणात्।
अस्मात् परतरो नास्ति धन्वन्तरिमतो रसः ॥ ४३ ॥

वृहच्छङ्खवटी।—

दग्धशङ्खस्य चूर्णं स्यात् तथा लवणपञ्चकम्।
तिन्तिड़ीक्षारकञ्चैव कटुकत्रयमेव च ॥ ४४ ॥
तथैव हिङ्गुकं ग्राह्यं विषं पारदगन्धकम्।
अपामार्गस्य वह्नेश्च क्षारैर्लिम्पाकजैर्द्रवैः ॥ ४५ ॥
भावयेत् सर्वचूर्णं तदम्लवर्गैर्विशेषतः।
यावत् तदम्लतां याति गुड़िकाऽमृतरूपिणी ॥ ४६ ॥
सद्यो वह्निकरी चैव भस्मकञ्च नियच्छति।
भुक्त्वाऽऽकण्ठन्तु तस्यान्ते खादेच्च गुड़िकामिमाम् ॥ ४७ ॥

पाशुपतरसे।—तीक्ष्णभस्मकमिति मृतलौहम्। सूतादिविषपर्य्यन्तं द्रव्यं चित्रकक्वाथेन भावयेत्। सुह्याद्यश्वत्थान्तानां क्षारं पुनः पञ्चलवणञ्च टङ्कणान्तञ्च प्रत्येकं रससममित्यर्थः ॥ ३४—४३ ॥

वृहच्छङ्खवटिकायाम्। तिन्तिड़ीक्षारः,—तिन्तिड़ीफलत्वग्भस्म।

तत्क्षणाज्जारयत्याशु पुनर्भोजनमिच्छति ।
हन्ति वातं तथा पित्तं कुष्ठानि विषमज्वरम् ॥ ४८ ।
गुल्माख्यं पाण्डुरोगञ्च निद्राऽऽलस्यमरोचकम् ।
शूलञ्च परिणामोत्थं प्रमेहञ्च प्रवाहिकाम् ।
रक्तस्रावञ्च शोथञ्च दुर्नामानि विशेषतः ॥ ४९ ॥

भक्तविपाकवटी । —

माक्षिकं रसगन्धौ च हरितालं मनःशिला ।
त्रिवृद्दन्ती वारिवाहः चित्रकञ्च महौषधम् ॥ ५० ॥
पिप्पली मरिचं पथ्या यमानी कृष्णजीरकम् ।
रामठं कटुका पाठा सैन्धवं साजमोदकम् ॥ ५१ ॥
जातीफलं यवक्षारं समभागं विचूर्णयेत् ।
आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च ॥ ५२ ॥
सूर्य्यावर्त्तरसेनैव तुलस्याः स्वरसेन च ।
आतपे भावयेद्वैद्यः खल्लपात्रे च निर्मले ।
पेषयित्वा वटीं खादेत् गुञ्जाफलसमप्रमाम् ॥ ५३ ॥
भुक्तोत्तरीये बहुभोजनान्ते मुहुर्मुहुर्वाञ्छति भोजनानि ।
आमानुबन्धे च चिराग्निमान्द्ये विड्विग्रहे पित्तकफानुबन्धे ॥५४॥

अत्र अम्लवर्गैर्भावयेत् इत्युक्तं, तमम्लवर्गमाह,—“अम्लवेतसजम्बीर-लुङ्गाम्ल-चणकाम्लकाः । नागरङ्गं तिन्तिड़ीकं चिञ्चाफलञ्च निम्बुकम् ॥ चाङ्गेरी दाड़िमं कोलं करमर्दस्तथैव च । व्यक्ताम्लोऽयं गणः प्रोक्तो वेतसाम्ल-षडुत्तमः । जम्बीरचणकाम्लञ्च सर्वत्रैव प्रशस्यते ॥” इति ॥ ४४—४९ ॥

भक्तविपाकवटिकायाम् ।—माक्षिकं—स्वर्णमाक्षिकभस्म, रसगन्धयोः

अर्शःसु शोथोदरकेऽप्यजीर्णे शूलप्रदोषप्रभवे ज्वरे च।
शस्ता वटी भक्तविपाककर्त्री सुखं विपाच्याशु निरस्य कोष्ठम् ॥५५॥

पञ्चामृतवटी।—

अभ्रकं पारदं ताम्रं गन्धकं मरिचानि च।
समभागमिदं चूर्णं चाङ्गेरीरसमर्दितम् ॥ ५६ ॥
मर्दिते हि रसे भूयो जयन्तीसिन्धुवारयोः।
भावनाऽपि च कर्त्तव्या गुञ्जापरिमिता वटी ॥ ५७ ॥
तप्तोदकानुपानेन चतस्रस्तिस्र एव वा।
वह्निमान्द्ये प्रदातव्या वट्यः पञ्चामृताः शुभाः ॥ ५८ ॥

क्रव्यादो रसः।—

पलं रसस्य द्विपलं बलेः स्याच्छुल्वायसी चार्द्धपलप्रमाणे।
सञ्चूर्ण्य सर्वं द्रुतमग्नियोगादेरण्डपत्रेऽथ निवेशनीयम् ॥ ५९ ॥
कृत्वाऽथ तां पर्पटिकां विदध्याल्लौहस्य पात्रे त्ववपूतमस्मिन्।
जम्बीरजं पक्वरसं पलानां शतं नियोज्याग्निमथाल्पमल्पम् ॥६०॥
जीर्णे रसे भावितमेतदेतैः सुपञ्चकोलोद्भववारिपूरैः।
सवेतसाम्लैः शतमत्र योज्यं समं रजष्टङ्कणजं सुभृष्टम् ॥ ६१ ॥

कज्जलीं हरितालं मनःशिलाञ्च शोधयित्वा गृह्णीयात्। वारिवाहः,—मुस्तकः, रामठं—हिङ्गु। "तुलस्याः स्वरसेन च" इत्यत्र "ज्योतिष्मत्या रसेन च" इति पाठान्तरं, तथा 'गुञ्जाफलसमप्रमाम्" इत्यतः परं क्वचित् "भक्षयेत्क्षाणमात्रेण लवङ्गेन नियोजिताम्" इति पठ्यते, तन्न, भक्षणस्य द्विरुक्तत्वात् ॥ ५०—५८ ॥

क्रव्यादरसे।—बलिः,—गन्धकस्य। "शुल्वायसी चार्द्धपलप्रमाणे"

विड़ं तदर्द्धं मरिचं समञ्च तत् सप्तवारं चणकाम्लकेन ।
क्रव्यादनामा भवति प्रसिद्धो रसस्तु मन्थानकभैरवोक्तः ॥ ६२ ॥
माषद्वयं सैन्धवतक्रपीतो ह्यसौ सुधन्यः खलु भोजनान्ते ।
गुरूणि मांसानि पयांसि पिष्ट-घृतानि सेव्यानि फलानि चापि ॥ ६३ ॥
मात्रातिरिक्तान्यपि सेवितानि यामद्वयाज्जारयति प्रसिद्धः ।
निहन्त्यजीर्णान्यपि षट् प्रवृद्धमग्निं करोति क्रमसेवनेन ॥ ६४ ॥

कार्श्यस्थौल्यनिवर्हणो गरहरः सामार्त्तिनिर्णाशनः
गुल्मप्लीहनिसूदनो ग्रहणिकाविध्वंसनः स्रंसनः ।
वातश्लेष्मनिवर्हणः श्रमहरः शूलार्त्तिशूलापहः
वातग्रन्थिमहोदरापहरणः क्रव्यादनामा रसः ॥ ६५ ॥

ज्वालानलो रसः ।—

क्षारद्वयं सूतगन्धौ पञ्चकोलमिदं समम् ।
सर्वतुल्या जया देया तदर्द्धं शिग्रुवल्कलम् ॥ ६६ ॥
एतत् सर्वं जयाशिग्रु-वह्निमार्कवजै रसैः ।
भावयेत् त्रिदिनं घर्मे ततो लघुपुटे पचेत् ॥ ६७ ॥

इति ।—ताम्रलौहयोः प्रत्येकमर्द्धपलत्वम् । रसादिलौहान्तानां चतुर्द्रव्याणां यथोक्तभागान् गृहीत्वा लौहपात्रे जम्बीररसं लिम्पाकरसं वा शतपलं दत्त्वा तल्लौहपात्रतले अल्पमात्रमग्निं प्रज्वाल्य शनैः शनैः पचेत् । जीर्णे जम्बीररसे सति भावयेत् पञ्चकोलक्वाथैः अम्लवेतसक्वाथैश्च । ततः रसादीनां चतुर्णां समभागं टङ्कणं, विड़ं—विड्लवणं, तच्च टङ्कणार्द्धभागम् । "मरिचं समञ्च तत्" इति । - मरिचचूर्णं टङ्कणतुल्यमित्येके, अन्ये तु सर्वचूर्णसममिति । एतत् सर्वमेकीकृत्य चणकाम्लैर्भावयेत्

॥ ५९—६५ ॥

भावयेत् सप्तधा चार्द्र-द्रवैर्ज्वालानलो भवेत्।
पाचनो दीपनो ह्यद्यश्चोदरामयनाशनः॥ ६८॥
निष्कोऽस्य मधुना लीढ़ोऽनुपानं गुड़नागरैः।
ज्वराजीर्णमतीसारं ग्रहणीं वह्निमार्दवम्।
श्लेष्महृल्लासवमनमालस्यमरुचिं जयेत्॥ ६९॥

अमृतावटी।—

अमृतवराटकमरिचैर्द्विपञ्चनवभागयोजितैः क्रमशः।
वटिका मुद्गसमाना कफत्रिदोषानलमान्द्यहारिणी॥ ७०॥

भक्तपाकवटी।—

अभ्रं पारदगन्धकौ सदरदौ ताम्रञ्च तालं शिला
वङ्गञ्च त्रिफला विषञ्च कुनटी भागास्त्रयो दन्तिनः।
शृङ्गीव्योषयमानिचित्रजलदं द्वे जीरके टङ्गणम्
एलापत्रलवङ्गहिङ्गुकटुकीजातीफलं सैन्धवम्॥ ७१॥
एतान्यार्द्रक-चित्रदन्ति-सुरसा-वासारसैर्विल्वजैः
पत्रोत्थैरपि सप्तधा सुविमले खल्ले विभाव्यान्यतः।

ज्वालानलरसे।—पञ्चकोलं—पिप्पली-पिप्पलीमूल-चव्यचित्रकनागरम्। जया—विजया, मार्कवः,—भृङ्गराजः। "भावयेत् त्रिदिनम्" इति।—प्रत्येकैस्त्रिदिनं भावयेत्॥ ६६—६९॥

अमृतावट्याम्।—शोधितामृतस्य भागद्वयं, भस्मवराटकस्य भागपञ्चकं, तथा मरिचचूर्णस्य भागनवकं जलेन सम्यक् मर्दयित्वा मुद्गप्रमाणा वटी कार्य्या॥ ७०॥

भक्तपाकवटिकायाम्।— दरदः,—हिङ्गुलं, तालं—हरितालं, शिला—मनःशिला, कुनटी—नेपाली मनःशिला। अभ्रादि-कुनट्य-

खादेद्वल्लमितं तथा च सकलव्याधौ प्रयोज्या बुधैः
विड्बन्धे कफजे त्रिदोषजनिते ह्यामानुबन्धेऽपि च ॥ ७२ ॥
मन्देऽग्नौ विषमज्वरे च सकले शूले त्रिदोषोद्भवे
हन्यात् तानपि भक्तपाकवटिका भूयश्च सामं जयेत् ॥ ७३ ॥

लवङ्गादिवटी ।—

लवङ्गशुण्ठीमरिचानि भृष्ट-सौभाग्यचूर्णानि समानि कृत्वा ।
भाव्यान्यपामार्गहुताशवारा प्रभूतमांसादिकजारणाय ॥ ७४ ॥

बृहल्लवङ्गादिवटी ।—

लवङ्गजातीफलधान्यकुष्ठं जीरद्वयं त्र्यूषणत्रैफलञ्च ।
एलात्वचं टङ्कवराटमुस्तं वचाऽजमोदाविड़सैन्धवञ्च ॥ ७५ ॥
तदर्द्धकं पारदगन्धमभ्रं लौहञ्च तुल्यं सुविचूर्ण्य सर्वम् ।
तन्नागवल्लीदलतोयपिष्टं वल्लप्रमाणां वटिकाञ्च कृत्वा ॥ ७६ ॥
प्रातर्विदध्यादपि चोष्णतोयैरियं निहन्याद् ग्रहणीविकारम् ।
आमानुबन्धं सरुजं प्रवाहं ज्वरं तथा श्लेष्मभवं सशूलम् ॥ ७७ ॥
कुष्ठाम्लपित्तं प्रबलं समीरं मन्दानलं कोष्ठगतञ्च वातम् ।
बटी लवङ्गादि वसुप्रणीता तथाऽऽमवातं विनिहन्ति शीघ्रम् ॥७८॥

न्तानां प्रत्येकं भागैकं, दन्तिनस्त्रयो भागाः, तथा शृङ्गादि-सैन्धवान्तानां प्रत्येकं भागैकम् । एतत् सर्वमेकीकृत्य आर्द्रकादिस्वरसैः सप्तवारं भावयेत् ॥ ७१—७३ ॥

लवङ्गादिवटिकायाम् ।—भृष्टसौभाग्यचूर्णानि—भृष्टटङ्कणचूर्णानि । हुताशः,—चित्रकः ॥ ७४ ॥

बृहल्लवङ्गादिवटिकायाम् ।—तदर्द्धमिति एकभागापेक्षया अर्द्धभागत्वम् ॥ ७५—७८ ॥

जातीफलादिवटी।—

जातीफलं लवङ्गञ्च पिप्पली सिन्धुकामृतम्।
शुण्ठी धुस्तूरवीजञ्च दरदं टङ्गणं तथा॥ ७९॥
समं सर्वं समाहृत्य जम्भनीरेण मर्दयेत्।
वल्लमाना वटी कार्य्या चाग्निमान्द्यप्रशान्तये॥ ८०॥

शङ्खवटी।—

सार्द्धकर्षं रसेन्द्रस्य गन्धकस्य तथैव च।
विषं कर्षत्रयं दद्यात् सर्वतुल्यं मरीचकम्॥ ८१॥
दग्धशङ्खञ्च तत्तुल्यं पञ्च कर्षाणि नागरात्।
स्वर्जिकारामठकणा-सिन्धुसौवर्चलं विड़म्॥ ८२॥
सामुद्रमौद्भिदञ्चैव भावयेत् निम्बुकद्रवैः।
वटी ग्रहण्यम्लपित्त-शूलघ्नी वह्निदीपनी।
वह्निमान्द्यकृतात् रोगान् सामदोषं विनाशयेत्॥८३॥

चिन्तामणिरसः।—

रसं गन्धं मृतं ताम्रं मृतमभ्रं फलत्रयम्।
त्र्यूषणं दन्तिवीजञ्च सर्वं खल्ले विमर्दयेत्॥ ८४॥
द्रोणपुष्पीरसैश्चापि भावयेच्च पुनः पुनः।
अस्य मात्रा प्रदातव्या गुञ्जैका वा द्विगुञ्जिका॥ ८५॥
चिन्तामणिरसो ह्येष चाजीर्णे शस्यते सदा।
आमवातं ज्वरं हन्ति सर्वशूलनिसूदनः॥ ८६॥

जातीफलादिवटिकायाम्।—सिन्धुकः,—सिन्धुवारः, भट्टस्तु सैन्धव-मित्याह॥ ५९।८०॥

शङ्खवटिकायाम्।—तत्तुल्यमिति मरिचतुल्यं, सिन्धु-सैन्धवम्,

प्रदीपनो रसः ।—

रसनिष्कं गन्धनिष्कं निष्कमात्रं प्रदीपनम् ।
मानमर्द्धं प्रदातव्यं चुल्लिकालवणं भिषक् ॥ ८७ ॥
मर्दयित्वा प्रदातव्यमथास्य माषमात्रकम् ।
अजीर्णे चाग्निमान्द्ये च दातव्यो रसवल्लभः ॥ ८८ ॥

विजयरसः ।—

रसस्यैकं पलं दत्त्वा नागञ्च गन्धकं पलम् ।
क्षारत्रयं पलं देयं लवङ्गं पलपञ्चकम् ॥ ८९ ॥
दशमूलीजयाचूर्णं तद्द्रवेण तु भावयेत् ।
चित्रकस्य रसेनाथ भृङ्गराजरसेन तु ॥ ९० ॥
शिग्रुमूलद्रवैश्चापि ततो भाण्डे निरुध्य च ।
याममात्रं पचेदग्नौ मर्दयेदार्द्रकद्रवैः ।
ताम्बूलीपत्रसंयुक्तं खादेत् निष्कमितं सदा ॥ ९१ ॥

भक्तविपाकवटी ।—

माक्षिकं रसगन्धौ च हरितालं मनःशिलाम् ।
गगनं कान्तलौहञ्च सर्वमेतच्च कार्षिकम् ॥ ९२ ॥

औद्भिदं—"करकच्" इति प्रसिद्धं लवणम् ; प्रत्येकं पञ्च कर्षाणीत्यर्थः ॥ ८१—८६ ॥

प्रदीपनरसे ।—प्रदीपनं—विषम् ; मानमर्द्धमित्यत्र पलमर्द्धमिति केचित् पठन्ति ॥ ८७।८८ ॥

विजयरसे ।—नागं—विषम् । रसादि-विजयाचूर्णान्तं सर्वमेकीकृत्य यथोक्तरसैः सप्तसप्तवारं विभावयेत् ; ततः पुटपाकविधिना यामैकं पचेत् ॥ ८९—९१ ॥

त्रिवृद्दन्तीवारिवाहं चित्रकञ्च महौषधम्।
पिप्पलीं मरिचं पथ्यां यमानीं कृष्णजीरकम् ॥ ८३ ॥
रामठं कटुकां पाठां सैन्धवं साजमोदकम्।
जातीफलं यवक्षारं समभागं विचूर्णयेत् ॥ ८४ ॥
आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च।
सूर्य्यावर्त्तरसेनैव ज्योतिष्मत्या रसेन च ॥ ८५ ॥
आतपे भावयेत् वैद्यः कृत्वा गुञ्जामितां वटीम्।
भक्षयेत् तां वटीं प्राज्ञो लवङ्गेन नियोजिताम् ॥ ८६ ॥
भुक्तोत्तरीये बहुभोजनान्ते आमानुबन्धे चिरवह्निमान्द्ये।
विड्विग्रहे वातकफानुबन्धे शोथोदरानाहगदेऽप्यजीर्णे ॥८७॥
शूले त्रिदोषप्रभवे ज्वरे च शस्ता वटी भक्तविपाकसंज्ञा।
सुखं विरेच्याशु नरस्य कोष्ठं मुहुर्मुहुर्वाञ्छयतीप्सितान्नम् ॥८८॥

रसराक्षसः।—

ताम्रं पारदगन्धकं त्रिकटुकं तीक्ष्णञ्च सौवर्च्चलम्
खल्ले मर्द्य दिनं निधाय सिकताकुम्भेषु यामं ततः।
खिन्नं तेष्वपि रक्तशाकिनिभवं क्षारं समं भावयेत्
एकीकृत्य च मातुलुङ्गकजलैर्नाम्ना रसो राक्षसः ॥ ८९ ॥

भक्तविपाकवटिकायाम्।—"ज्योतिष्मत्या रसेन च" इत्यत्र "तुलस्याः स्वरसेन च" इति पाठान्तरम् ॥ ८२—८८ ॥

रसराक्षसमाह, ताम्रमित्यादि।—ताम्रादि सर्वं खल्ले दिनं संमर्द्य बालुकायन्त्रे पचेत्। ततस्तुल्यं रक्तपुनर्नवाक्षारं विमिश्र्य मातुलुङ्गरसैः सप्ताहं भावयेत् ॥ ८९ ॥

त्रिफलालौहम् ।—

त्रिफलामुस्तवेल्लैश्च सितया कणया समम् ।
खरमञ्जरिवीजैश्च लौहं भस्मकनाशनम् ॥ १०० ॥

अपामार्गाद्यञ्जनम् ।—

अपामार्गस्य पत्रञ्च मरिचञ्च समं समम् ।
अम्लरोलीयुतं पिष्टमञ्जनात् सूचिकां जयेत् ॥ १०१ ॥

अग्निकुमारः ।—

टङ्गणं रसगन्धौ च समं भागत्रयं विषात् ।
कपर्दशङ्खयोस्त्र्यंशं वसुभागं मरीचकम् ॥ १०२ ॥
दिनं जम्बाम्भसा पिष्टं वल्लमात्रं प्रदापयेत् ।
विसूचीशूलविष्टम्भ-वह्निमान्द्ये ज्वरे तथा ।
अजीर्णे संग्रहण्याञ्च सिद्धश्चाग्निकुमारकः ॥ १०३ ॥

अपरा शङ्खवटी ।—

द्वौ चारौ रसगन्धकौ सलवणौ चारेण तुल्यं विषम्
चिञ्चाशङ्खचतुर्गुणं रसवरैर्लिम्पाकजातैः कृतम् ।
वारंवारमिदं सुपाकरचितं लौहं चिपेत् हिङ्गुकम्
भूयष्टङ्गसमं सुमर्दितमिदं गुञ्जाप्रमाणं भजेत् ॥ १०४ ॥

त्रिफल लौहमाह, त्रिफलेत्यादि ।—खरमञ्जरीवीजम्—अपामार्ग-वीजम् ; त्रिफलादिसर्वद्रव्यतुल्यं मृतलौहं देयम् ॥ १०० ॥

अपामार्गाद्यञ्जने ।—अपामार्गपत्रं तत्समं मरिचचूर्णं चाङ्गेरीरसेन पिष्ट्वा अञ्जनदानात् विसूचिका नश्यति ॥ १०१ ॥

अग्निकुमारे ।—समभिति प्रत्येकं भागैकम् । वसुभागमिति भागाष्टकम् ॥ १०२।१०३ ॥

ख्याता शङ्खवटी महाग्निजननी शूलान्तकृत् पाचनी
कासश्वासविनाशिनी क्षयहरी मन्दाग्निसन्दीपनी ।
वातव्याधिमहोदरादिशमनी तृष्णामयोच्छेदिनी
सर्वव्याधिनिसूदनी क्रिमिहरी दुष्टामयध्वंसिनी ॥ १०५ ॥

[इति अजीर्ण-चिकित्सा ।]

अथ क्रिमि-चिकित्सा ।—

क्रिमिकालानलो रसः ।—

विड़ङ्गं द्विपलञ्चैव विषचूर्णं तदर्द्धकम् ।
लौहचूर्णं तदर्द्धञ्च तदर्द्धं शुद्धपारदम् ॥ १ ॥
रसतुल्यं शुद्धगन्धं छागीदुग्धेन पेषयेत् ।
छायाशुष्कां वटीं कृत्वा खादेत् षोड़शरक्तिकाम् ॥ २ ॥
धान्यजीरानुपानेन क्रिमिकालानलो रसः ।
उदरस्थं क्रिमिं हन्याद् ग्रहण्यर्शःसमन्वितम् ॥ ३ ॥

शङ्खवटिकायाम् ।—"द्वौ क्षारौ" इति ।—यवक्षारः स्वर्जिकाक्षारश्च । सलवणौ—लवणसहितौ । चिञ्चा—चिञ्चाफलत्वग्भस्म । वारंवारमिति ।—निम्बुकजैः रसैः सप्तवारं भावयेदित्यर्थः ॥ १०४।१०५ ॥

इति अजीर्ण-चिकित्सा ।

अजीर्णात् क्रिमिसम्भव इति अजीर्णानन्तरं क्रिमिचिकित्सामाह ।

अग्निदः शोथशमनो गुल्मप्लीहोदरान् जयेत् ।
गहनानन्दनाथेन भाषितो विश्वसम्पदे ॥ ४ ॥

क्रिमिविनाशो रसः ।—

शुद्धसूतं समं गन्धमभ्रं लौहं मनःशिला ।
धातकी त्रिफला लोध्रः विड़ङ्गं रजनीद्वयम् ॥ ५ ॥
भावयेत् सप्तधा सर्वं शृङ्गबेरभवै रसैः ।
चणमात्रां वटीं कृत्वा त्रिफलारससंयुताम् ॥ ६ ॥
भक्षयेत् प्रातरुत्थाय क्रिमिरोगोपशान्तये ।
वातिकं पैत्तिकं हन्ति श्लैष्मिकञ्च त्रिदोषजम् ।
नाम्ना क्रिमिविनाशोऽयं क्रिमिरोगकुलान्तकः ॥ ७ ॥

क्रिमिनाशनो रसः ।—

सूतं गन्धं मृतं लौहं मरिचं विषमेव च ।
धातकी त्रिफला शुण्ठी मुस्तकं सरसाञ्जनम् ॥ ८ ॥
पाठा त्रिकटु मुस्ता च बालकं विल्वमेव च ।
भावयेत् सर्वमेकत्र स्वरसैर्भृङ्गजैस्ततः ॥ ९ ॥
वराटिकाप्रमाणेन भक्षणीयो विशेषतः ।
क्रिमिरोगविनाशाय रसोऽयं क्रिमिनाशनः ॥ १० ॥

तत्र क्रिमिकालानलरसे ।—लौहचूर्णं तदर्द्धमिति—विषार्द्धं लौहचूर्णम् । एवमन्यत्र ॥ १—४ ॥

क्रिमिविनाशरसे ।—रजनीद्वयमिति—हरिद्राद्वयं, शृङ्गबेररसैः,—आर्द्रकरसैः ॥ ५—१० ॥

कीटमर्दो रसः ।—

शुद्धसूतं शुद्धगन्धो ह्यजमोदा विड़ङ्गकम् ।
विषमुष्टिः ब्रह्मवीजं क्रमात् द्विगुणितं भवेत् ॥ ११ ॥
चूर्णयेन्मधुना मिश्रं निष्कैकं क्रिमिजिद्भवेत् ।
कीटमर्दो रसो नाम मुस्ताक्वाथं पिबेदनु ॥ १२ ॥

क्रिमिघ्नो रसः ।—

क्रिमिघ्नकिंशुकारिष्ट-वीजं सुरसभस्मकम् ।
वल्लद्वयं चाखुपर्णी-रसैः क्रिमिविनाशनम् ॥ १३ ॥

क्रिमिमुद्गरो रसः ।—

क्रमेण वृद्धं रसगन्धकाज-मोदा विड़ङ्गं विषमुष्टिका च ।
पलाशवीजञ्च विचूर्ण्यमस्य निष्कप्रमाणं मधुनाऽवलीढ़म् ॥१४॥
पिबेत् कषायं घनजं तदूर्द्ध्वं रसोऽयमुक्तः क्रिमिमुद्गराख्यः ।
क्रिमिं निहन्यात्क्रिमिजांश्च रोगान् सन्दीपयत्यग्निमयं त्रिरात्रात् १५

क्रिमिधूलिजलप्लवो रसः ।—

पारदं गन्धकं शुद्धं वङ्गं शङ्खं समं समम् ।
चतुर्णां योजयेत् तुल्यं पथ्याचूर्णं भिषग्वरः ॥ १६ ॥

कीटमर्दरसे ।—ब्रह्मवीजमिति—पलाशवीजम् । "क्रमात् द्विगुणितं भवेत्" इत्यत्र "यथाक्रमं गुणोत्तरम्" तथा "क्रमोत्तरगुणं भवेत्" इति पाठान्तरद्वयं दृश्यते ॥ ११।१२ ॥

क्रिमिघ्नरसे ।—क्रिमिघ्नं—विड़ङ्गं, किंशुकः,—पलाशः, तस्य वीजं ग्राह्यम् ; अरिष्टवीजं—निम्बवीजम् ॥ १३ – १५ ॥

दण्डयन्त्रेण निर्मथ्य पटोलस्वरसं क्षिपेत् ।
कार्पासवीजसदृशीं कुर्य्याद्वै यत्नतो वटीम् ।
त्रिवटीं भक्षयेत् प्रातः शीततोयं पिबेदनु ॥ १७ ॥
केवलं पैत्तिके योज्यः कदाचित् वातपैत्तिके ।
श्रीमद्गहननाथोक्तः क्रिमिधूलिजलप्लवः ॥ १८ ॥

क्रिमिकाष्ठानलो रसः ।—

विशुद्धं पारदं गन्धं वङ्गं तालं वराटकम् ।
मनःशिला कृष्णकाचं सोमराजी विड़ङ्गकम् ॥ १९ ॥
दन्तीवीजञ्च जैपालं शिला टङ्कणचित्रकम् ।
कर्षमात्रन्तु प्रत्येकं वज्रीक्षीरेण मर्दयेत् ॥ २० ॥
कलायसदृशीं कृत्वा वटिकां भक्षयेत् ततः ।
क्रिमिकाष्ठानलो नाम रसोऽयं परिनिर्मितः ।
श्लैष्मिके श्लेष्मपित्ते च श्लेष्मवाते च शस्यते ॥ २१ ॥

लाक्षादिवटी ।—

लाक्षाभल्लातश्रीवास-श्वेतापराजिताशिफाः ।
अर्जुनस्य फलं पुष्पं विड़ङ्गं सर्जगुग्गुलू ॥ २२ ॥
एभिः कीटाश्च शाम्यन्ते धूपितैश्च गृहे सदा ।
भुजङ्गा मूषिका दंशाः घुणा लूताश्च मत्कुणाः ।
दूरादेव पलायन्ते क्लिन्नकीटाश्च ये स्मृताः ॥ २३ ॥

क्रिमिधूलिजलप्लवरसे ।— पथ्याचूर्णं—हरीतकीचूर्णम् ॥१६—२१॥

लाक्षादिवटिकायाम् ।—श्रीवासः,—नवनीतखोटी, श्वेतापराजिता-शिफा—श्वेतापराजितामूलम् । अर्जुनस्य फलं पुष्पमिति—अर्जुनस्य फलं पुष्पञ्चेत्यर्थः ॥ २२।२३ ॥

क्रिमिहरो रसः।—

शुद्धसूतमिन्द्रयवमजमोदां मनःशिलाम्।
पलाशवीजं गन्धञ्च देवदाल्या द्रवैर्दिनम्॥ २४॥
संमर्द्य भक्षयेन्नित्यं शालपर्णीरसैः सह।
सितायुक्तं पिबेच्चानु क्रिमिपातो भवत्यलम्॥ २५॥

विड़ङ्गलौहम्।—

रसं गन्धञ्च मरिचं जातीफललवङ्गकम्।
शुण्ठी टङ्गं कणा तालं प्रत्येकं भागसम्मितम्॥ २६॥
सर्वचूर्णसमं लौहं विड़ङ्गं सर्वतुल्यकम्।
लौहं विड़ङ्गकं नाम कोष्ठस्थक्रिमिनाशनम्॥ २७॥
दुर्नाम ह्यरुचिञ्चैव मन्दाग्निञ्च विसूचिकाम्।
शोथं शूलं ज्वरं हिक्कां श्वासं कासं विनाशयेत्॥ २८॥

[इति क्रिमि-चिकित्सा]।

क्रिमिहररसे।—देवदाली—हस्तिघोषकफलम्॥ २४।२५॥

विड़ङ्गलौहे।—सर्वचूर्णसमं लौहमिति।—रसादितालकान्तानां तुल्यं लौहं, तथा मिलितसर्वचूर्णसमं विड़ङ्गचूर्णम्॥ २६—२८॥

इति क्रिमि-चिकित्सा।

अथ पाण्डु-कामला-चिकित्सा ।—

निशालौहम् ।—

लौहचूर्णं निशायुग्मं त्रिफला-रोहिणीयुतम् ।
प्रलिह्यात् मधुसर्पिर्भ्यां कामलापाण्डुशान्तये ॥ १ ॥

धात्रीलौहम् ।—

धात्रीलौहरजोव्योष-निशाक्षौद्राज्यशर्करा: ।
भक्षणाच्च विनिघ्नन्ति कामलाञ्च हलीमकम् ॥ २ ॥

पञ्चाननवटी ।—

शुद्धसूतं तथा गन्धं मृतताम्राभ्रगुग्गुलु ।
जैपालवीजं तुल्यांशं घृतेन वटकीकृतम् ॥ ३ ॥
भक्षयेद्बदरास्थ्याभं शोथपाण्डुप्रशान्तये ।
पञ्चाननवटी ख्याता पाण्डुरोगकुलान्तिका ॥ ४ ॥

पुरीषक्रिमितः पाण्डुरोगस्य प्रादुर्भावात् क्रिम्यनन्तरं पाण्डुरोग-चिकित्सामाह । तत्र निशालौहे ।—निशायुग्मं—हरिद्राद्वयम् । अत्र सर्वद्रव्यसमं लौहं प्रदेयं, लौहप्राधान्यात् पाण्डुरोगहरत्वाच्च ; लौहाभावे मण्डूरं प्रदेयमित्युपदिशन्ति वृद्धाः ॥ १।२ ॥

पञ्चाननवटिकामाह, शुद्धसूतमित्यादि ।—अत्र सर्वसमं शोधित-जैपालचूर्णम् । गुञ्जाप्रमाणा वटी प्रथमं व्यवहार्य्या । "भक्षयेद् * * * प्रशान्तये" इत्यत्र "भक्षयेत् कोलमात्रन्तु वातपाण्डुप्रशान्तये" इति पाठान्तरम् ॥ ३।४ ॥

प्राणवल्लभो रसः।—

हिङ्गुलसम्भवं सूतं गन्धकं काश्मीरोद्भवम्।
लौहं ताम्रं वराटञ्च तुत्थं हिङ्गु फलत्रिकम्॥ ५॥
स्नुहीक्षीरं यवक्षारो जैपालः दन्तिकं त्रिवृत्।
प्रत्येकं शाणभागन्तु छागीक्षीरेण पेषयेत्॥ ६॥
चतुर्गुञ्जां वटीं खादेत् वारिणा मधुना सह।
प्राणवल्लभनामायं गहनानन्दभाषितः॥ ७॥
श्लेष्मदोषं समालोक्य युक्त्या च त्रुटिवर्द्धनम्।
निहन्ति कामलां पाण्डुमानाहं श्लीपदं तथा॥ ८॥
गलगण्डं गण्डमालां व्रणानि च हलीमकम्।
शोथं शूलमुरुस्तम्भं सङ्ग्रहग्रहणीं जयेत्॥ ९॥
वान्तिं मूर्च्छां भ्रमिं दाहं कासं श्वासं गलग्रहम्।
असाध्यं सन्निपातञ्च जीर्णज्वरमरोचकम्॥ १०॥
वातरक्तं तथा शोषं कण्डूं विस्फोटकापचीम्।
नातः परतरं किञ्चित् कामलार्त्तिरुजापहम्॥ ११॥

कामेश्वरो रसः।—

पलं सूतं पलं गन्धं पथ्याचित्रकयोः पलम्।
मुस्तैलापत्रकाणाञ्च प्रति सार्द्धपलं क्षिपेत्॥ १२॥

प्राणवल्लभरसे।—काश्मीरोद्भवं—कुङ्कुमं, "ताम्रम्" इत्यत्र "टङ्कम्" इति केचित् पठन्ति। श्लेष्मदोषे विविच्य मात्रायाः ह्रासवृद्धिः करणीया॥ ५—११॥

तूषणं पिप्पलीमूलं विषञ्चापि पलं न्यसेत् ।
नागकेशरकं कर्षमेरण्डस्य पलं तथा ॥ १३ ॥
पुरातनगुड़ेनैव तुल्येनैव विमिश्रयेत् ।
मर्दयेत् कनकद्रावैर्भावयेच्च घृतान्विताम् ॥ १४ ॥
वटिकां बदरास्थ्याभां कारयेत् भक्षयेत् निशि ।
पाण्डुरोगहरः सोऽयं रसः कामेश्वरः स्वयम् ॥ १५ ॥

त्रिकत्रयाद्यलौहम् ।—

पलं लौहस्य किट्टस्य पलं गव्यस्य सर्पिषः ।
सितायाश्च पलञ्चैकं चौद्रस्यापि पलं तथा ॥ १६ ॥
तोलकं कान्तलौहस्य त्रिकत्रयसुभावितम् ।
ततः पात्रे विधातव्यं लौहे च मृन्मये तथा ॥ १७ ॥
हविषा भावितञ्चापि रौद्रे च शिशिरे तथा ।
भोजनादौ तथा मध्ये चान्ते चापि प्रदापयेत् ॥ १८ ॥
अनुपानं प्रदातव्यं बुद्ध्वा दोषबलाबलम् ।
कामलां पाण्डुरोगञ्च सुदारुणहलीमकम् ।
निहन्ति नात्र सन्देहो भास्करस्तिमिरं यथा ॥ १९ ॥

विड़ङ्गादिलौहम् ।—

विड़ङ्गमुस्तत्रिफला-देवदारुषडूषणैः ।
तुल्यमात्रमयश्चूर्णं गोमूत्रेऽष्टगुणे पचेत् ॥ २० ॥

कामेश्वररसे ।—वह्निः,—चित्रकः, पलं—तेजपत्रम् । तुल्येनेति ।—सर्वचूर्णतुल्येन, कनकद्रावैः,—धुस्तूररसैः ॥ १२—१५ ॥

त्रिकत्रयादिलौहे ।—किट्टस्य—मण्डूरस्य । अत्र सिताचौद्रे प्रक्षेपणीये । इष्टफलोऽयं योगः ॥ १६—१९ ॥

तैरक्षमात्रां गुड़िकां कृत्वा खादेत् दिने दिने।
कामलापाण्डुरोगार्त्तः सुखमाप्नोत्यचिरात् ॥ २१ ॥

अन्यविड़ङ्गादिलौहम्।—

विड़ङ्गत्रिफलाव्योषं शुद्धलौहन्तु तत्समम्।
पुरातनगुड़ेनाथ लेहयेत् दिनसप्तकम्।
श्वयथुं नाशयेत् शीघ्रं पाण्डुरोगं हलीमकम् ॥ २२ ॥

त्रैलोक्यसुन्दरी रसः।—

मानश्चैकं ततः सूतं षड़भ्रं वसुलौहकम्।
गन्धकं त्रिफलाव्योष-चूर्णं मोचरसस्य च ॥ २३ ॥
मुषली चामृतासत्त्वं प्रत्येकं पञ्चभागिकम्।
भावयेत् सर्वमेकत्र त्रिफलानां कषायके ॥ २४ ॥
भावना विंशतिर्देया दशरात्रं सुभावना।
शिग्रुचित्रकमूलाभ्यामष्टधा च पृथक् पृथक् ॥ २५ ॥
त्रैलोक्यसुन्दरो नाम रसो निष्कमितो हितः।
सितया च समं क्षौद्रैः शोथपाण्डुक्षयापहः।
ज्वरातिसारसंयुक्त-सर्वोपद्रवनाशनः ॥ २६ ॥

विड़ङ्गादिलौहे।—तुल्यमात्रमयश्चूर्णमिति—विड़ङ्गादीनां चूर्णसमं लौहचूर्णम् इत्यर्थः। अत्र लौहस्य प्राधान्यात् तदपेक्षयैव गोमूत्रस्य अष्टगुणत्वम्। पक्वा अवतारिते विड़ङ्गादिचूर्णानि प्रक्षेप्याणि; अन्ये तु विड़ङ्गादिचूर्णैः सह लौहचूर्णस्य पाकः। गोमूत्रस्य अष्टगुणत्वं सर्व-चूर्णापेक्षयैव; अत्र द्रवद्वैगुण्यं न व्यवहरन्ति वृद्धाः। पाकश्चात्र मुद्रा-पाकेण इत्याहुः। अक्षमात्रां गुड़िकां कुर्य्यात्, न तु तत्प्रमाणां खादेत्; मात्रा च देहाग्निबलापेक्षिणी; एवं सर्वत्र मण्डूरपाकादौ ॥ २०—२२ ॥

दार्व्यादिलौहम् ।—

दार्वीं सत्रिफलाव्योष-विड़ङ्गान्ययसो रजः ।
मधुसर्पिर्युतं लिह्यात् कामलापाण्डुरोगवान् ॥ २७ ॥

पथ्यानि ।—

शालिषष्टिकगोधूम-यवमुद्गादयो हिताः ।
रसाश्च जाङ्गलभवा मधुराः पाण्डुरोगिणाम् ॥ २८ ॥

चन्द्रसूर्य्यात्मको रसः ।—

सूतकं गन्धको लौहमभ्रकञ्च पलं पलम् ।
शङ्खं वराटकञ्चैव प्रत्येकार्द्धपलं हरेत् ॥ २९ ॥
गोक्षुरवीजचूर्णञ्च पलैकं तत्र दीयते ।
सर्वमेकीकृतं चूर्णं वाष्पयन्त्रे विभावयेत् ॥ ३० ॥
पटोलः पर्पटी भार्गी विदारी शतपुष्पिका ।
दन्ती वासा कुण्डली च काकमाचीन्द्रवारुणी ॥ ३१ ॥
वर्षाभूः केशराजश्च शालिञ्चो द्रोणपुष्पिका ।
प्रत्येकार्द्धपलैर्द्रावैर्भावयित्वा वटीं चरेत् ॥ ३२ ॥
चतुर्दशवटीं खादेत् छागीदुग्धानुपानतः ।
गहनानन्दनाथोक्तश्चन्द्रसूर्य्यात्मको रसः ॥ ३३ ॥
हलीमकं निहन्त्याशु पाण्डुरोगं सकामलम् ।
जीर्णज्वरं सविषममम्लपित्तमरोचकम् ॥ ३४ ॥

त्रैलोक्यसुन्दररसे ।—अमृतासत्त्वं—गुडूचीसत्त्वम् ॥ २३—२६ ॥
दार्व्यादिलौहे ।—दार्वी—दार्व्यास्त्वक् । लौहचूर्णं सर्वसमम् ॥२७।२८॥
चन्द्रसूर्य्यात्मकरसे ।—वाष्पयन्त्रं—तप्तखल्वः, कुण्डली—गुडूची,

शूलं प्लीहोदरानाहमष्ठीलागुल्मविद्रधीन्।
शोथं मन्दानलं हिक्कां कासं श्वासं वमिं भ्रमिम्॥ ३५॥
भगन्दरोपदंशौ च दद्रुकण्डूव्रणापची:।
ऊरुस्तम्भमामवातं दाहं तृष्णां कटीग्रहम्॥ ३६॥
युक्ता मण्डेन मद्येन मुद्गयूषेण वारिणा।
गुडूचीत्रिफलावासा-क्वाथनीरेण वा क्वचित्॥ ३७॥

पाण्डुसूदनरस:।—

रसं गन्धं मृतं ताम्रं जयपालञ्च गुग्गुलुम्।
समांशमाज्यसंयुक्तां गुड़िकां कारयेद्भिषक्॥ ३८॥
एकैकां भक्षयेन्नित्यं पाण्डुशोथप्रशान्तये।
शीतलञ्च जलं चाम्लं वर्जयेत् पाण्डुसूदने॥ ३९॥

मण्डूरवज्रवटक:।—

पञ्चकोलं समरिचं देवदारु फलत्रिकम्।
विड़ङ्गमुस्तयुक्ताश्च भागास्त्रिपलसम्मिता:॥ ४०॥
यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं तत:।
पक्त्वा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत्॥ ४१॥
ततोऽक्षमात्रान् वटकान पिबेत् तक्रेण तक्रभुक्।
पाण्डुरोगं जयत्याशु मन्दाग्नित्वमरोचकम्॥ ४२॥

वर्षाभू:,—पुनर्नवा। "शङ्खं वराटकञ्चैव" इत्यत्र "शङ्खटङ्कवराटञ्च" इत्यपि क्वचित् पाठ:॥ २९—३७॥

पाण्डुसूदनरसे।—रसादिगुग्गुल्वन्तं पञ्चद्रव्यं समभागं, घृतं सर्व्वसमम्; गुड़िका तु पुरुषोचिता ज्ञेया॥ ३८।३९॥

अर्शांसि ग्रहणीदोषमूरुस्तम्भमथापि वा ।
क्रिमिं प्लीहानमानाहं गलरोगञ्च नाशयेत् ।
मण्डूरवज्रनामाऽयं रोगानीकप्रणाशनः ॥ ४३ ॥

लघ्वानन्दो रसः ।—

पारदं गन्धकं लौहं विषमभ्रकमेव च ।
समांशं मरिचञ्चाष्टौ टङ्कणञ्च चतुर्गुणम् ॥ ४४ ॥
भृङ्गराजरसैश्चाम्ल-वेतसैः सप्त भावनाः ।
गुञ्जाद्वयं पर्णखण्डे खादेत् सायं निहन्ति च ॥ ४५ ॥
पाण्डुतामरुचिञ्चैव मन्दाग्निं ग्रहणीं ज्वरम् ।
वातश्लेष्मभवान् रोगान् जयेदचिरसेवनात् ॥ ४६ ॥

सम्मोहलौहः ।—

त्रिकटु त्रिफला वह्नि-विड़ङ्गे लौहमभ्रकम् ।
एतानि समभागानि घृतेन वटिकां कुरु ॥ ४७ ॥
कामलां पाण्डुरोगञ्च हृद्रोगं शोथमेव च ।
भगन्दरं कोष्ठक्रिमिं मन्दानलमरोचकम् ॥ ४८ ॥
तान् सर्वान् नाशयेदाशु बलवर्णाग्निवर्द्धनः ।
सम्मोहलौहनामाऽयं पाण्डुरोगे च पूजितः ॥ ४९ ॥

मण्डूरवज्रवटके ।— अत्र लौहकिट्टस्य प्राधान्यात् तदपेक्षयैव गोमूत्रस्य अष्टगुणत्वम् । आसन्नपाके पञ्चकोलादिचूर्णं प्रक्षेप्यम् ॥ ४०— ४३ ॥

लघ्वानन्दरसे ।—"अम्लवेतसैः" इत्यत्र "अम्लदाड़िमैः" इति पाठान्तरम् ॥ ४४—४९ ॥

त्र्यषणादिमण्डूरम् ।—

स्विन्नमष्टगुणे मूत्रे लौहकिट्टं सुशोधितम् ।
पाकान्ते त्र्यषणं वह्नि-वरादार्वीसुरद्रुमान् ॥ ५० ॥
विड़ङ्गवीजचूर्णञ्च मुस्तं किट्टसमं क्षिपेत् ।
प्रातः कर्षं भजेदस्य जीर्णे तक्रौदनं भजेत् ॥ ५१ ॥
हलीमकं पाण्डुरोगमर्शांसि श्वयथुं तथा ।
ऊरुस्तम्भं जयेदेतत् कामलां कुम्भकामलाम् ॥५२॥

कामला-चिकित्सा ।—

पाण्डुरोगोदिता योगा घ्नन्ति ते कामलामपि ॥ ५३ ॥
त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः ।
प्रातर्माक्षिकसंयुक्तः शीलितः कामलापहः ॥ ५४ ॥

[इति पाण्डु-कामला-चिकित्सा ।]

त्र्यषणादिमण्डूरे ।— त्र्यषणं—शुण्ठी पिप्पली मरिचम् ; वह्निः,—चित्रकः, वरा—त्रिफला, दार्वी—दारुहरिद्रा, सुरद्रुमः,—देवदारु । किट्टसमं—मण्डूरतुल्यम् । मात्रा च विविच्य प्रदेया ॥५०—५२ ॥

पाण्डुरोगचिकित्सां कामलायामपि अतिदिशति,—पाण्डुरोगेत्यादि ॥ ५३।५४ ॥

इति पाण्डु-कामलारोग-चिकित्सा ।

अथ रक्तपित्त-चिकित्सा ।—

—०*०—

अर्केश्वरो रसः ।—

मृतार्कं मृतवङ्गञ्च मृताभ्रञ्च समाक्षिकम् ।
अमृतास्वरसैर्भाव्यं पुटे त्रिःसप्तकं पचेत् ॥ १ ॥
वासाक्षीरविदारीभ्यां चतुर्गुञ्जाप्रमाणतः ।
भक्षणाद्विनिहन्त्याशु रक्तपित्तं सुदारुणम् ॥ २ ॥

सुधानिधिरसः ।—

सूतं गन्धं माक्षिकञ्चैव लौहं सर्वं घृष्ट्वा त्रैफलेनोदकेन ।
लौहे पात्रे गोमयैः पाचयित्वा रात्रौ दद्याद्रक्तपित्तप्रशान्त्यै ॥ ३ ॥

आमलाद्यं लौहम् ।—

आमलापिप्पलीचूर्णं तुल्यया सितया सह ।
रक्तपित्तहरं लौहं योगराजमिदं स्मृतम् ॥ ४ ॥
वृष्याग्निदीपनं बल्यमम्लपित्तविनाशनम् ।
पित्तोत्थानपि वातोत्थान् निहन्ति विविधान् गदान् ॥५॥

पाण्डुरोगवत् रक्तपित्तस्यापि पित्तरक्तकरत्वाव्यभिचारात् पाण्डु-रोगानन्तरं रक्तपित्तचिकित्सामाह । तत्र अर्केश्वररसे ।—अर्कः,—ताम्रम् । माक्षिकं—स्वर्णमाक्षिकम् । अमृता—गुडूची । एकविंशति-वारान् भावयित्वा पुटपाकः कार्य्यः ॥ १।२ ॥

सुधानिधिरसे ।—त्रैफलेनोदकेन—त्रिफलाक्वाथेन । भावना चात्र लौहपात्रे गोमयाग्निना कर्त्तव्या ॥ ३ ॥

आमलाद्यलौहे ।—लौहमिति—सर्वचूर्णसमं लौहम् ॥ ४।५ ॥

शतमूल्याद्यं लौहम्।—

शतमूलीसिताधान्य-नागकेशरचन्दनैः।
त्रिकत्रयतिलैर्युक्तं लौहं सर्वगदापहम्।
तृष्णादाहज्वरच्छर्दि-रक्तपित्तविनाशनम्॥ ६॥

अभ्रप्रयोगः।—

रक्तपित्ते पिबेत् व्योम-सहितं पर्पटीरसम्॥ ७॥

वासादिः।—

वासाद्राक्षाऽभयानाञ्च क्वाथं वा शर्कराऽन्वितम्।
योगवाहिरसान् सर्वान् रक्तपित्ते प्रयोजयेत्॥ ८॥

रक्तपित्तान्तको रसः।—

मृताभ्रं मुण्डतीक्ष्णञ्च माक्षिकं रसतालकम्।
गन्धकञ्च भवेत् तुल्यं यष्टिद्राक्षाऽमृताद्रवैः॥ ९॥
दिनैकं मर्दयेत् खल्ले सिताक्षौद्रसमन्वितम्।
माषमात्रं निहन्त्याशु रक्तपित्तं सुदारुणम्।
ज्वरं दाहं क्षतक्षीणं तृष्णाशोषमरोचकम्॥ १०॥

रसामृतरसः।—

रसस्य द्विगुणं गन्धं माक्षिकञ्च शिलाजतु।
गुडूचीं चन्दनं द्राक्षां मधुपुष्पञ्च धान्यकम्॥ ११॥

शतमूल्यादिलौहे।—सिता—शर्करा, त्रिकत्रयं—त्रिफला-त्रिकटु-त्रिमदाः, [त्रिमदः,—मुस्तकं चित्रकं विड़ङ्गञ्च]। तिलं—कृष्णतिलम्। "त्रिकत्रयसमायुक्तम्" इति क्वचित् पाठः। लौहमिति—सर्वचूर्णसमम्। रक्तपित्त इति।—व्योम—अभ्रभस्म। पर्पटकस्वरसेन सेव्यः। अथवा—वासाद्राक्षाऽभयानामन्यतमस्य क्वाथः सशर्करः सेव्यः॥ ६—८॥

कुटजस्य त्वचं वीजं धातकी निम्बपत्रकम् ।
यष्टीमधुसमायुक्तं मधुशर्करयाऽन्वितम् ॥ १२ ॥
विधिना मर्दयित्वा तु कर्षमात्रन्तु भक्षयेत् ।
धारोष्णपयसा युक्तं प्रातरेव समुत्थितः ॥ १३ ॥
पित्तं तथाऽम्लपित्तञ्च रक्तपित्तं विशेषतः ।
निहन्ति सर्वदोषञ्च ज्वरं सर्वं न संशयः ।
रसामृतरसो नाम गहनानन्दभाषितः ॥ १४ ॥

खण्डकुष्माण्डकः ।—

कुष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम् ।
पचेत् तप्ते घृतप्रस्थे शनैस्ताम्रमये दृढ़े ॥ १५ ॥
यदा मधुनिभः पाकः न्यस्येत् खण्डशतं तदा ।
पिप्पली-शृङ्गबेराभ्यां द्वे पले जीरकस्य च ॥ १६ ॥
त्वगेलापत्रमरिच-धान्यकानां पलार्द्धकम् ।
न्यस्येत् चूर्णीकृतं तत्र दर्व्या सङ्घट्टयेत् मुहुः ॥ १७ ॥
तत् पक्वं स्थापयेत् भाण्डे दत्त्वा क्षौद्रं घृतार्द्धकम् ।
तद् यथाऽग्निबलं खादेद् रक्तपित्ती क्षतक्षयी ॥ १८ ॥

रक्तपित्तान्तकरसे ।—रसतालकं—हरितालमेव ॥ ९—१४ ॥

कुष्माण्डखण्डे ।—निष्कुलीकृतमिति—निस्त्वगस्थीकृतं किञ्चिज्जलं दत्त्वा उत्स्विद्य क्षौमे वस्त्रे निवेश्य पीड़येत्; तत आतपे मनाक् संशोष्य पिष्ट्वा च पलशतं गृहीत्वा ताम्रमयी कटाहे पक्तव्यम् । "पिप्पली-शृङ्गबेराभ्यां द्वे पले जीरकस्य च" इति ।—कणाशुण्ठ्योः प्रत्येकं पलद्वयं, जीरकस्य च द्वे पले । अत्र खण्डामलकमानानुसारात् कुष्माण्डक-द्रवात्—"पात्रं पाकाय दातव्यं यावान् वाऽत्र रसो भवेत्" इति

शर्करादं लौहम्।—

शर्करातिलसंयुक्तं त्रिकत्रययुतन्त्वयः।
रक्तपित्तं निहन्त्याशु चाम्लपित्तहरं परम्॥ १८॥

समशर्करलौहम्।—

लौहाच्चतुर्गुणं क्षीरमाज्यं द्विगुणमुत्तमम्।
चूर्णं पादन्तु वैड़ङ्गं दद्यात् मधुसिते समे॥ २०॥
ताम्रपात्रे दृढ़े पक्का स्थापयेत् घृतभाजने।
माषकादिक्रमेणैव भक्षयेत् विधिपूर्वकम्॥ २१॥
अनुपानं प्रयुञ्जीत नारिकेलोदकादिकम्।
रक्तपित्तं जयेत् तीव्रमम्लपित्तक्षतक्षयम्।
प्रहृष्टकान्तिजननमायुष्यमुत्तमोत्तमम्॥ २२॥

कपर्दको रसः।—

मृतं वा मूर्च्छितं सूतं कार्पासकुसुमद्रवैः।
मर्दयेत् दिनमेकन्तु तेन पूर्य्या वराटिका॥ २३॥
निरुध्य चान्धमूषायां भाण्डे रुद्धा पुटे पचेत्।
उद्धृत्य चूर्णयेत् श्लक्ष्णं मरिचैर्द्विगुणैः सह॥ २४॥

वक्तव्यम्। पाकश्चात्र मुद्रया। आसन्नपाके पिप्पल्यादिचूर्णं प्रक्षेप्यम्; सुशीते च मधु प्रक्षेपणीयम्॥ १५—१८॥

शर्करादलौहे।—लौहं सर्वचूर्णसमम्॥ १९॥

समशर्करलौहे।—मधुसिते समे इति।—प्रत्येकं लौहसमम्। मुद्रया पाके जाते लौहात् पादिकं विड़ङ्गचूर्णं प्रक्षेप्यम्; शीते मधु देयम्॥ २०—२२॥

गुञ्जामात्रं घृतेनैव भक्षयेत् प्रातरुत्थितः ।
उडुम्बरं घृतञ्चैव ह्यनुपानं प्रयोजयेत् ।
कपर्दकरसो नाम्ना रक्तपित्तविनाशनः ॥ २५ ॥

नीलोत्पलादिचूर्णम् ।—

नीलोत्पलसिताक्षौद्र-संयुक्तं पद्मकेशरम् ।
तण्डुलोदकपानेन रक्तपित्तं नियच्छति ॥ २६ ॥

[इति रक्तपित्त-चिकित्सा] ।

अथ यक्ष्म-चिकित्सा ।—

—०*०—

रास्नादिलौहम् ।—

रास्नाऽश्वगन्धाकर्पूर-भेकपर्णीशिलाह्वयैः ।
त्रिकत्रयसमायुक्तैः लौहं यक्ष्मान्तकृन्मतम् ॥ १ ॥
सर्वोपद्रवसंयुक्तमपि वैद्यविवर्जितम् ।
हन्ति कासं स्वराघातं राजयक्ष्मबलक्षयम् ।
बलवर्णाग्निपुष्टीनां वर्द्धनं दोषनाशनम् ॥ २ ॥

कपर्दकरसे ।—"तेन पूर्य्या वराटिका" इति ।—तेनौषधेन वराटिका पूरणीया ॥ २३—२६ ॥

इति रक्तपित्त-चिकित्सा ।

यक्ष्मरूपेषु "पित्तात् रक्तस्य चागमः" इति रक्तपित्तानन्तरं राज-

राजमृगाङ्को रसः।—

रसभस्म त्रयो भागा भागैकं हेमभस्मकम्।
मृततारस्य भागैकं शिलागन्धकतालकम्॥ ३॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्।
वराटिका तेन पूर्य्या चाजाक्षीरेण टङ्कणम्॥ ४॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तां निरोधयेत्।
शुष्कं गजपुटे पाच्यं चूर्णयेत् स्वाङ्गशीतलम्॥ ५॥
दशपिप्पलिकैः क्षौद्रैर्मरिचैर्वा घृतान्वितैः।
गुञ्जाचतुष्टयञ्चास्य क्षयरोगप्रशान्तये॥ ६॥
सघृतैर्दापयेद्वाऽथ वातश्लेष्मभवे क्षये।
रसो राजमृगाङ्कोऽयं नानारोगनिसूदनः॥ ७॥

मृगाङ्को रसः।—

स्याद्रसेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकञ्च समं तेन रसतुल्यन्तु टङ्कणम्॥ ८॥
तत्सर्वं गोलकं कृत्वा काञ्जिकेन च पेषयेत्।
भाण्डे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्॥ ९॥

यक्ष्मचिकित्सितमुच्यते। रास्नादिलौहे।—भेकपर्णी—थान्कुनी; शिला—शिलाजतु, मन.शिलेति केचित्। रास्नादीनां चूर्णसमं लौहम्। "रास्नाऽश्वगन्धाकर्पूर" इत्यत्र "रास्नाकर्पूरतालीश" इति पाठान्तरम्॥ १।२॥

राजमृगाङ्करसे।—"मृततारस्य" इत्यत्र "मृतताम्रस्य" तथा "मृताभ्रस्य च" इति पाठान्तरद्वयम्॥ ३—७॥

मृगाङ्कसंज्ञको ज्ञेयो राजयक्ष्मनिकृन्तनः ।
गुञ्जाचतुष्टयञ्चास्य मरिचैः सह भक्षयेत् ॥ १० ॥
पिप्पलीदशकैर्वाऽपि मधुना सह लेहयेत् ।
पथ्यन्तु लघुभिर्मांसैः प्रयोगेऽस्मिन् प्रयोजयेत् ॥ ११ ॥
व्यञ्जनैर्घृतपक्वैश्च नातिक्षारैरहिङ्गुभिः ।
एलाऽजाजीमरीचैस्तु संस्कृतैरविदाहिभिः ॥ १२ ॥
वृन्ताकबिल्वतैलानि कारवेल्लञ्च वर्जयेत् ।
स्त्रियं परिहरेद्दूरं कोपञ्चापि विवर्जयेत् ॥ १३ ॥

रत्नगर्भपोट्टलीरसः ।—

रसं वज्रं हेम तारं नागं लौहञ्च ताम्रकम् ।
तुल्यांशं मरिचं देयं मुक्ताविद्रुममाक्षिकम् ॥ १४ ॥
शङ्खं तुत्थञ्च तुल्यांशं सप्ताहं चित्रकद्रवैः ।
मर्दयित्वा विचूर्ण्याथ तेन पूर्य्या वराटिका ॥ १५ ॥
टङ्कणं रविदुग्धेन मुखं लिप्त्वा निरोधयेत् ।
मृद्भाण्डे तां निरुध्याथ सम्यग्गजपुटे पचेत् ॥ १६ ॥
आदाय चूर्णयेत् सर्वं निर्गुण्ड्या सप्त भावयेत् ।
आर्द्रकस्य रसैः सप्त चित्रकस्यैकविंशतिः ॥ १७ ॥
द्रवैर्भाव्यं ततः शोष्यं देयं गुञ्जाचतुष्टयम् ।
क्षयरोगं निहन्त्याशु साध्यासाध्यं न संशयः ॥ १८ ॥

मृगाङ्करसे ।—"रसतुल्यन्तु टङ्कणम्" इत्यत्र "रसपादन्तु टङ्कणम्" इति क्वचित् पाठः ॥ ८—१३ ॥

रत्नगर्भपोट्टलिकायाम् ।—वज्रं—हीरकं, तदभावे वैक्रान्तम्; नागं—सीसकम् । तुल्यांशं मरिचमिति—मरिचचूर्णमेकभागसमम् । "तुल्यांशं

योजयेत् पिप्पलीक्षौद्रैः सघृतैर्मरिचैस्तथा।
महारोगाष्टके कासे श्वासे चैवातिसारके।
पोट्टलो रत्नगर्भोऽयं सर्वरोगकुलान्तकः॥ १८॥

लोकेश्वरपोट्टलीरसः।—

रसस्य भस्मना हेम पादांशेन प्रकल्पयेत्।
द्विगुणं गन्धकं दत्त्वा मर्दयेत् चित्रकाम्बुना॥ २०॥
पूर्य्या वराटिका तेन टङ्गणेन निरुध्य च।
भाण्डे चूर्णप्रलिप्तेऽथ क्षिप्वा रुद्ध्वा च मृन्मये॥ २१॥
शोषयित्वा गजपुटे पुटेत् च चापराह्निके।
स्वाङ्गशीतं समुद्धृत्य चूर्णयित्वा तु विन्यसेत्॥ २२॥
एष लोकेश्वरो नाम वीर्य्यपुष्टिविवर्द्धनः।
गुञ्जाचतुष्टयञ्चास्य पिप्पलीमधुसंयुतम्॥ २३॥
मरिचैर्घृतयुक्तैश्च भक्षयेद्दिवसत्रयम्।
अङ्गकार्श्येऽग्निमान्द्ये च कासे पित्ते क्षयेऽपि च॥ २४॥
लवणं वर्जयेत् तत्र साज्यं दधि च योजयेत्।
एकविंशद्दिनं यावत् सघृतं मरिचं पिवेत्।
पथ्यं मृगाङ्कवद्देयं शयीतोत्तानपादतः॥ २५॥
ये शुष्का विषमाशनैः क्षयरुजा व्याप्ताश्च येऽष्ठीलया
पाण्डुत्वेन हताश्च वैद्यविधिना ये चाधिना दुर्भगाः।

मरिचम्" इत्यत्र "तुल्यांशं मारितम्" इति पाठान्तरम्। "आदाय चूर्णयेत् सर्वम्" इति।—वराटिकया सहैव॥ १४—१८॥

ये तप्ता विविधैर्ज्वरैः श्रममदोन्मादैः प्रमादं गताः
ते सर्वे विगतामया हतरुजः स्युः पोट्टलीसेवनात् ॥ २६ ॥

कनकसुन्दरो रसः।—

रसस्य तुर्य्यभागेण हेमभस्म प्रयोजयेत्।
मनःशिला गन्धकञ्च तुत्थं माक्षिकतालकम् ॥ २७ ॥
विषं टङ्कणकं सर्वं रसतुल्यं प्रदापयेत्।
मर्द्दयेत् सर्वमेकत्र खल्लपात्रे च निर्मले ॥ २८ ॥
जयन्तीभृङ्गराजोत्थैः पाठाया वासकस्य च।
अगस्तिलाङ्गलाग्नीनां स्वरसैश्च पृथक् पृथक् ॥ २९ ॥
भावयित्वा विशोष्याथ पुनश्चार्द्रकवारिणा।
सप्तधा भावयित्वा च रसः कनकसुन्दरः ॥ ३० ॥
गुञ्जाद्वयं त्रयं वाऽस्य राजयक्ष्मप्रशान्तये।
मधुना पिप्पलीभिर्वा मरिचैर्वा घृतान्वितम् ॥ ३१ ॥
सन्निपाते प्रदातव्यमार्द्रकस्य रसेन वै।
जयपालरजोभिर्वा गुल्मिने शूलरोगिणि ॥ ३२ ॥
अम्लवर्ज्जं चरेत् पथ्यं बल्यं हृद्यं रसायनम्।
वर्जयेल्लवणं हिङ्गु तक्रं दधि विदाहि यत् ॥ ३३ ॥

लोकेश्वरपोट्टलिकायाम्।—द्विगुणं गन्धकमिति—रसात् द्विगुणं गन्धकमित्यर्थः ॥ २०—२६ ॥

कनकसुन्दररसे।—तुर्य्यभागेन—चतुर्थभागेन, अग्निः,—चित्रकः ॥ २९—३३ ॥

हेमगर्भपोट्टली।—

रसभस्म त्रयो भागा भागैकं हेमभस्मकम्।
मृतताम्रस्य भागैकं भागैकं गन्धकस्य च ॥ ३४ ॥
मर्दयेच्चित्रकद्रावैर्द्दियामान्ते समुद्धरेत्।
पूर्य्या वराटिका तेन टङ्कणेन विलेपयेत् ॥ ३५ ॥
वराटीं पूरयेद्भाण्डे रुद्धा गजपुटे पचेत्।
विचूर्णयेत् स्वाङ्गशीते पोट्टलीं हेमगर्भिकाम्।
मृगाङ्कवच्चतुर्गुञ्जा-भक्षणाद्राजयक्ष्मनुत् ॥ ३६ ॥

सर्वाङ्गसुन्दरो रसः।—

गन्धो रसश्च तुल्यांशं द्वौ भागौ टङ्कणस्य च।
मौक्तिकं विद्रुमं शङ्ख-भस्म देयं समांशिकम् ॥ ३७ ॥
हेमभस्मार्द्धभागञ्च सर्वं खल्ले विमर्द्दयेत्।
निम्बुद्रवेण संपिष्य पिण्डिकां कारयेत् ततः ॥ ३८ ॥
पश्चात् गजपुटं दत्त्वा सुशीतञ्च समुद्धरेत्।
हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदं मतम् ॥ ३९ ॥
एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत्।
ततः पूजां प्रकुर्वीत रसस्य दिवसे शुभे ॥ ४० ॥
सर्वाङ्गसुन्दरो ह्येष राजयक्ष्मनिकृन्तनः।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ॥ ४१ ॥

हेमगर्भपोट्टलीरसे।—"भागैकं गन्धकस्य" इत्यत्र "भागार्द्धं गन्धकस्य" इति वा पाठः ॥ ३४—३६ ॥

सर्वाङ्गसुन्दररसे।—रसगन्धं स्वर्णतुल्यं, मौक्तिकादीनि स्वर्णार्द्ध-

अर्शःसु ग्रहणीदोषे मेहे गुल्मे भगन्दरे ।
निहन्ति वातजान् रोगान् श्लैष्मिकांश्च विशेषतः ॥ ४२ ॥
पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा ।
भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा ॥ ४३ ॥

लोकेश्वरी रसः ।—

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः ।
माषञ्च टङ्कणस्यैव जम्बीराद्भिर्विमर्दयेत् ।
पुटेत् लोकेश्वरो नाम्ना लोकनाथरसोत्तमः ॥ ४४ ॥
हन्ति कुष्ठं रक्तपित्तमन्यान् रोगान् बलाज्जयेत् ।
पुष्टिवीर्य्यप्रसादौजः-कान्तिलावण्यदः परः ॥ ४५ ॥
कोऽस्ति लोकेश्वरादन्यो नृणां शम्भुमुखोद्गतात् ।
पथ्यं शाल्योदनं सर्पिर्दधि शाकं सहिङ्गुकम् ॥ ४६ ॥
नित्यं यामद्वयादूर्द्ध्वं कार्य्यं वारत्रयं दिवा ।
त्र्यहाद्वान्तेऽरुचौ वाऽपि लग्नः सूतो न चेत् पुनः ॥ ४७ ॥
अष्टमेऽह्नि प्रदातव्यः पूर्ववत् कार्य्यसिद्धये ।
प्रथमे सप्तमे देया लावशूरणमुद्गकाः ॥ ४८ ॥
द्वितीये माषगोधूमा भक्ष्या पूर्वोदितञ्च यत् ।
देयानि मत्स्यमांसानि तृतीये मर्दनादिकम् ॥ ४९ ॥
तैलबिल्वारनालानि कोपस्त्रीस्वप्नजागरान् ।
त्यजेत् कादीनि द्रव्याणि हृद्यं स्वादु च शीलयेत् ॥ ५० ॥

भागानि। "निम्बुद्रवेण" इत्यत्र "निम्बद्रवेण" इति पाठान्तरम् ॥ ३७—४३ ॥

लोकेश्वररसे।—पारदगन्धकयोर्मिलितकपलम्। "माषञ्च टङ्कण-

वायौ सेव्यं पयः कोष्णं पित्ते तु ससितं हितम्।
अत्यग्नौ चोरवीजानि तिलेक्षुकदलीफलम्॥ ५१॥
खर्जूरमांसमृद्वीका-सितादि सकलं भजेत्।
वीर्य्यच्युतौ नारिकेल-जलं तालफलानि च॥ ५२॥
आनाहारुचिमूर्च्छार्त्ति-धूमोद्गारविसूचिकाः।
एतेषु लघु शाल्यन्नं केवलं सघृतं हितम्॥ ५३॥
अतिवान्तौ पिबेच्छिन्ना-रसं क्षौद्रेण संयुतम्।
सक्षौद्रं वासकं रक्त-पित्ते रुचिविपर्य्यये॥ ५४॥
भृष्टधान्यं सितायुक्तमथवा क्षौद्रसंयुतम्।
यवान्नं मधुसंयुक्तं पिबेद्वा माहिषं दधि॥ ५५॥
घृतान्नं भक्षयेन्नित्यं सुखोष्णेन च वारिणा।
छिन्नाम्बुसहितं देयं दाहेऽजीर्णे सुधाजलम्॥ ५६॥
आर्द्रकं सर्षपं रम्भा-फलं भृङ्गं कफोल्वणे।
अन्येऽप्युपद्रवा ये स्युस्तत्तच्छान्त्यै यथौषधम्॥ ५७॥
द्वात्रिंशद्दिवसे कार्य्यं स्नानमामलकैस्तिलैः।
युक्तं सेव्यं बले जाते शनैरग्निबलादनु॥ ५८॥

खल्पमृगाङ्कः।—

रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं भजेत्।
दोषं बुद्ध्वाऽनुपानेन मृगाङ्कोऽयं क्षयापहः॥ ५९॥

सैव" इत्यत्र, "कर्षञ्च टङ्कणस्यैव" इति पाठान्तरम्। छिन्ना—गुडची।
सुधाजलं—चर्णोदकम्॥ ४४—५९॥

[१]काञ्चनाभ्ररसः ।—

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमञ्चाभया तारं कस्तूरी च मनःशिला ॥ ६० ॥
प्रत्येकं बिन्दुमात्रन्तु सर्वं संमर्द्य यत्नतः ।
वारिणा वटिका कार्य्या द्विगुञ्जाफलमानतः ॥ ६१ ॥
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः ।
क्षयं हन्ति तथा कासं श्लेष्मपित्तसमुद्भवम् ॥ ६२ ॥
प्रमेहं विविधञ्चैव दोषत्रयसमुत्थितम् ।
कफजान् वातजान् रोगान् नाशयेत् सद्य एव हि ॥ ६२ ॥
बलवृद्धिं वीर्य्यवृद्धिं लिङ्गदार्ढ्यं करोति च ।
श्रीकरः पुष्टिजननः नानारोगनिसूदनः ।
गहनानन्दनाथोक्तो रसोऽयं काञ्चनाभ्रकः ॥ ६४ ॥

वृहत्काञ्चनाभ्ररसः ।—

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम् ।
विद्रुमं मृतवैक्रान्तं तारं ताम्रञ्च वङ्गकम् ॥ ६५ ॥
कस्तूरिका लवङ्गञ्च जातीकोषैलबालुकम् ।
प्रत्येकं बिन्दुमात्रञ्च सर्वं मर्द्यं प्रयत्नतः ॥ ६६ ॥
कन्यानीरेण संमर्द्यं केशराजरसेन च ।
अजाक्षीरेण सम्भाव्यं प्रत्येकं दिवसत्रयम् ॥ ६७॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः ॥ ६८ ॥
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ।

प्रमेहान् विंशतिञ्चैव दोषत्रयसमुद्भवान् ।
सर्वरोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ६९ ॥

शिलाजत्वादिलौहम् ।—

शिलाजतु मधु व्योषं ताप्यं लौहरजस्तथा ।
क्षीरेण लेहितस्याशु क्षयः क्षयमवाप्नुयात् ॥ ७० ॥

कुमुदेश्वरो रसः ।—

हेमभस्म रसभस्म गन्धकं मौक्तिकन्तु रसटङ्कणं तथा ।
तारकं गरुड़सर्वतुल्यकं काञ्जिकेन परिमर्द्य गोलकम् ॥ ७१ ॥
मृत्स्नया च परिवेष्ट्य शोषितं भाण्डके लवणगेऽथ पाचयेत् ।
एकरात्रमृदुसम्पुटेन वा सिद्धिमेति कुमुदेश्वरो रसः ।
वल्लमस्य मरिचैः घृताप्लुतै राजयक्ष्मपरिशान्तये पिबेत् ॥ ७२ ॥

क्षयकेशरीरसः ।—

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः ।
नवभागोन्मितैस्तुल्यं लौह-पारदसिन्दूरम् ।
मधुना क्षयरोगांश्च हन्त्ययं क्षयकेशरी ॥ ७३ ॥

काञ्चनाभ्ररसे । बिन्दुमात्रं—कर्षपरिमितमित्यर्थः ॥ ६०—६८ ॥

शिलाजत्वादिलौहे ।—मधु—यष्टीमधु, ताप्यं—स्वर्णमाक्षिकम् । लौहं सर्वचूर्णसमम् ॥ ७० ॥

कुमुदेश्वररसे ।—तारकमित्यत्र तालकमिति केचित् पठन्ति। तारकं—रौप्यं, गरुड़ं—स्वर्णमाक्षिकम् ॥ ७१।७२ ॥

क्षयकेशरीरसे ।—लौहपारदसिन्दूरम् इति।—अत्र लौहभस्म तथा रससिन्दूरम् ; न च लौहः पारदं रससिन्दूरमिति बोद्धव्यम् । छागीदुग्धेन सम्पिष्य वल्लपरिमिता वटी कार्य्या ॥ ७३ ॥

वृहच्चन्द्रामृतो रसः।—

रसगन्धकयोर्ग्राह्यं कर्षमेकं सुशोधितम्।
अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धञ्च विचक्षणः॥ ७४॥
कर्पूरं शाणकं दद्यात् स्वर्णं तोलकसम्मितम्।
ताम्रञ्च तोलकं दद्यात् विशुद्धं मारितं भिषक्॥ ७५॥
लौहं कर्षं क्षिपेत् तत्र वृद्धदारकजीरकम्।
विदारी शतमूली च क्षुरकञ्च बला तथा॥ ७६॥
मर्कव्यतिबला चैव जातीकोषफले तथा।
लवङ्गं विजयावीजं श्वेतसर्जरसं तथा॥ ७७॥
शाणभागं समादाय चैकीकृत्य प्रयत्नतः।
मधुना मर्दयेत् तावद् यावदेकत्वमागतम्॥ ७८॥
चतुर्गुञ्जाप्रमाणेन वटीं कुर्य्यात् प्रयत्नतः।
भक्षयेद्वटिकामेकां पिप्पलीमधुना सह॥ ७९॥

महामृगाङ्को रसः।—

निरुत्थभस्म सौवर्णं द्विगुणं भस्मसूतकम्।
त्रिगुणं भस्म मुक्तोत्थं शुकपुच्छं चतुर्गुणम्॥ ८०॥
मृततायञ्च पञ्चांशं तारभस्म चतुर्गुणम्।
सप्तभागं प्रवालञ्च रसतुल्यञ्च टङ्कणम्॥ ८१॥
सर्वमेकत्र संमर्द्य त्रिदिनं लुङ्गवारिणा।
ततश्च गोलकं कृत्वा शोषयित्वा खरातपे॥ ८२॥

वृहच्चन्द्रामृतरसे।—क्षुरकं—कोकिलाक्षवीजं, मर्कटी—शूकशिम्बी, श्वेतसर्जरसं—श्वेतधूनकम्॥ ७४—७९॥

महामृगाङ्करसे।—द्विगुणं भस्मसूतकमिति।—सुवर्णापेक्षया द्विगुणं

लवणैः पात्रमापूर्य्य तन्मध्ये गोलकं क्षिपेत्।
तन्मुखन्तु मृदा रुद्ध्वा पचेत् यामचतुष्टयम्॥ ८३॥
आकृष्य चूर्णयेत् शुद्धं चतुःषष्टिविभागतः।
वज्रं वा तदभावे तु वैक्रान्तं षोड़शांशिकम्॥ ८४॥
महामृगाङ्कः खलु एष सिद्धः श्रीनन्दिनाथप्रकटीकृतोऽयम्।
वल्लोऽस्य सेव्यो मरिचाज्ययुक्तः सेव्योऽथवा पिप्पलिकासमेतः॥८५॥
तत्रोपचाराः कर्त्तव्याः सर्वे क्षयगदोदिताः।
बल्यं वृष्यञ्च भोक्तव्यं त्यजेत् सूतविरोधि यत्॥ ८६॥
यक्ष्माणं बहुरूपिणं ज्वरगदं गुल्मं तथा विद्रधिम्
मन्दाग्निं स्वरभेदकासमरुचिं वान्तिञ्च मूर्च्छां भ्रमिम्।
अष्टावेव महागदान् गरगदान् पाण्ड्वामयान् कामलान्
पित्तोत्थांश्च समग्रकान् बहुविधानन्यांस्तथा नाशयेत्॥ ८७॥

क्षयकेशरी।—

मृतमभ्रं मृतं सूतं मृतं लौहं तथा रविः।
मृतं नागञ्च कांस्यञ्च मण्डूरं विमलं शिला॥ ८८॥
वङ्गं खर्परकं तालं शङ्खटङ्कणमाक्षिकम्।
वैक्रान्तं कान्तलौहञ्च स्वर्णं विद्रुममौक्तिकम्॥ ८९॥

रससिन्दूरमित्यर्थः। शुकपुच्छं—गन्धकम्। लुङ्गवारिणा—मातुलुङ्ग-रसेन। "चतुःषष्टिविभागतः" इति।—पुटदानानन्तरं सर्वचूर्णाच्चतुः-षष्टिविभागतः वज्रं देयम्; वज्राभावे षोड़शांशं वैक्रान्तं प्रदातव्यम्॥ ८०—८७॥

क्षयकेशरिणि।—मृतं सूतं—रससिन्दूरं, रविः,—ताम्रं, शिला—

वराटं मणिरागञ्च राजपट्टञ्च गन्धकः ।
सर्वमेकत्र सञ्चूर्ण्य खल्लमध्ये विनिक्षिपेत् ॥ ९० ॥
मर्दयेत् त्वग्निभानुभ्यां प्रपुटेत् त्रिदिनं लघु ।
भावयेत् पुटयेदेभिर्वारांस्त्रींश्च पृथक् पृथक् ॥ ९१ ॥
मातुलुङ्गवरावह्नि-स्त्म्लवेतसमार्कव- ।
हयमारार्द्रकरसैः पाचितो लघुवह्निना ॥ ९२ ॥
वातपित्तकफोत्क्लेशान् ज्वरान् संमर्दितानपि ।
सन्निपातं निहन्त्याशु सर्वाङ्गैकाङ्गमारुतान् ॥ ९३ ॥
सेवितश्च सितायुक्तो मागधीरजसा युतः ।
मधुकार्द्रकसंयुक्तस्तद्व्याधिहरणौषधैः ॥ ९४ ॥
रोगिणां सेवितो हन्ति व्याधिवारणकेशरी ।
क्षयमेकादशविधं शोषं पाण्डुं क्रिमिं जयेत् ॥ ९५ ॥
कासं पञ्चविधं श्वासं मेहमेदोमहोदरम् ।
अश्मरीं शर्करां शूलं प्लीहगुल्मं हलीमकम् ।
सर्वव्याधिहरो बल्यो वृष्यो मेध्यो रसायनः ॥ ९६ ॥

शिलाजतु, मनःशिलेति भट्टः । मणिरागं—हिङ्गुलम् । राजपट्टं,—कान्तपाषाणः, तदभावे गोदन्ता । अग्निभानुभ्यामिति—चित्रकार्कभ्याम् । वरा—त्रिफला, वह्निः,—निम्बुकः, न तु चित्रकः, प्रागुक्तत्वात् ; मार्कवः,—भृङ्गराजः, हयमारः,—करवीरम् । अभ्रादि सर्वं चित्रकार्करसैर्भावयेत् ; ततः मृदुवह्निना त्रिदिनं पुटेत् ; एवं वारत्रयं कुर्य्यात्, तत उद्धृत्य लौहपात्रे कृत्वा मातुलुङ्गादिरसैर्लघुवह्निना भावयेत् ॥ ८८—९६ ॥

क्षयारिः।—

भस्मत्वं समुपागतं विधिकृतं हेमामृतेनान्वितं
पादांशेन कणाऽऽज्यवल्लसहितं गुञ्जोन्मितं सेवितम्।
यक्ष्माणं ज्वररोगपाण्डुगुदजान् श्वासञ्च कासामयम्
दुष्टाञ्च ग्रहणीं क्षतक्षयमुखान् रोगान् जयेत् देहभृत्॥ ८७॥

क्षयसंहारः।—

लौढ़ो व्योषवरान्वितो विमलको युक्तो घृतैः सेवितो
हन्यात् हृद्गदटुर्जयं श्वयथुकं पाण्डुप्रमेहारुचिम्।
शूलार्त्तिं ग्रहणीञ्च गुल्ममतुलं यक्ष्मामयं कामलाम्
सर्वान् पित्तमरुद्गदान् किमपरैर्योगैरशेषामयान्॥ ८८॥

रजतादिलौहम्।—

भस्मीभूतं रजतममलं तत्समं व्योमचूर्णं
सर्वैस्तुल्यं त्रिकटु सवरं साय आज्येन युक्तम्।
लीढ़ं प्रातः क्षपयतितरां यक्ष्मपाण्डूदरार्शः-
श्वासं कासं नयनजरुजः पित्तरोगानशेषान्॥ ८९॥

क्षयारौ।—विधिकृतं— यथाविधिभस्मसुवर्णं, पादांशेन—चतुर्थांशेन, अन्वितं— संयुक्तम् इत्यन्वयः। कणाऽऽज्यवल्लसहितं—पिप्पलीचूर्णघृतयोः प्रत्येकं गुञ्जाद्वयं त्रयं वा ग्राह्यम्॥ ८७॥

क्षयसंहारे।—वरा—त्रिफला। विमलकोऽत्र शोधितपुटितः ग्राह्यः॥ ८८॥

रजतादिलौहे।— अमलं—मलरहितम्। सवरमिति—त्रिफलासहितम्; साय इति।—अयो लौहचूर्णं, तत्सर्वतुल्यं, तेन सहैत्यर्थः॥ ८९॥

नित्योदयो रसः ।—

सुशुद्धं पारदं गन्धः प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्दयेच्च पृथक् पृथक् ॥ १०० ॥
बिल्वाग्निमन्थश्योणाकः काश्मरी पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहती वृषपत्रकम् ॥ १०१ ॥
विदारी बहुपुत्री च एषां कर्षरसैर्भिषक् ।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमानकम् ॥ १०२ ॥
पलमात्रन्तु कृष्णाभ्रं तदर्द्धञ्च शिलाह्वयम् ।
जातीकोषफले मांसी तालीशैला लवङ्गकम् ॥ १०३ ॥
प्रत्येकं कोलमानन्तु वासानीरैर्विमर्दयेत् ।
शोषयित्वाऽऽतपे पश्चाद्विदारीरसमर्दितम् ॥ १०४ ॥
द्विगुञ्जाभां वटीं खादेत् पिप्पलीमधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्मितः ॥ १०५ ॥
पञ्च कासान् निहन्त्याशु चिरकालोद्भवानपि ।
राजयक्ष्माणमत्युग्रं जीर्णज्वरमरोचकम् ॥ १०६ ॥
धातुस्थं विषमाख्यञ्च तृतीयकचतुर्थकम् ।
अर्शांसि कामलां पाण्डुमग्निमान्द्यं प्रमेहकम् ।
सेवनादस्य कन्दर्प-रूपो भवति मानवः ॥ १०७ ॥

[इति यक्ष्म चिकित्सा] ।

नित्योदयरसे ।—शुक्तिसम्मितं—तोलकचतुष्टयमितम्, अग्निमन्थः,—गणिकारिका, काश्मरी—गाम्भारी, वृषपत्रकं— वासापत्रम्, विदारी—भूमिकुष्माण्डः, बहुपुत्री—शतमूली. शिलाह्वयं—मनःशिला, कोलमानं—तोलकमात्रम् । अत्र प्रथमं पारदगन्धककृतां कज्जलीं बिल्वादि-

अथ कास-चिकित्सा ।—

—०*०—

वृहद्रसेन्द्रगुड़िका ।—

कर्षं शुद्धरसेन्द्रस्य गन्धकस्याभ्रकस्य च ।
ताम्रस्य हरितालस्य लौहस्य च विषस्य च ॥ १ ॥
मनःशिलायाः क्षाराणां वीजस्य कनकस्य च ।
मरिचस्य च सर्वेषां समं चूर्णं प्रकल्पयेत् ॥ २ ॥
जयन्ती चित्रकं माणं खण्डकर्णोऽथ मण्डूकी ।
शक्राशनं भृङ्गराजं केशराजं तथाऽऽर्द्रकम् ॥ ३ ॥
निर्गुण्डीस्वरसेनापि कर्षमात्रेण मर्दयेत् ।
कलायपरिमाणान्तु वटिकां कारयेद्भिषक् ।
आर्द्रकस्वरसेनैव पञ्चकासं व्यपोहति ॥ ४ ॥
हन्ति कासं तथा श्वासं यक्ष्माणं सभगन्दरम् ।

रसेन क्वाथेन वा, पृथक् पृथक् भावयित्वा सुवर्णादिकं दत्त्वा वासा-रसेन मर्दयित्वा च आतपशुष्कं कुर्य्यात्; पश्चात् भूमिकुष्माण्डरसेन मर्दयित्वा द्विगुञ्जमाना वटिका कार्य्या ॥ १००—१०७ ॥

इति यक्ष्म-चिकित्सा ।

यक्ष्मरूपेषु कासपाठात् कासापेक्षया च यक्ष्मणः सम्भवात् यक्ष्मानन्तरं कासचिकित्सामाह। वृहद्रसेन्द्रगुड़िकायाम् ।—क्षाराणां—स्वर्जि-यवक्षारटङ्कणानाम् । कनकं—धुस्तूरः । रसादिमरिचान्तानां त्रयोदश-

अग्निमान्द्यारुचिं शोथमुदरं पाण्डुकामलम् ।
रसायनी च वृष्या च बलवर्णप्रसादिनी ॥ ५ ॥
बृंहणं मधुरं स्निग्धं भक्ष्यं मांसञ्च जाङ्गलम् ।
घृतपक्वं सदा भक्ष्यं रूक्षं तीक्ष्णं विवर्जयेत् ॥ ६ ॥

अमृतार्णवो रसः ।—

पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
रास्ना विडङ्गं त्रिफला देवदारु च चित्रकम् ॥ ७ ॥
अमृता पद्मकं क्षौद्रं विषञ्चैव विमर्दयेत् ।
द्विगुञ्जं वातकासार्त्तः सेवयेदमृतार्णवम् ॥ ८ ॥

पित्तकासान्तको रसः ।—

भस्म ताम्राभ्रकान्तानां कासमर्दत्वचो रसैः ।
मुनिजैर्वेतसाम्लैश्च दिनं मर्द्यं सुपिण्डितम् ॥ ९ ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।
कासश्वासाग्निमान्द्यञ्च क्षयञ्चापि निहन्त्यलम् ॥ १० ॥

द्रव्याणां प्रत्येकं कर्षमानम् । खण्डकर्णः,—"खारकोन्" इति ख्यातः, अत्र घण्टकर्ण इति पाठेऽपि स एव अर्थः ; मण्डूकी—मण्डूकपर्णी, "थानकुनी" इति ख्याता । शक्राशनं—विजया । जयन्त्यादीनां स्वरसः पृथक् कर्षपरिमितः ॥ १—६ ॥

अमृतार्णवे ।—चित्रकमित्यत्र कटुत्रयमिति पाठान्तरम् । अमृता—गुडूची, पद्मकं—पद्मकाष्ठम् ॥ ७।८ ॥

पित्तकासान्तकरसे ।—कासमर्दः,—"कालकासन्दा" इति ख्याता । मुनिजैः—वकपुष्पैः ॥ ९।१० ॥

कासमंहारभैरवो रसः।—

रसगन्धकताम्राभ्र-शङ्खटङ्कणलौहकम्।
मरिचं कुष्ठतालीशं जातीफललवङ्गकम्॥ ११॥
कार्षिकं चूर्णमादाय दण्डेनामर्द्य भावयेत्।
भेकपर्णीकेशराज-निर्गुण्डी-काकमाचिकाः॥ १२॥
द्रोणपुष्पी शालपर्णी ग्रीष्मसुन्दरकः तथा।
भार्गी हरीतकी वासा कार्षिकैः पचजै रसैः॥ १३॥
वटिकां कारयेद्वैद्यः पञ्चगुञ्जाप्रमाणतः।
श्रीमद्गहननाथेन कासमंहारभैरवः।
रसोऽयं निर्मितो यत्नात् लोकरक्षणहेतवे॥ १४॥
वासाशुण्ठीकण्टकारी-क्काथेन पाययेद्बुधः।
वातजं पैत्तिकं कासं श्लैष्मिकं चिरजं तथा॥ १५॥
कासं नानाविधं हन्ति श्वासमुग्रमरोचकम्।
बलवर्णकरः श्रीदः पुष्टिदः कान्तिवर्द्धनः॥ १६॥

लक्ष्मीविलासो रसः।—

शुद्धसूतं सतालञ्च तालार्द्धं रसखर्परम्।
वङ्गं ताम्रं घनं कान्तं कांस्यं गन्धं पलं पलम्॥ १७॥
केशराजरसेनैव भावयेद्दिवसत्रयम्।
कुलत्थस्य रसेनैव भावयेच्च पुनः पुनः॥ १८॥
एला जातीफलाख्यञ्च तेजपत्रं लवङ्गकम्।
यमानी जीरकञ्चैव त्रिकटु त्रिफला समम्॥ १९॥

कासमंहारभैरवे।—भेकपर्णी—थानकुनी; भेकपर्ण्यादीनां स्वरसः प्रत्येकं कर्षपरिमित इत्यर्थः॥ ११—१६॥

नतं भृङ्गं वंशगुर्भं कर्षमात्रञ्च कारयेत् ।
भावयेच्च रसेनैव गोलयेत् सर्व्वमौषधम् ।
छायाशुष्का वटी कार्य्या चणकप्रमिता शुभा ॥ २० ॥
शीताम्बुना पिबेद्धीमान् सर्व्वकासनिवृत्तये ।
मत्स्यं मांसं तथा चीरं पथ्यं स्यात् स्निग्धभोजनम् ॥ २१ ॥
क्षयं कासं तथा श्वासं सज्वरं वाऽथ विज्वरम् ।
हलीमकं पाण्डुरोगं शोथं शूलं प्रमेहकम् ॥ २२ ॥
अर्शोनाशं करोत्येव बलवृद्धिञ्च कारयेत् ।
वर्जयेच्छाकमम्लञ्च भृष्टद्रव्यं हुताशनम् ॥ २३ ॥

सर्व्वेश्वरो रसः ।—

रसगन्धकयोश्चूर्णमेकीकृत्याभ्रकं तथा ।
हेमभिश्च समं कृत्वा मर्दयेत् यामकद्वयम् ॥ २४ ॥
त्र्यूषणानि लवङ्गैला-टङ्कणं हेमतुल्यकम् ।
कण्टकार्य्या रसैर्भाव्यमेकविंशतिवारकम् ॥ २५ ॥
शिग्रुवीजार्द्रकरसैः सप्तधा भावयेत् पृथक् ।
रसः सर्व्वेश्वरो नाम कासश्वासक्षयापहः ।
अनुपानं प्रयोक्तव्यं विभीतकफलत्वचम् ॥ २६ ॥

लक्ष्मीविलासरसे ।–रसखर्परं—खर्परमेव ॥ १७—२३ ॥

सर्व्वेश्वररसे ।—कज्जल्याः भागद्वयं, भागैकमभ्रस्य, तथा सुवर्णस्य भागैकम् । एतानि प्रहरद्वयं यावत् मर्दयित्वा त्रिकटुलवङ्गैलाटङ्कण-लाजानां प्रत्येकम् स्वर्णसमं दत्त्वा, कण्टकार्य्याः स्वरसेन एकविंशति वारान् शिग्रुवीजरसेन आर्द्रकरसेन च प्रत्येकं सप्तवारान् भावयित्वा द्विगुञ्जापरिमिता वटी कार्य्या ॥ २४—२६ ॥

शृङ्गाराभ्रम्।—

शुद्धं कृष्णाभ्रचूर्णं द्विपलपरिमितं शाणमानं यदन्यत्
कर्पूरं जातिकोषं सजलमिभकणा तेजपत्रं लवङ्गम्।
मांसी तालीशचोचे गजकुसुमगदं धातकी चेति तुल्यम्
पथ्या धात्री विभीतं त्रिकटुरथ पृथक् त्वर्द्धशाणं द्विशाणम् ॥२७॥
एला जातीफलाख्यं चितितलविधिना शुद्धगन्धाश्मकोलम्
कोलार्द्धं पारदस्य प्रतिपदविहितं पिष्टमेकत्र मिश्रम्।
पानीयेनैव कार्य्याः परिणतचणकस्विन्नतुल्याश्च वट्यः
प्रातः खाद्याश्चतस्रस्तदनु च हि कियत् शृङ्गबेरं सपर्णम् ॥ २८ ॥
पानीयं पीतमन्ते ध्रुवमपहरति क्षिप्रमेतान् विकारान्
कोष्ठे दुष्टाग्निजातान् ज्वरमुदररुजो राजयक्ष्मक्षयञ्च।
कासं श्वासं सशोथं नयनपरिभवं मेहमेदोविकारान्
छर्दिं शूलाम्लपित्तं तृषमपि महतीं गुल्मजालं विशालम् ॥ २९ ॥
पाण्डुत्वं रक्तपित्तं गरलभवगदान् पीनसं प्लीहरोगम्
हन्यादामानिलोत्थान् कफपवनकृतान् पित्तरोगानशेषान्।
बल्यो वृष्यश्च योगस्तरुणतरकरः सर्वरोगे प्रशस्तः
पथ्यं मांसैश्च यूषैः घृतपरिलुलितैः गव्यदुग्धैश्च भूयः ॥ ३० ॥
भोज्यं योज्यं यथेष्टं ललितललनया दीयमानं मुदा यत्
शृङ्गाराभ्रेण कामी युवतिजनशताभोगयोगादतुष्टः।
वर्ज्यं शाकाम्लमादौ दिनकतिपयचित् स्वेच्छया भोज्यमन्यत्
दीर्घायुः काममूर्त्तिर्गतबलिपलितो मानवोऽस्य प्रसादात् ॥३१॥

शृङ्गाराभ्रे।—जलं—बालकम्, इभकणा—गजपिप्पली। मांसी—

सार्वभौमरसः ।—

जीर्णं सुवर्णं लौहं वा यद्यत्रैव प्रदीयते ।
तदाऽयं सर्वरोगाणां सार्वभौमो न संशयः ॥ ३२ ॥

तरुणानन्दरसः ।—

कर्षद्वयं रसेन्द्रस्य शुद्धस्य गन्धकस्य च ।
कज्जलीकृत्य यत्नेन शुभे दृढ़शिलातले ॥ ३३ ॥
विल्वाग्निमन्थः श्योणाकः काश्मरी पाटला बला ।
मुस्तं पुनर्नवा धात्री वृहती वृषपत्रकम् ॥ ३४ ॥
विदारी शतमूली च कर्षैरेषां पृथक् रसैः ।
मर्द्दयित्वा पुनर्वासा-स्वरसैर्द्दशतोलकैः ॥ ३५ ॥
मर्द्दयेत्तत्र शुद्धाभ्रं रसस्य द्विगुणं चिपेत् ।
रसस्यार्द्धञ्च कर्पूरं तत्रैव दापयेद्भिषक् ॥ ३६ ॥
जातीकोषफले मांसी-तालीशैला-लवङ्गकम् ।
चूर्णं कृत्वा प्रयत्नेन माषमात्रं चिपेत् पृथक् ॥ ३७ ॥
विदारीस्वरसेनैव वटिकां कारयेद्भिषक् ।
राजयक्ष्माणमत्युग्रं चयञ्चोग्रमुरःचतम् ॥ ३८ ॥

जटामांसो, चोचं—गुड़त्वक्, गजकुसुमगदं—नागेश्वरः पुष्करमूलञ्च, धातकी—धातकीपुष्पम् ; चितितलविधिनेति—पातालयन्त्रेण । कोलं—तोलकम् ॥ २७—३१ ।

सार्वभौमरसमाह, जीर्णमित्यादि ।—अत्र शृङ्गाराभ्रे यदि स्वर्णं लौहं वा प्रदीयते तदाऽयं सार्वभौमः ॥ ३२ ॥

कासं पञ्चविधं श्वासं स्वराघातमरोचकम् ।
कामलां पाण्डुरोगञ्च प्लीहानं सहलीमकम् ॥ ३९ ॥
जीर्णज्वरं तृषां गुल्मं ग्रहणीमामसम्भवाम् ।
अतीसारञ्च शोथञ्च कुष्ठानि च भगन्दरम् ॥ ४० ॥
नाशयेदेष विख्यातस्तरुणानन्दसंज्ञितः ।
रसायनवरो वृष्यश्चक्षुष्यः पुष्टिवर्द्धनः ॥ ४१ ॥
सहस्रं याति नारीणां भक्षणादस्य मानवः ।
क्षीणता न च शुक्रस्य न च बुद्धिबलक्षयः ॥ ४२ ॥
द्विमाससमुपयोगेन निहन्ति सकलान् गदान् ।
शुक्रसन्दीपनं कृत्वा ज्वरं हन्ति न संशयः ॥ ४३ ॥
नारिकेलजलेनैव भक्ष्योऽयञ्च रसायनः ।
क्षीरानुपानात् वृष्योऽयं न क्वचित् प्रतिहन्यते ॥ ४४ ॥

महोदधिरसः ।—

सूतकं गन्धकं लौहं विषञ्चैव वराङ्गकम् ।
ताम्रकं वङ्गभस्मापि व्योमकञ्च समांशकम् ॥ ४५ ॥
त्रिकटु भद्रमुस्तञ्च विड़ङ्गं नागकेशरम् ।
रेणुकामलकञ्चैव पिप्पलीमूलमेव च ॥ ४६ ॥
एषाञ्च द्विगुणं भागं मर्दयित्वा प्रयत्नतः ।
भावना तत्र दातव्या गजपिप्पलिकाऽम्बुभिः ॥ ४७ ॥

तरुणानन्दरसे ।—गन्धकस्य कर्षद्वयम् ; विल्वादीनां स्वरसः प्रत्येकं कर्षांशः ॥ ३३—४४ ॥

महोदधिरसे ।—वराङ्गकं—गुड़त्वक् । व्योमकम्—अभ्रभस्म

मात्रा चणकतुल्या तु वटिकेयं प्रकीर्त्तिता ।
कासं हन्ति तथा श्वासमर्शांसि च भगन्दरम् ॥ ४८ ॥
हृच्छूलं पार्श्वशूलञ्च कर्णरोगं कपालिकाम् ।
हरेत् संग्रहणीरोगानष्टौ च जाठराणि च ।
प्रमेहान् विंशतिञ्चैव चतुर्विधमजीर्णकम् ॥ ४९ ॥
न चान्नपाने परिहार्य्यमस्ति न शीतवातातपमैथुनेषु ।
यथेष्टचेष्टाभिरतः प्रयोगे नरो भवेत् काञ्चनराशिगौरः ॥ ५० ॥

जयागुड़िका ।—

सूतकं गन्धको लौहं विषं वत्सकमेव च ।
विड़ङ्गं केशरं मुस्तमेलाग्रन्थिकरेणुकम् ॥ ५१ ॥
त्रिकटु त्रिफला चित्रं शुद्धं जैपालवीजकम् ।
एतानि समभागानि द्विगुणो गुड़ उच्यते ॥ ५२ ॥
तिन्तिड़ीवीजमानेन प्रातःकाले च भक्षयेत् ।
कासं श्वासं क्षयं गुल्मं प्रमेहं विषमज्वरम् ॥ ५३ ॥
अजीर्णं ग्रहणीरोगं शूलं पाण्डामयं जयेत् ।
अपाने हृदये शूले वातरोगे गलग्रहे ॥ ५४ ॥
अरुचावतिसारे च सूतिकाऽऽतङ्कपीड़िते ।
जयाऽऽख्या निर्मिता ह्येषा भक्षणीया सुरैरपि ॥ ५५ ॥

सूतादिव्योमान्तानां प्रत्येकमेकभागसमम् । त्रिकट्वादीनां प्रत्येकमेकभागापेक्षया द्विगुणम् । गजपिप्पलिकाऽम्बुभिः,—गजपिप्पलीक्वाथैः ॥ ४५—५० ॥

जयागुड़िकायाम् ।—वत्सकं—कुटजः, केशरं—नागकेशरं, ग्रन्थिकं

विजयागुड़िका :—

सूतकं गन्धको लौहं विषं चित्रकपत्रकम्।
विड़ङ्गरेणुकामुस्तमेलाकेशरग्रन्थिकम् ॥ ५६ ॥
फलत्रिकं त्रिकटुकं शुल्वभस्म तथैव च।
एतानि समभागानि द्विगुणो दीयते गुड़ः ॥ ५७ ॥
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे।
सूतायां ग्रहणीरोगे शूले पाण्ड्वामये तथा।
हस्तपादादिदाहे च गुड़िकेयं प्रशस्यते ॥ ५८ ॥

स्वच्छन्दभैरवो रसः।—

रसमेकं द्विधा गन्धं गन्धतुल्यञ्च सैन्धवम्।
ज्वालामुखीरसैः पञ्च दिनानि परिमर्दयेत् ॥ ५९ ॥
मूषकायां निरुध्याथ पुटेद्रात्रौ च मध्यमम्।
सर्वं भस्म यदा याति वल्लमेनं प्रयच्छति ॥ ६० ॥
ग्रहण्यां संग्रहण्याञ्च कासे श्वासे विशेषतः।
उग्रासु ज्वरतन्द्रासु निद्रास्वल्पासु योजयेत् ॥ ६१ ॥
अन्यरोगेषु तं दद्याद्रसं स्वच्छन्दभैरवम्।
तुष्टिं पुष्टिमसौ कुर्य्यात् सौकुमार्य्यञ्च कारयेत् ॥ ६२ ॥

— पिप्पलीमूलम्; मात्रा सम्यक् विविच्य प्रदेया। प्राञ्चस्तु सर्वतुल्यगुड़मिच्छन्ति ॥ ५१—५५ ॥

विजयागुड़िकायाम् ।—पत्रं—तेजपत्रं, केशरं—नागकेशरम्; ग्रन्थिकं—पिप्पलीमूलं, शुल्वभस्म—ताम्रभस्म ॥ ५६—५८ ॥

स्वच्छन्दभैरवे।—ज्वालामुखी—भल्लातकम् ॥ ५९—६२ ॥

रसगुड़िका ।—

रसभागो भवेदेको गन्धको द्विगुणो मतः ।
त्रिभागा पिप्पली, पथ्या चतुर्भागा, विभीतकः ॥ ६३ ॥
पञ्चभागः, त्वामला च षड्गुणा, सप्तभागिका ।
भार्गी, सर्वमिदं चूर्णं भाव्यं बब्बोलजैर्द्रवैः ॥ ६४ ॥
एकविंशतिवारञ्च मधुना गुड़िका कृता ।
विभीतकप्रमाणेन प्रातरेकान्तु भक्षयेत् ।
कासं श्वासं हरेत् क्षुद्रा-क्वाथं तदनु कृष्णया ॥ ६५ ॥

रसेन्द्रगुड़िका ।—

माक्षिकञ्च शिखिग्रीवमभ्रकं तालकं तथा ।
एतांस्तु मिलितान् सर्वान् भावयेदार्द्रकद्रवैः ॥ ६६ ॥
रक्तिद्वयप्रमाणान्तु कल्पयेत् गुड़िकां भिषक् ।
जीर्णान्ने भक्षयेदेकां क्षीरमांसरसाशनः ॥ ६७ ॥
पञ्च कासं क्षयं श्वासं रक्तपित्तं विनाशयेत् ।
पाण्डुक्रिमिज्वरहरी कृशानां पुष्टिवर्द्धनी ॥ ६८ ॥
शुक्रवृद्धिकरी चैषा अम्लपित्तविनाशिनी ।
वह्निसन्दीपनी श्रेष्ठा त्वरोचकविनाशिनी ॥ ६९ ॥

पुरन्दरवटी ।—

सूतकात् द्विगुणं गन्धमेकधा कज्जलीकृतम् ।
त्रिकटुत्रिफलाचूर्णं प्रत्येकं सूतसम्मितम् ॥ ७० ॥
अजाक्षीरेण संभाव्य वटिकां कारयेत् ततः ।
आर्द्रकस्य रसैः सेव्या शीततोयं पिबेदनु ॥ ७१ ॥

कासश्वासप्रशमनी विशेषादग्निवर्द्धनी ।
इयं यदि सदा सेव्या तदा स्याद् योगवाहिका ।
वृद्धोऽपि तरुणः शक्तः स्त्रीशतेषु वृषायते ॥ ७२ ॥

कासान्तको रसः ।—

सूतं गन्धो विषञ्चैव शालपर्णी च धान्यकम् ।
यावन्त्येतानि चूर्णानि तावन्मात्रं मरीचकम् ।
गुञ्जाचतुष्टयं खादेन्मधुना कासशान्तये ॥ ७३ ॥

कासकुठारः ।—

हिङ्गुलं मरिचं गन्धो सव्योषं टङ्कणं तथा ।
द्विगुञ्जञ्चार्द्रकद्रावैः सन्निपातं सुदारुणम् ।
कासं नानाविधं हन्ति शिरोरोगं विनाशयेत् ॥ ७४ ॥

चन्द्रामृतलौहम् । -

त्रिकटु त्रिफला धान्यं चव्यं जीरकसैन्धवम् ।
दिव्यौषधिहतस्यापि तत्तुल्यमयसो रजः ॥ ७५ ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाऽमृतेश्वरीम् ॥ ७६ ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसाप्लुताम् ।
नीलोत्पलरसेनैव कुलत्थस्वरसेन च ॥ ७७ ॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम् ॥ ७८ ॥

रसगुड़िकायाम् ।—बब्बोलं—"बावदूर" इति ख्यातः क्षुपविशेषः ।
विभीतकप्रमाणेन—कर्षमानेन ॥ ६३—७४ ॥

सरक्तमथ नीरक्तं ज्वरं श्वाससमन्वितम् ।
भ्रमतृड्दाहशूलघ्नं रुच्यं वह्निप्रदीपनम् ॥ ७९ ॥
बलवर्णकरं वृष्यं जीर्णज्वरविनाशनम् ।
इदं चन्द्रामृतं लौहं चन्द्रनाथेन निर्मितम् ॥ ८० ॥

चन्द्रामृतो रसः ।—

रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्गणस्य पलं दत्त्वा मरिचस्य पलार्द्धकम् ॥ ८१ ॥
त्रिकटु त्रिफला चव्यं धान्यजीरकसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥ ८२ ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाऽमृतेश्वरीम् ॥ ८३ ॥
एकैकां वटिकां खादेत् रक्तोत्पलरसेन च ।
नीलोत्पलरसेनापि कुलत्थस्वरसेन च ॥ ८४ ॥
छागीक्षीरेण मण्डेन केशराजरसेन च ।
निहन्ति विविधं कासं वातरक्तसमुद्भवम् ॥ ८५ ॥
वातश्लेष्मज्वरं कासं पित्तश्लेष्मज्वरं तथा ।
वातिकं पैत्तिकं वाऽपि गरदोषसमन्वितम् ॥ ८६ ॥
वासा गुडूचिका भार्गी मुस्तकं कण्टकारिका ।
समभागकृतं क्वाथं प्रत्यहं भक्षयेदनु ॥ ८७ ॥

अमृतमञ्जरी ।—

हिङ्गुलञ्च विषञ्चैव कणा मरिचटङ्गणम् ।
जातीकोषं समं सर्वं जम्बीररसमर्दितम् ॥ ८८ ॥

रक्तिमानां वटीं कुर्य्यादार्द्रकद्रवसंयुताम्।
वटीद्वयं त्र्यं खादेत् सन्निपातं सुदारुणम् ॥ ८९ ॥
अग्निमान्द्यमजीर्णञ्च सामवातं सुदारुणम्।
उष्णतोयानुपानेन सर्वं व्याधिं नियच्छति ॥ ९० ॥
कासं पञ्चविधं श्वासं सर्वाङ्गग्रहमेव च।
जीर्णज्वरं क्षयं कासं हन्यादमृतमञ्जरी ॥ ९१ ॥

कासान्तकः।—

त्रिफला व्योषचूर्णञ्च समभागं प्रकल्पयेत्।
मधुना सह पानात्तु दुष्टकासं नियच्छति ॥ ९२ ॥

वृहच्छृङ्गाराभ्रम्।—

पारदं गन्धकञ्चैव टङ्कणं नागकेशरम्।
जातीकोषञ्च कर्पूरं लवङ्गं तेजपत्रकम् ॥ ९३ ॥
सुवर्णञ्चापि प्रत्येकं कर्षमात्रं प्रकल्पयेत्।
शुद्धकृष्णाभ्रचूर्णन्तु चतुष्कर्षं प्रयोजयेत् ॥ ९४ ॥
तालीशं घनकुष्ठञ्च मांसी त्वक् धातकी तथा।
एलाबीजं त्रिकटुकं त्रिफला करिपिप्पली ॥ ९५ ॥
कर्षद्वयन्तु चैतेषां पिप्पलीक्वाथमर्दितम्।
अनुपानं प्रयोक्तव्यं चोचं क्षौद्रसमायुतम् ॥ ९६ ॥
अग्निमान्द्यादिकान् रोगानरुचिं पाण्डुकामलाम्।
उदराणि तथा शोथमानाहं ज्वरमेव च ॥ ९७ ॥

चन्द्रामृतलौहे।—"दिव्यौषधिहतस्यापि तत्तुल्यमयसो रजः" इति।—मनःशिलया हतस्य लौहचूर्णस्य सर्वचूर्णसमत्वं ज्ञेयम् ॥ ७५—९२ ॥

ग्रहणीं श्वासकासञ्च हन्याद् यक्ष्माणमेव च ।
नानारोगप्रशमनं बलवर्णाग्निकारकम् ॥ ९८ ॥
बृहच्छृङ्गाराभ्रनाम विष्णुना परिकीर्त्तितम् ।
एतस्याभ्यासमात्रेण निर्व्याधिर्जायते नरः ॥ ९९ ॥

भृङ्गराजगुड़िका ।—

भृङ्गराजस्य पत्रन्तु चूर्णितं मधुना सह ।
गोलकं धारयेदास्ये कासारिष्टप्रशान्तये ॥ १०० ॥

[इति कास-चिकित्सा] ।

अथ हिक्का-श्वास-चिकित्सा ।—

—०*०—

सूर्य्यावर्त्तो रसः ।—

गन्धकं सूतकं मर्द्यं यामैकं कन्यकाद्रवैः ।
द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् ॥ १ ॥
दिनैकं हण्डिकायन्त्रे पचेच्छीतं समुद्धरेत् ।
सूर्य्यावर्त्तरसो नाम द्विगुञ्जः श्वासकासनुत् ॥ २ ॥

बृहच्छृङ्गाराभ्रे ।—सुवर्ण—धुस्तूरवीजं, स्वर्णमित्येके । घनः,—मुस्तकं, धातकी—धातकीपुष्पिका, करिपिप्पली—गजपिप्पली, चोच—गुड़त्वक् ॥ ९३—१०० ॥

इति कासाधिकारः ।

तुल्यनिदानत्वात् कासानन्तरं हिक्काश्वासचिकित्सामाह ।—सूर्य्या-

इन्द्रवारुणिकादिचूर्णम् ।—

इन्द्रवारुणिकामूलं देवदारु कटुत्रयम् ।
शर्करासहितं खादेदूर्द्ध्वश्वासनिवृत्तये ॥ ३ ॥

विजयवटी ।—

गन्धकं सूतकं लौहं विषमभ्रकमेव च ।
विड़ङ्गं रेणुकं मुस्तमेला ग्रन्थिक-केशरम् ॥ ४ ॥
त्रिकटु त्रिफला ताम्रं शुद्धं जैपालचित्रकम् ।
एतानि समभागानि द्विगुणो दीयते गुड़ः ॥ ५ ॥
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ।
सूतायां ग्रहणीदोषे शूले पाण्डामये तथा ।
हस्तपादादिदाहेषु वटिकेयं प्रशस्यते ॥ ६ ॥

वासकप्रयोगः ।—

घृतेन पाचयेत् मूलं पत्रञ्च वासकस्य च ।
भक्षयेत् प्रातरुत्थाय कासे श्वासे क्षये तथा ॥ ७ ॥

देवदार्वादिचूर्णम् ।—

देवदारु पिप्पली च शुण्ठीचूर्णं समं तथा ।
ऊर्द्ध्वश्वासं सदा हन्ति पिबेदुष्णजलेन च ॥ ८ ॥

लौहपर्पटी रसः ।—

भागौ रसस्य गन्धस्य द्वावेकौ लौहभस्मतः ।
एतद् घृष्टं द्रवीभूतं मृद्वग्नौ कदलीदले ॥ ९ ॥

वर्त्तरसे ।—"सूताद्वं गन्धकम्" इति केचित् । पूर्ववत्कल्केनेति ।—पूर्वोक्त-रसगन्धककल्केन । इन्द्रवारुणीमूलादीनां चूर्णं यथाबलं लेह्यम् ॥१—८॥

पातयेद् गोमयगतं तथैवोपरि योजयेत् ।
ततः पिष्ट्वा द्रवैरेभिः सप्तधा भावयेत् पृथक् ॥ १० ॥
भार्गी-मुण्डी-मुनि-वरा जया निर्गुण्डिका तथा ।
व्योषवासककन्याऽऽर्द्र-द्रवैस्तस्मात् पुटे पचेत् ॥ ११ ॥
आगन्धं खर्परे ताम्रे पर्पट्याख्यो रसो भवेत् ।
सर्वरोगहरस्तैस्तैरनुपानैर्हि माषकैः ॥ १२ ॥
ताम्बूलीपत्रसहितः श्वासकासहरः परः ।
सकणः सुरसाक्वाथोऽनुपानं वासकाज्जलम् ॥ १३ ॥
अम्लिकातैलवार्त्ताकु-कुष्माण्डं कदलीफलम् ।
वर्ज्यं मांसरसं सर्वं पथ्यं दद्यात् विचक्षणः ।
वर्जयेच्च विशेषेण कफकृत् स्त्रीसुखादिकम् ॥ १४ ॥

ताम्रपर्पटी ।—

लौहस्थाने ताम्रयोगात् ताम्रपर्पटिका भवेत् ॥ १५ ॥

पिप्पल्याद्यं लौहम् ।—

पिप्पल्यामलकी द्राक्षा कोलास्थि मधु शर्करा ।
विड़ङ्गपुष्करैर्युक्तं लौहं हन्ति सुदारुणाम् ।
छर्दिं हिक्कां तथा तृष्णां चिरात्तेण न संशयः ॥ १६ ॥

लौहपर्पटीरसे ।—रसस्य द्वौ भागौ, गन्धकस्य च द्वौ भागौ, लौह-भस्मतश्चैको भागः, एतत् सर्वमेकीकृत्य रसपर्पटीवत् पचेत्; ततः भार्ग्यादिद्रवैः प्रत्येकशः सप्तधा मर्दयेत्, तदनन्तरं ताम्रभाजने कृत्वा आगन्धं प्रपुटेत् ॥ ९—१५ ॥

पिप्पल्यादिलौहे ।—कोलास्थि- बदरास्थिमज्जा, मधु—यष्टीमधु,

श्वासकुठारः।—

टङ्कणं पारदं गन्धं शिलां विषं कटुत्रिकम्।
निष्पिष्य वटिका कार्य्या बाणगुञ्जाप्रमाणतः॥ १७॥
उष्णादकं पिबेच्चानु क्षुद्राक्काथमथापि वा।
कासं पञ्चविधं हन्ति श्वासं श्लेष्मसमुद्भवम्।
शिरोरोगं निहन्त्याशु वृक्षमिन्द्राशनिर्यथा॥ १८॥

श्वासकासचिन्तामणिः।—

पारदं माक्षिकं स्वर्णं समांशं परिकल्पयेत्।
पारदार्द्धं मौक्तिकञ्च सूताद् द्विगुणगन्धकम्॥ १९॥
अभ्रञ्चैव तथा योज्यं व्योम्नो द्विगुणलौहकम्।
कण्टकारीरसेनैव छागोदुग्धेन च पृथक्॥ २०॥
यष्टीमधुरसेनैव पर्णपत्ररसेन च।
भावयेत् सप्तवारञ्च द्विगुञ्जां वटिकां भजेत्।
पिप्पलीमधुसंयुक्तां श्वासकासविमर्दिनीम्॥ २१॥

श्वासकुठारो रसः।—

रसं गन्धो विषं टङ्कं शिलोषणकटुत्रयम्।
सर्वं संमर्द्य दातव्यो रसः श्वासकुठारकः।
वातश्लेष्मसमुद्भूतं श्वासं कासं क्षयं जयेत्॥ २२॥

पुष्करं—पुष्करमूलम्। "लिरालेश" इत्यत्र "लिवारेश" इति अन्यत्र पठ्यते॥ १६॥

श्वासकुठारे।—विषं—गरलं, क्षुद्राक्काथं—कण्टकारीक्काथम्॥ १७—२१॥

अन्यः श्वासकुठारो रसः ।

रसं गन्धो विषञ्चैव टङ्कणं समनःशिलम् ।
एतानि समभागानि मरिचं तच्चतुर्गुणम् ॥ २३ ॥
त्रिभागं त्र्यूषणं ज्ञेयं खल्ले सर्वं विचूर्णयेत् ।
रसः श्वासकुठारोऽयं द्विगुञ्जः श्वासकासजित् ॥ २४ ॥
गता संज्ञा यदा पुंसां तदा नस्यं प्रदापयेत् ।
घ्रापयेन्नासिकारन्ध्रे संज्ञाजननमुत्तमम् ॥ २५ ॥
प्रतिश्यायं चतच्चीणमेकादशविधं चयम् ।
हृद्रोगं श्वासशूलञ्च स्वरभेदं सुदारुणम् ।
सन्निपातं तथा घोरं तन्द्रामोहान्वितं जयेत् ॥ २६ ॥

[इति हिक्का-श्वास-चिकित्सा] ।

श्वासकुठाररसे ।—शिला—मनःशिला, ऊषणं—मरिचम् ॥ २२ ॥

अन्यः श्वासकुठाररसे ।—"मरिचं तच्चतुर्गुणम्" इति ।—एकभागापेक्षया चतुर्गुणम् ॥ २३—२६ ॥

इति हिक्का-श्वासाधिकारः ।

अथ स्वरभेद-चिकित्सा ।—

—००✽००

भैरवो रसः ।—

रसं गन्धं विषं टङ्कं मरिचं चव्यचित्रकम् ।
आर्द्रकस्य रसेनैव संमर्द्य वटिकां ततः ॥ १ ॥
गुञ्जात्रयप्रमाणेन खादेत् तोयानुपानतः ।
स्वरभेदं निहन्त्याशु श्वासं कासं सुदुस्तरम् ॥ २ ॥

चव्यादिचूर्णम् ।—

चव्याम्लवेतसकटुत्रयतिन्तिड़ीक-
तालीशजीरकतुगादहनैः समांशैः ।
चूर्णं गुड़प्रमृदितं त्रिसुगन्धियुक्तं
वैस्वर्य्यपीनस-कफारुचिषु प्रशस्तम् ॥ ३ ॥
अनेनैवानुपानेन भस्मसूतं प्रयोजयेत् ।
योगवाहिरसञ्चापि योजयन्ति भिषग्वराः ॥ ४ ॥

शुण्ठीशर्करा ।—

सशर्करं शुण्ठीचूर्णं क्षौद्रेण सह योजितम् ।
कोकिलस्वर एव स्याद् गुड़िकाभुक्तमात्रतः ॥ ५ ॥

[इति स्वरभेद-चिकित्सा] ।

प्राणोदानदुष्टिसाधर्म्यात् हिक्काश्वासानन्तरं स्वरभेदचिकित्सामाह,

अथ अरोचक-चिकित्सा ।—

—०*०—

सुधानिधिरसः ।—

रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन भावयेत् ।
जम्बीरस्य रसेनैव आर्द्रकस्य रसेन च ॥ १ ॥
मातुलुङ्गस्य तोयेन तथा मज्जरसेन च ।
पश्चाद्विशोष्य सर्वांशं टङ्कणञ्चावचारयेत् ॥ २ ॥
देवपुष्पं बाणमितं रसपादं मृतामृतम् ।
माषमात्रञ्च तत्सर्वं नागरेण गुड़ेन वा ॥ ३ ॥
सर्वारोचकशूलार्त्तिं सामवातं सुदारुणम् ।
विसूचीञ्चाग्निमान्द्यञ्च भक्तद्वेषञ्च दारुणम् ।
रसोऽयं वारयत्याशु केशरी करिणं यथा ॥ ४ ॥

—रसमित्यादि । चव्यादिचूर्णं ।—तिन्तिड़ीकं—महार्द्रकं, तुगा—वंशलोचना । दहनः,—चित्रकः, गुड़मिति—सर्वचूर्णसमम् ॥ १—५ ॥

इति स्वरभेदाधिकारः ।

अरोचकस्यापि ऊर्द्धगविकारत्वेन स्वरभेदानन्तरमरोचकमाह । सुधानिधिरसे ।—सर्वचूर्णसमं टङ्कणचूर्णम् । देवपुष्पं—लवङ्गं, मृतामृतमिति—शोधितविषम् । "नागरेण" इत्यत्र "नागवल्ला" इति पाठान्तरम् । भक्तद्वेषम्—अरोचकम ॥ १—४ ॥

सुलोचनाभ्रम्।—

पलं सुजीर्णं गगनन्तु वज्रकं तेजोवतीकोलमुशीरदाड़िमम्।
धात्र्यम्लरोलीरुचकं पृथग्दश-पलोन्मितं मर्दितमेव सेवितम् ॥५॥
अरोचकं वातकफत्रिदोषजं पित्तोद्भवं गन्धसमुद्भवं नृणाम्।
कासं स्वराघातमुरोग्रहं रुजं श्वासं बलासञ्च यकृत् भगन्दरम् ॥६॥
प्लीहाग्निमान्द्यं श्वयथुं समीरणं मेहं भृशं कुष्ठमसृग्दरं कृमिम्।
शूलाम्लपित्तक्षयरोगमुद्धतं सरक्तपित्तं वमिदाहमश्मरीम्।
निहन्ति चार्शांसि सुलोचनाभ्रकं बलप्रदं वृष्यतमं रसायनम् ॥७॥

शुद्धसूतयोगः।—

ससूतमरुचिघ्नं स्यात् तिन्तिड़ीकगुड़ौषणम्।
मृद्वीका जीरकं कृष्णा मातुलुङ्गाम्लवेतसम् ॥ ८ ॥

[इत्यरोचक-चिकित्सा]।

सुलोचनाभ्रे।—सुजीर्णं गगनं—भस्माभ्रं, तेजोवती—चवी, कोलं—बदरफलमज्जा, रुचकं—"छोलङ्ग" इति ख्यातम् ॥ ५—७ ॥

शुद्धसूतयोगे।—ससूतमित्यादौ।—तिन्तिड़ीकं—पक्वतिन्तिड़ीफलम् ॥ ८ ॥

इति अरोचकाधिकारः।

अथ छर्दिरोग-चिकित्सा ।—

—०*०—

छर्दिसंहारो रसः ।—

अजाजीधान्यपथ्याभिः सक्षुद्राभिः कटुत्रिकैः ।
एभिः सार्द्धं भस्मसूतः सेव्यो वान्तिप्रशान्तये ॥ १ ॥

चन्दनादिचूर्णं गुडूचीप्रयोगश्च ।—

चन्दनं मधुकं क्षीरं पीतं रुधिरवान्तिजित् ।
पिबेद्वान्तिप्रशान्त्यर्थं क्षौद्रैश्छिन्नरुहारसम् ॥ २ ॥

[इति छर्दि-चिकित्सा] ।

———

अथ तृष्णारोग-चिकित्सा ।—

—०*०—

महोदधिरसः ।—

ताम्रचक्रिकया वङ्गं सूतं तालं सतुत्थकम् ।
वटाङ्कुररसैर्भाव्यं तृष्णाहृत् वल्लमात्रतः ॥ १ ॥

अरोचकवत् पञ्चविधत्वात् तथा छर्द्यामयेऽपि अरुचेः सम्भवात् अरोचकानन्तरं छर्दिचिकित्सितमुच्यते ।—छर्दिसंहाररसे ।—अजाजी—जीरकं, पथ्या—हरीतकी, भस्मसूतः,—रससिन्दूरम् । हिक्काऽधिकारोक्तं पिप्पल्यादिलौहं विधेयमत्र ॥ १।२ ॥

इति छर्दिचिकित्सा ।

———

आम्रादिक्वाथः ।—

सक्षौद्रमाम्रजम्बूत्थं पिबेत् क्वाथं पलोन्मितम् ।
सकृष्णामधुना कुर्य्यात् गण्डूषं शीतले स्थितः ॥ २ ॥

कुमुदेश्वरो रसः ।—

मृततास्त्रस्य भागौ द्वौ भागैकं वङ्गभस्मकम् ।
यष्टीमधुरसैर्भाव्यं शुष्कं माषार्द्धकं शुभम् ।
सेवयेच्चानुपानेन वक्ष्यमाणेन बुद्धिमान् ॥ ३ ॥
चन्दनं शारिवां मुस्तं क्षुद्रैलां नागकेशरम् ।
सर्वतुल्यां तथा लाजां पचेत् षोड़शिकैर्जलैः ॥ ४ ॥
अर्द्धशेषं हरेत् क्वाथं सिताक्षौद्रयुतन्तु तत् ।
छर्दिं तृष्णां निहन्त्याशु रसोऽयं कुमुदेश्वरः ॥ ५ ॥

[इति तृष्णा-चिकित्सा] ।

अथ मूर्च्छारोग-चिकित्सा ।—

—-०**—

सूतभस्मप्रयोगः ।—

कणामधुयुतं सूतं मूर्च्छायामनुशीलयेत् ।
शीतसेकावगाहादि सर्वं वा शीतलं भजेत् ॥ १ ॥

छर्दैस्तृष्णोपद्रवत्वात् छर्द्यनन्तरं तृष्णाचिकित्सामाह । कुमुदेश्वररसे । —यष्टीमधुरसैः,—यष्टीमधुक्वाथैः । चन्दनमित्यादौ ।—शारिवा—अनन्त-मूलं, चुद्रैला—गुजराटीति ख्याता ॥ १—५ ॥

इति तृष्णाधिकारः ।

सुधानिधिरसस्य प्रयोगातिदेशः ।—

सुधानिधिरसो नाम मदमूर्च्छाविनाशनः ॥ २ ॥

[इति मूर्च्छा-चिकित्सा] ।

अथ मदात्यय-चिकित्सा ।—

—०✻०—

मदात्ययभञ्जनो रसः ।—

सचव्यहिङ्गुरुचकं धन्याकं विश्वदीप्यकम् ।
चूर्णंससूतं मद्येन पीतं पानात्ययं जयेत् ॥ १ ॥

अष्टाङ्गलवणम् ।—

सौवर्चलमजाज्यश्च वृक्षाम्लं साम्लवेतसम् ।
त्वगेला मरिचार्द्धांशं शर्करामधुयोजितम् ॥ २ ॥

तृष्णायां मोहो भवतीत्यनन्तरं मोहचिकित्सामाह,—कणेत्यादि । सूतमिति—सूतभस्म, रससिन्दूरमित्यर्थः । सुधानिधिरसः अरोचकाधिकारोक्तः ॥ १।२ ॥

इति मूर्च्छाऽधिकारः ।

मूर्च्छावत् मदात्ययस्यापि मद्यजन्यत्वात् मूर्च्छाऽनन्तरं मदात्ययचिकित्सामाह.—सचव्येत्यादि। मदात्ययभञ्जनरसे।—रुचकं—सौवर्चललवणं, दीप्यकं—यमानी, सूतं—भस्मसूतम् ॥ १ ॥

हितं लवणमष्टाङ्गमग्निसन्दीपनं परम् ।
मदात्यये कफप्राये दद्यात् स्रोतोविशोधनम् ॥ ३ ॥

[इति मदात्यय-चिकित्सा] ।

अथ दाह-चिकित्सा ।—

दाहान्तको रसः ।—

सूतात् पञ्चार्कतस्त्वेकं कृत्वा पिण्डं सुशोभनम् ।
जम्बीरस्वरसैर्मर्द्यं सूततुल्यञ्च गन्धकम् ॥ १ ॥
नागवल्लीदलैः पिष्ट्वा ताम्रपत्रीं प्रलेपयेत् ।
प्रपुटेद् भूधरे यन्त्रे यावद् भस्मत्वमाप्नुयात् ॥ २ ॥
द्विगुञ्जमार्द्रकद्रावैस्त्र्यूषणेन च योजयेत् ।
निहन्ति दाहसन्तापं मूर्च्छां पित्तसमुद्भवाम् ॥ ३ ॥

[इति दाह-चिकित्सा] ।

अष्टाङ्गलवणे सौवर्चलेत्यादौ ।—अजाजी—जीरकं, वृक्षाम्लं—महाद्रैकम् ॥ २।३ ॥

इति मदात्ययाधिकारः ।

मदात्ययेऽपि दाहो भवति, अतः मदात्ययानन्तरं दाहचिकित्सामाह—सूतादित्यादि । दाहान्तकरसे ।—अर्कः,—ताम्रम् । प्रथमं

अथोन्मादरोग-चिकित्सा ।—

—०*०—

उन्मादगजाङ्कुशो रसः ।—

त्रिदिनं कनकद्रावैर्महाराष्ट्रीद्रवैः पुनः ।
विषमुष्टिजलैः सूतं समुत्थाप्यार्कचक्रिकाम् ॥ १ ॥
कृत्वा तप्तां सगन्धां तां युक्त्या बन्धनमाचरेत् ।
तत्समं कानकं बीजमभ्रकं गन्धकं विषम् ॥ २ ॥
मर्दयेत् त्रिदिनं सर्वं वल्लमात्रं प्रयोजयेत् ।
दोषोन्मादं द्रुतं हन्ति भूतोन्मादं विशेषतः ॥ ३ ॥

सूतगन्धकाभ्यां कज्जलीं कृत्वा जम्बीररसेन भावयेत्, पश्चात् तामेव कज्जलीं ताम्बूलरसेन मेलयेत्; तया च तरलीभूतया कज्जल्या ताम्रपत्रं प्रलिप्य भूधरयन्त्रे पचेत्। सम्यक् भस्मीभूतञ्च तत्ताम्रं यथोक्तमात्रं त्रिकटुचूर्णेन आर्द्रकरसेन च सह सेवेत ॥ १—३ ॥

इति दाहाधिकारः ।

मदात्ययस्य उन्मादसदृशत्वेन तथा पूर्वोक्तरीत्या च यद्यपि मदात्ययानन्तरम् उन्माददाहावेव वक्तुमुचितौ, तथापि सूचीकटाहन्यायेन दाहमभिधाय उन्मादचिकित्सामाह। उन्मादगजाङ्कुशे त्रिदिनमित्यादौ ।—महाराष्ट्री—ब्रह्मयष्टिः इत्यर्थः, विषमुष्टिः,—कुचिलेति ख्याता। अर्कचक्रिकां—ताम्रचक्रिकाम् ॥ १—३ ॥

भूताङ्कुशो रसः।—

सूतायस्ताम्रमभ्रञ्च मुक्तां चापि समं समम्।
सूतपादोत्तमं वज्रं शिलागन्धकतालकम्॥ ४॥
तुत्थं रसाञ्जनं शुद्धमब्धिफेनं शिलाञ्जनम्।
पञ्चानां लवणानाञ्च प्रतिभागं रसोन्मितम्॥ ५॥
भृङ्गराजचित्रवह्नि-दुग्धेनापि विमर्दयेत्।
दिनान्ते पिण्डिकां कृत्वा रुद्ध्वा गजपुटे पचेत्॥ ६॥
भूताङ्कुशरसो नाम नित्यं गुञ्जाद्वयं लिहेत्।
आर्द्रकस्य रसेनापि भूतोन्मादनिवारणम्॥ ७॥
पिप्पल्याक्तं पिबेच्चानु दशमूलकषायकम्।
स्वेदयेत् कटुतुम्ब्या च तीक्ष्णं रूक्षञ्च वर्जयेत्॥ ८॥
माहिषञ्च घृतं क्षीरं गुर्वन्नमपि भक्षयेत्।
अभ्यङ्गः कटुतैलेन हितो भूताङ्कुशे रसे॥ ९॥

उन्मादभञ्जिनी।—

शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी।
वचा शिरीषवीजञ्च हिङ्गु च श्वेतसर्षपः॥ १०॥
करञ्जवीजं त्रिकटु मलं पारावतस्य च।
एतानि समभागानि गोमूत्रैर्वटिकां कुरु॥ ११॥

भूताङ्कुशरसे।—"सूतायस्ताम्रमभ्रञ्च" इत्यत्र "सूतायस्तारताम्रञ्च" इति पाठान्तरम्। "समं समम्" इति प्रत्येकम् एकैकभागम्; वज्रं—हीरकं, तच्च सूतभागापेक्षया पादिकम्। शिलादि प्रत्येकं भागैकम्॥ ४—९॥

गिरिमल्लीवीजसमां छायाशुष्काश्च कारयेत् ।
प्रातःसन्ध्यानिशाकाले चक्षुषोरञ्जनं हितम् ॥ १२ ॥
मधुरादिरसेनाञ्जंर रात्रावपि जलेन च ।
वटिकैका समाख्याता नाम्ना चोन्मादभञ्जिनी ।
चातुर्थकमपस्मारमथोन्मादं विनाशयेत् ॥ १३ ॥

त्रिकत्रयादिलौहम् ।—

त्रिकत्रयसमायुक्तं जीवनीययुतं त्वयः ।
हन्त्यपस्मारमुन्मादं वातव्याधिं सुदुस्तरम् ॥ १४ ॥

उन्मादभञ्जनी रसः ;—

त्रिकटु त्रिफला चैव गजपिप्पलिका तथा ।
देवदारु विडङ्गञ्च किरातः कटुकी तथा ॥ १५ ॥
कण्टकारी च यष्टीन्द्र-यवं चित्रकमेव च ।
बला च पिप्पलीमूलं मूलञ्च वीरणस्य च ॥ १६ ॥
शोभाञ्जनस्य वीजानि त्रिवृता चेन्द्रवारुणी ।
वङ्गं रूप्यकमभ्रञ्च प्रवालं समभागिकम् ॥ १७ ॥
सर्वचूर्णसमं लौहं सलिलेन विमर्दयेत् ।
उन्मादमपि भूतोत्थमुन्मादं वातजं तथा ॥ १८ ॥

उन्मादभञ्जिन्याम् ।—कटुरोहिणी—कटुकी, गिरिमल्लीवीजं—कुटजवीजम् ॥ १०—१३ ॥

त्रिकत्रयादिलौहे ।—त्रिकत्रयं—त्रिकटु, त्रिफला, त्रिमदः । जीवनीयगणस्तु,—"जीवकर्षभकौ मेदा महामेदा काकोली क्षीरकाकोली मुद्गमाषपर्ण्यौ जीवन्ती मधुकम्" इति दशेमानि जीवनीयानि भवन्तीति चरकः ॥ १४ ॥

अपस्मारं तथा कार्श्यं रक्तपित्तं सुदारुणम्।
नाशयेदविकल्पेन रसश्चोन्मादभञ्जनः॥ १९॥

चतुर्भुजरसः।—

मृतसूतस्य भागौ द्वौ भागैकं हेमभस्मकम्।
शिला कस्तूरिका तालं प्रत्येकं हेमतुल्यकम्॥ २०॥
सर्वं खल्लतले क्षिप्त्वा कन्यया मर्दयेद्दिनम्।
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम्॥ २१॥
संस्थाप्य च तदुद्धृत्य सर्वरोगेषु योजयेत्।
एतद्रसायनवरं त्रिफलामधुमर्दितम्॥ २२॥
तद् यथाऽग्निबलं खादेत् वलीपलितनाशनम्।
अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये॥ २३॥
हस्तकम्पे शिरःकम्पे गात्रकम्पे विशेषतः।
वातपित्तसमुत्थांश्च कफजान् नाशयेद् ध्रुवम्॥ २४॥
सर्वौषधिप्रयोगैर्ये व्याधयो न प्रसाधिताः।
कर्मभिः पञ्चभिश्चैव मन्त्रौषधिप्रयोगतः॥ २५॥
सर्वांस्तान् नाशयत्याशु वृत्रमिन्द्राशनिर्यथा।
चतुर्भुजरसो नाम महेशेन प्रकाशितः॥ २६॥

उन्मादे कनकबीजप्रयोगः।—

कृष्णधुस्तूरजैर्बीजैः पञ्चभिः पर्पटीरसः।
सम्प्रयोज्यः प्रशमयेदुन्मादं भूतसम्भवम्॥ २७॥

[इत्युन्माद-चिकित्सा]।

उन्मादभञ्जनरसे।—किरातः,—भूनिम्बम्, इन्द्रवारुणी—गोरक्षकर्कटी॥ १५—२६॥

अथापस्माररोग-चिकित्सा ।—

भूतभैरवो रसः ।—

मृतसूतार्कलौहञ्च शिलागन्धकतालकम् ।
रसाञ्जनञ्च तुल्यांशं नरमूत्रेण मर्दयेत् ॥ १ ॥
तद्गोलं द्विगुणं गन्धं लौहपात्रे क्षणं पचेत् ।
पञ्चगुञ्जामितं खादेदपस्मारहरं परम् ॥ २ ॥
हिङ्गु सौवर्चलं व्योषं नरमूत्रेण सर्पिषा ।
कर्षमात्रं पिबेच्चानु रसोऽयं भूतभैरवः ॥ ३ ॥

सूतभस्मप्रयोगः ।—

शङ्खपुष्पी वचा ब्राह्मी कुष्ठमेलारसैः सह ।
सूतभस्मप्रयोगोऽयं रक्तिकाद्वयमानतः ।
सर्वापस्मारनाशाय महादेवेन भाषितः ॥ ४ ॥

कनकबीजप्रयोगे ।—पर्पटीरस इति—श्वेतपर्पटीरसः ॥ १७ ॥

इत्युन्मादाधिकारः ।

तुल्यचिकित्सितत्वात् उन्मादानन्तरम् अपस्मारचिकित्सामाह,—मृतेत्यादि । भूतभैरवरसे ।—हिङ्ग्वादि सर्वमनुपानं ज्ञेयम् ॥ १—४ ॥

इन्द्रब्रह्मवटी।—

मृतसूताभ्रकं तीक्ष्णं तारं ताप्यं विषं समम्।
पद्मकेशरसंयुक्तं दिनैकं मर्दयेत् द्रवैः॥ ५॥
स्नुह्यग्निविजयैरण्ड-वचानिष्पावशूरणैः।
निर्गुण्ड्याश्च द्रवैर्मर्द्यं तद्गोलं पाचयेत् पुनः॥ ६॥
कङ्गुनीसर्षपोत्थेन तैलेन गन्धसंयुतम्।
ततः पक्वा समुद्धृत्य चणमात्रा वटी कृता॥ ७॥
इन्द्रब्रह्मवटीनाम भक्षयेदार्द्रकद्रवैः।
दशमूलकषायञ्च कणायुक्तं पिबेदनु।
अपस्मारं जयत्याशु यथा सूर्य्योदयः तमः॥ ८॥

वातकुलान्तकः।—

मृगनाभिः शिवा नाग-केशरं कलिवृक्षजम्।
पारदः गन्धको जाती-फलमेला लवङ्गकम्॥ ९॥
प्रत्येकं कार्षिकञ्चैव श्लक्ष्णचूर्णानि कारयेत्।
जलेन मर्दयित्वा तु वटीं कुर्य्यात् द्विरक्तिकाम्।
यथाव्याध्यनुपानेन योजयेच्च चिकित्सकः॥ १०॥
अपस्मारे महाघोरे मूर्च्छारोगे च शस्यते।
वातजान् सर्वरोगांश्च हन्यादचिरसेवनात्॥ ११॥
नातः परतरं श्रेष्ठमपस्मारेषु वर्त्तते।
ब्रह्मणा निर्मितः पूर्वं नाम्ना वातकुलान्तकः॥ १२॥

[इति अपस्मार-चिकित्सा]।

इन्द्रब्रह्मवटिकायाम्।—तारं—रौप्यम्। ताप्यं—स्वर्णमाक्षिकम्।
कङ्गुनी—प्रियङ्गुः॥ ५—८॥

अथ वातव्याधि-चिकित्सा ।—

—०*०—

द्विगुणाख्यो रसः ।—

गन्धकात् द्विगुणं सूतं शुद्धं मृद्वग्निना चणम् ।
पश्चाऽवतार्य्य सञ्चूर्ण्य चैतत् तुल्याभयाऽन्वितम् ॥ १ ॥
सप्तगुञ्जामितं खादेत् वर्द्धयेच्च दिने दिने ।
गुञ्जैकैकक्रमेणैव यावत् स्यादेकविंशतिः ॥ २ ॥
क्षीराज्यशर्कराभिश्च शाल्यन्नं पथ्यमाचरेत् ।
कम्पवातप्रशान्त्यर्थं निर्वाते निवसेत् सदा ।
द्विगुणाख्यरसो नाम त्रिपक्षात् कम्पवातजित् ॥ ३ ॥

वातगजाङ्कुशः ।—

मृतं सूतं मृतं लौहं ताप्यं गन्धकतालकम् ।
पथ्या शृङ्गी विषं व्योषमग्निमन्थञ्च टङ्कणम् ॥ ४ ॥
तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिकाद्रवैः ।
द्विगुञ्जां वटिकां खादेत् सर्ववातप्रशान्तये ॥ ५ ॥

वातकुलान्तके ।—मृगनाभिः,—कस्तूरिका, शिवा—हरीतकी । कलिद्रुमजं—विभीतकफलम् ॥ ९—१२ ॥

इति अपस्माराधिकारः ।

अपस्मारवत् वातविकाराणामाक्षेपकादीनां वेगकर्तृकत्वात् तथा प्रायस्तुल्यचिकित्सितत्वाच्च अपस्मारानन्तरं वातव्याधिचिकित्सामाह । द्विगुणाख्ये रसे ।—तुल्याभया इति—अत्र रसगन्धकयोस्तुल्या हरीतकीत्यर्थः ॥ १—३ ॥

कणाचूर्णयुतश्चैव जिङ्गीक्काथं पिबेदनु।
साध्यासाध्यं निहन्त्याशु रसो वातगजाङ्कुशः ॥ ६ ॥
सप्ताहाद् गृध्रसीं हन्ति दारुणं सान्निपातिकम्।
क्रोष्टुशीर्षकवातञ्चाप्यवबाहुकसंज्ञकम् ॥ ७ ॥
ऊरुस्तम्भं हनुस्तम्भं मन्यास्तम्भं विनाशयेत्।
पक्षाघातादिरोगेषु कथितः परमोत्तमः ॥ ८ ॥

औषधान्तरप्रयोगोपदेशः।—

रसोऽम्बुशोषणो ह्यत्र युक्तोऽन्यो योगवाहिकः ॥ ९ ॥

बृहद्वातगजाङ्कुशः।

सूताभ्रतीक्ष्णकान्तानि ताम्रतालकगन्धकम्।
स्वर्णं शुण्ठी बला धान्यं कट्फलञ्चाभया विषम् ॥ १० ॥
पथ्या शृङ्गी पिप्पली च मरिचं टङ्कणं तथा।
तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिजैर्द्रवैः ॥ ११ ॥
द्विगुञ्जां वटिकां खादेत् सर्ववातप्रशान्तये।
साध्यासाध्यं निहन्त्याशु बृहद्वातगजाङ्कुशः ॥ १२ ॥

महावातगजाङ्कुशः।—

मृताभ्रतीक्ष्णताम्रञ्च सूततालकगन्धकम्।
भार्गी शुण्ठी बला धान्यं कट्फलञ्चाभया विषम् ॥ १३ ॥

वातगजाङ्कुशे।—ताप्यं—स्वर्णमाक्षिकं, तालकं—हरितालं, शृङ्गी—कर्कटशृङ्गी, अग्निमन्थं—गणिकारी। सकणाजिङ्गिणीक्काथोऽनुपेयः ॥ ३—९ ॥

बृहद्वातगजाङ्कुशे।—मुण्डी—मुण्डीरी ॥ १०—१२ ॥

संपिष्य चपलाद्रावैः निष्किकां भक्षयेद्वटीम् ।
वातश्लेष्महरो ह्येष महावातगजाङ्कुशः ॥ १४ ॥

वातनाशनो रसः ।—

सूतहाटकवज्राणि ताम्रं लौहञ्च माक्षिकम् ।
तालं नीलाञ्जनं तुत्थं सिन्धुफेनं समांशिकम् ॥ १५ ॥
पञ्चानां लवणानाञ्च भागैकं सुविमर्दयेत् ।
वज्रीक्षीरैर्दिनैकन्तु रुद्ध्वा तं भूधरे पचेत् ॥ १६ ॥
माषैकमार्द्रकद्रावैः लिह्यात् वातविनाशनम् ।
पिप्पलीमूलकक्काथं सकृष्णमनुपाययेत् ।
सर्वान् वातविकारांश्च निहन्त्याक्षेपकादिकान् ॥ १७ ॥

वातारिरसः ।—

रसभागो भवेदेको द्विगुणो गन्धको मतः ।
त्रिगुणा त्रिफला ग्राह्या चतुर्भागन्तु चित्रकम् ॥ १८ ॥
गुग्गुलोः पञ्चभागञ्चैरण्डतैलेन मर्दयेत् ।
क्षिप्त्वाऽत्र पूर्वकं चूर्णं पुनस्तेनैव मर्दयेत् ॥ १९ ॥
गुड़िकां कर्षमात्रान्तु भक्षयेत् प्रातरुत्थितः ।
नागरैरण्डमूलानां क्काथं तदनु पाययेत् ॥ २० ॥

महावातगजाङ्कुशे ।—बला श्वेतवाट्यालकम् ; चपलाद्रावैरिति—पिप्पलीक्काथैः ॥ १३।१४ ॥

वातनाशनरसे ।—हाटकं—स्वर्णम् ; वज्रं—हीरकम् ; तदभावे वैक्रान्तम् । नीलाञ्जनं—रसाञ्जनम् ; सिन्धुफेनं—समुद्रफेनम् ॥१५—१७॥

वातारिरसे ।—द्विगुण इति—एकभागापेक्षया द्विगुणः ; एवं

अङ्गमेरण्डतैलेन स्वेदयेत् पृष्ठदेशतः ।
विरेके तेन सञ्जाते स्निग्धमुष्णञ्च भोजयेत् ।
वातारिसंज्ञको ह्येष रसो निर्वातसेवितः ॥ २१ ॥

अनिलारिरसः ।—

रसेन गन्धं द्विगुणं विमर्द्य वातारिनिर्गुण्डिरसैर्दिनैकम् ।
निवेशयेत् ताम्रमये पुटे तत्सर्वं मृदावेष्ट्य च वालुकाख्ये ॥२२॥
यन्त्रे पुटेत् गोमयचूर्णवह्नौ स्वभावशीते तु समुद्धरेत् तत् ।
निर्गुण्डिकावातहराग्नितोयैः सञ्चूर्ण्य यत्नेन विभावयेत् तत् ॥२३॥
रसोऽनिलारिः कथितोऽस्य वल्लमेरण्डतैलेन ससैन्धवेन ।
मरीचचूर्णेन ससर्पिषा वा निर्गुण्डिचित्रैश्च कटुत्रिकैर्वा ॥ २४ ॥

वातकण्टको रसः ।—

वज्रमृताभ्रहेमार्क-तीक्ष्णमुण्डं क्रमोत्तरम् ।
मरिचं मर्दयेदम्ल-वर्गेण दिवसत्रयम् ॥ २५ ॥
द्विक्षारं पञ्चलवणं मर्दितं स्यात् समं समम् ।
ततो निर्गुण्डिकाद्रावैः मर्दयेत् दिवसत्रयम् ॥ २६ ॥
शुष्कमेतद्विचूर्ण्याथ विषञ्चास्याष्टमांशतः ।
टङ्गणं विषतुल्यांशं दत्त्वा जम्बीरजद्रवैः ॥ २७ ॥

सर्वत्र । आदौ गुग्गुलुमेरण्डतैलेन संमर्द्य रसादि सर्वं निक्षिप्य पुनर्मर्दयेत् । अङ्गं स्वेदयेदिति—मर्दयेत् ॥ १८—२१ ॥

अनिलारिरसे ।—वातारिरसैः,—एरण्डस्य मूलरसैः । अग्निः,—चित्रकः । तोयैरिति—क्वाथैः ॥ २२—२४ ॥

वातकण्टकरसे ।—तीक्ष्णं—तीक्ष्णलौहं, मुण्डं—मुण्डलौहम् । क्रमो-

भावयेत् दिनमेकन्तु रसोऽयं वातकण्टकः ।
दातव्यो वातरोगेषु सन्निपाते विशेषतः ।
द्विगुञ्जमार्द्रकद्रावैः घृतैर्वा वातरोगिणि ॥ २८ ॥

निर्गुण्डीगुग्गुलुः ।—

निर्गुण्डीमूलचूर्णन्तु महिषाचञ्च गुग्गुलुम् ।
समांशं मर्दयेदाज्ये तद्वटी कर्षसम्मिता ॥ २९ ॥
अनुयोज्या घृतैर्नित्यं स्निग्धमुष्णञ्च भोजयेत् ।
मण्डलं नाशयेत् सर्वं वातरोगं विशेषतः ।
सन्निपाते पिबेच्चानु तालमूलीकषायकम् ॥ ३० ॥

लघ्वानन्दो रसः ।—

पारदः गन्धको लौहमभ्रकं विषमेव च ।
समांशं मरिचस्याष्टौ टङ्कणन्तु चतुर्गुणम् ॥ ३१ ॥
भृङ्गराजरसेनैव दातव्याः सप्त भावनाः ।
तथा दाड़िमतोयेन वटीं कुर्य्यात् समाहितः ।
निहन्ति वातजान् रोगान् भ्रमदाहपुरःसरान् ॥ ३२ ॥

चिन्तामणिरसः ।—

कर्षैकं रससिन्दूरं तत्समं मृतमभ्रकम् ।
तदर्द्धं मृतलौहञ्च स्वर्णं शाणं क्षिपेत् बुधः ॥ ३३ ॥

क्षरमिति—यथोत्तरं, द्विक्षारं—यवक्षारः स्वर्जिकाक्षारश्च । अष्टमांशत इति—एकभागापेक्षया । निर्गुण्ड्यादिचूर्णं कर्षपरिमितमनुयोज्यम् ॥ २५—३० ॥

लघ्वानन्दे ।—"मरिचस्याष्टौ" इति एकभागापेक्षया मरिचस्याष्टौ भागाः । "भृङ्गराजरसेनैव दातव्याः" इत्यत्र "भृङ्गराजरसैश्चाम्ल-दाड़िमैः" तथा "भृङ्गराजरसैरम्ल-वेतसैः" इति पाठान्तरद्वयम् ॥३१।३२॥

कन्यारसेन संमर्द्य गुञ्जामानां वटीं चरेत्।
अनुपानादिकं दद्यात् बुद्धा दोषबलाबलम् ॥ ३४ ॥
हन्ति श्लेष्मान्वितं वातं केवलं पित्तसंयुतम्।
हृल्लासमरुचिं दाहं वान्तिं भ्रान्तिं शिरोग्रहम् ॥ ३५ ॥
प्रमेहं कर्णनादञ्च जड़गद्गदमूकताम्।
बाधिर्य्यं गर्भिणीरोगमश्मरीं सूतिकाऽऽमयम् ॥ ३६ ॥
प्रदरं सोमरोगञ्च यक्ष्माणं ज्वरमेव च।
बलवर्णाग्निदः सम्यक् कान्तिपुष्टिप्रसाधकः।
चिन्तामणिरसश्चायं चिन्तामणिरिवापरः ॥ ३७ ॥

चतुर्मुखो रसः।—

रसगन्धकलौहाभ्रं समं सूताङ्घ्रि हेम च।
सर्वं खल्लतले क्षिप्त्वा कन्यास्वरसमर्दितम् ॥ ३८ ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम्।
संस्थाप्य च तदुद्धृत्य त्रिफलारससंयुतम् ॥ ३९ ॥
एतद्रसायनवरं सर्वरोगेषु योजयेत्।
तद् यथाऽग्निबलं खादेत् वलीपलितनाशनम् ॥ ४० ॥
पौष्टिकं बल्यमायुष्यं पुत्त्रप्रसवकारकम्।
क्षयमेकादशविधं कासं पञ्चविधं तथा ॥ ४१ ॥
कुष्ठमेकादशविधं पाण्डुरोगान् प्रमेहकान्।
शूलं श्वासञ्च हिक्काञ्च मन्दाग्निञ्चाम्लपित्तकम् ॥ ४२ ॥

चिन्तामणिरसे।—मृतलौहम् इत्यत्र कान्तलौहमिति केचित् पठन्ति ॥ ३३—३७ ॥

चतुर्मुखरसे।—रसगन्धकयोरप्राप्तौ कफप्रबले वा व्याधौ स्वर्णसिन्दूरं

अपस्मारं महोन्मादं सर्वार्शांसि त्वगामयान् ।
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा ॥ ४३ ॥
जगताञ्च हितार्थाय चतुर्मुखमुखोदितः ।
रसश्चतुर्मुखो नाम चतुर्मुख इवापरः ॥ ४४ ॥

लक्ष्मीविलासो रसः ।—

पलं कृष्णाभ्रचूर्णस्य तदर्द्धौ रसगन्धकौ ।
बला नागबलाऽभीरु-विदारीकन्दमेव च ॥ ४५ ॥
कृष्णधुस्तूरनिचुलं गोक्षुरवृद्धदारयोः ।
बीजं शक्राशनस्यापि जातीकोषफले तथा ॥ ४६ ॥
कर्पूरञ्चैव कर्षांशं श्लक्ष्णचूर्णं पृथक् पृथक् ।
गृहीत्वा चाष्टमांशेन स्वर्णं पर्णरसेन च ॥ ४७ ॥
वटिकां खिन्नचणक-प्रमाणां कारयेद्भिषक् ।
रसो लक्ष्मीविलासोऽयं पूर्ववत् गुणकारकः ॥ ४८ ॥

रोगेभसिंह-श्रीखण्डवट्यौ ।—

सूतात् द्वयो घन-वराऽनलवेल्लभार्गी-
तिक्ताकटुत्रयवरैः सवचैः समांशैः ।

चिपन्ति वृद्धाः । "सूताङ्घ्रि हेम च" इति ।—सूतात् पादिकं स्वर्णभस्म इत्यर्थः ॥ ३८—४४ ॥

लक्ष्मीविलासरसे ।—"तदर्द्धौ रसगन्धकौ" इति ।—मिलितौ रसगन्धकौ तदर्द्धौ । नागबला—गोरचचाकुलिया, अभीरुः,—शतमूली, विदारीकन्दं—भूमिकुष्माण्डः, निचुलं हिज्जलबीजं, शक्राशनस्य बीजं—विजयायाः बीजम् । बलादीनां प्रत्येकं कर्षांशम् । "चाष्टमांशेन स्वर्णम्" इति ।—कर्षमानापेचया च अष्टमांशम् ॥ ४५—४८ ॥

रोगेभसिंह इति वातकफामयघ्नः
सान्द्रोऽयमल्पपटुतो विहितो द्विगुञ्जः ॥ ४९ ॥
एतैः गुड़प्रमृदितै रसवर्जितैः स्यात्
श्रीखण्डनामगुड़िका विहिता द्विगुञ्जा।
शैत्याद्यजीर्णकफवातभवान् विकारान्
हन्यार्द्रकेण सहिताऽप्यथ केवला वा ॥ ५० ॥

पिण्डीरसः।—

सूतात् पञ्चार्कतश्चैकं कृत्वा पिण्डं सगन्धकम्।
सूतांशं नागवल्ल्याश्च द्रवैः पिष्ट्वा प्रलेपयेत् ॥ ५१ ॥
ताम्रपत्रीं प्रलिप्तां तां रुद्ध्वा गजपुटे पचेत्।
द्विगुञ्जस्त्र्यूषणेनार्द्र-वपुर्वातं सकम्पकम्।
निहन्ति दाहसन्ताप-मूर्च्छापित्तसमन्वितम् ॥ ५२ ॥

कुब्जविनोदो रसः।—

रसगन्धौ समौ शुद्धौ चाभया तालकं तथा।
विषं कटुकि व्योषञ्च बोलजैपालकौ समौ ॥ ५३ ॥
भृङ्गराजरसैर्मर्द्यं स्नुह्यर्कस्वरसैस्तथा।
गुञ्जाद्वयं भक्षयेच्च हृच्छूलं पार्श्वशूलकम् ॥ ५४ ॥
आमवाताढ्यवातादीन् कटिशूलञ्च नाशयेत्।

रोगेभसिंहे।—घनः,—मुस्तकम्। वरा—त्रिफला, अनलः,—चित्रकः, वेल्लं—विड़ङ्गम् ॥ ४९।५० ॥

पिण्डीरसे।—पारदगन्धकनागवल्लीरसैस्ताम्रपत्रीं प्रलिप्य गजपुटे पचेत् ॥ ५१।५२ ॥

अग्निञ्च कुरुते दीप्तं स्थौल्यञ्चाप्यपकर्षति ।
रसः कुब्जविनोदोऽयं गहनानन्दभाषितः ॥ ५५ ॥

शीतवातलक्षणम् ।—

हिमवन्ति हि गात्राणि रोमाणि स्फुरितानि च ।
शिरोऽक्षिवेदनाऽऽलस्यं शीतवातस्य लक्षणम् ॥ ५६ ॥

शीतारिरसः ।—

रसेन गन्धं द्विगुणं प्रगृह्य पुनर्नवाऽग्निस्वरसैर्विभाव्य ।
पक्वार्कपत्रस्य रसेन पश्चाद्विपाचयेदष्टगुणेन यत्नात् ॥ ५७ ॥
रसार्द्धभागञ्च विषञ्च दत्त्वा विपाचयेदग्निजले क्षणं तत् ।
शीतारिसंज्ञस्य रसायनस्य वल्लञ्च सार्द्धं मरिचार्द्रकेण ।
मरीचचूर्णेन घृताप्लुतेन सेवेत मांसञ्च घृतञ्च पथ्यम् ॥ ५८ ॥

वातविध्वंसनो रसः ।—

सूतमभ्रकसत्त्वञ्च कांस्यं शुद्धञ्च माक्षिकम् ।
गन्धकं तालकं सर्वं भागोत्तरविवर्द्धितम् ॥ ५९ ॥
कज्जलीकृत्य तत्सर्वं वातारिस्नेहसंयुतम् ।
सप्ताहं मर्दयित्वा तु गोलकीकृत्य यत्नतः ॥ ६० ॥

कुब्जविनोदरसे ।—बोलं—गन्धबोलम् ॥ ५३—५५ ॥

शीतवातलक्षणमाह,—हिमवन्तीति ॥ ५६ ॥

शीतारिरसे ।—पक्वार्कपत्रं—पीतवर्णम् अर्कपर्णम् । "विपाचयेदष्टगुणेन" इति ।—रसगन्धकापेक्षया अष्टगुणेन पाचयेत्, बालुकायन्त्रे मूषायां वा रसक्षयावधिपाकः ॥ ५७।५८ ॥

वातविध्वंसनरसः कोष्ठाश्रितवाते । अत्र "भागोत्तरविवर्द्धितम्"

निम्बुद्रवेण संपोद्य तिलकल्केन लेपयेत्।
अर्द्धाङ्गुलदलेनैव परिशोष्य प्रयत्नतः॥ ६१॥
प्रपचेत् बालुकायन्त्रे द्वादशप्रहरं ततः।
जठरस्य रुजः सर्वास्तथा च मलविग्रहम्॥ ६२॥
आध्मानकं तथाऽऽनाहं विसूचीं वह्निमान्द्यकम्।
आमदोषमशेषञ्च गुल्मं छर्दिञ्च दुर्जयाम्॥ ६३॥
ग्रहणीं श्वासकासौ च क्रिमिरोगं विशेषतः।
हन्यात् सर्वाङ्गशूलञ्च मन्यास्तम्भं तथैव च॥ ६४॥
ज्वरे चैवातिसारे च शूलरोगे त्रिदोषजे।
पथ्यं रोगानुसारेण देयमस्मिन् भिषग्वरैः।
कथितो नन्दिनाथेन वातविध्वंसनो रसः॥ ६५॥

पलाशादिवटी।—

पलाशवीजोत्थरसेन सूतं गन्धेन युक्तं त्रिदिनं विमर्द्य।
सूक्ष्मीकृतं तद्विषतिन्दुवीजं संयोजयेदस्य कलाप्रमाणम्।
मासद्वयं निष्कमितं प्रयत्नात् अर्शांसि हन्याशु नियोजनीयम्॥६६॥
वातरक्तं तथा शोथमस्पर्शाख्यानिलामयम्।
वातवत् पित्तरोगेऽपि तत्र पित्तेन भावयेत्।
पलाशादिवटी ख्याता वातरोगकुलान्तिका॥ ६७॥

इति।—यथोत्तरमेकैकभागवर्द्धितमित्यर्थः। "वातारिस्नेहसंयुतम्" इति—एरण्डतैलसंयुतम्। ५८—६५॥

पलाशादिवटिकायाम्।—विषतिन्दुकवीजं—"कुचिला" इति ख्याता, तच्च वीजं गोमूत्रसिद्धं, विरहितवहिरावरणं, त्यक्तान्तर्विषपत्रञ्च

दशसारवटी ।—

यष्टिं धात्रीं बलां द्राक्षामेलां चन्दनवालुकम् ।
मधूकपुष्पं खर्जूरं दाड़िमं पेषयेत् समम् ॥ ६८ ॥
सर्वतुल्या सिता योज्या पलार्द्धं भक्षयेत् सदा ।
दशसारवटी ख्याता सर्ववातविकारनुत् ॥ ६९ ॥

गगनादिवटी ।—

मृतगगनरसार्कं मुण्डतीक्ष्णं सताप्यं
सबलिसममिदं स्यात् यष्टितोयप्रपिष्टम् ।
तदनुसलिलजातैर्वासकैर्गोस्तनोभिः
मृदितमनुविदारीवारिणा घस्रमेकम् ॥ ७० ॥
घृतमधुसहितेयं निष्कमात्रा वटीति
क्षपयति गुरुवातं पित्तरोगं क्षयञ्च ।
भ्रम-मद-कफशोषान् दाहतृष्णासमुत्थान्
मलयजमिह पेयञ्चानुपेयं सचन्द्रम् ॥ ७१ ॥

सर्वाङ्गसुन्दरो रसः ।—

शुद्धसूताभ्रताम्रायो हिङ्गुलं कार्षिकं समम् ।
गन्धकश्चैकभागः स्यात् सर्वमेकत्र मर्दयेत् ॥ ७२ ॥

शाखम् । इयं पलाशादिवटी यदा पित्तरोगे प्रयोक्तव्या तदा पञ्चपित्तेन भावयेत् ॥ ६६।६७ ॥

दशसारवटिकायाम् ।—अत्र "चन्दनवालुकम्" इत्यत्र "चन्दन-वालकम्" इति पाठान्तरम् । प्राञ्चस्तु "दाड़िमम्" इत्यत्र दाड़िम्ब-त्वचमिच्छन्ति ॥ ६८।६९ ॥

गगनादिवटिकायाम् ।—मृतगगनरसार्कम्—अभ्रभस्म, रसः, ताम्र-

सप्तपर्णार्कस्नुक्क्षीर-वासा-वातारि-वारिणा।
विषमुष्टिसमं सर्वं पेष्यं तन्नोलकोकृतम् ॥ ७३ ॥
विपचेत् वालुकायन्त्रे द्वियामान्ते समुद्धरेत्।
पिप्पलीविषसंयुक्तो रसः सर्वाङ्गसुन्दरः।
सर्ववातविकारघ्नः सर्वशूलनिसूदनः ॥ ७४ ॥

तालकेश्वरो रसः।—

एकभागो रसस्य स्यात् शुद्धतालैकभागिकः।
अष्टौ स्युर्विजयायाश्च गुड़िकां गुड़तश्चरेत् ॥ ७५ ॥
एकैकां भक्षयेत् प्रातश्छायायामुपवेशयेत्।
तालकेश्वरनामायं रोगश्वासस्पर्शनाशनः ॥ ७६ ॥

त्रैलोक्यचिन्तामणिरसः।—

हीरं सुवर्णं सुसृतञ्च तारमेषां समं तीक्ष्णरजश्चतुर्णाम्।
समं मृताभ्रं रससिन्दुरञ्च निक्षिप्य तीक्ष्णस्य तथाऽश्मनो वा ॥७७॥
खल्ले द्रवेणैव कुमारिकाया गुञ्जाप्रमाणां वटिकां प्रकुर्य्यात्।
त्रैलोक्यचिन्तामणिरेष नाम्ना सम्पूज्य सम्यक् गिरिजां दिनेशम्॥७८

भस्म च। मुण्डं—मुण्डलौहं, तीक्ष्णं—तीक्ष्णलौहं, ताप्यं—स्वर्णमाक्षिकं, सबलिसमं—गन्धकसहितं प्रत्येकञ्च समम्। यष्टितोयप्रपिष्टं—यष्टीमधुक्वाथमर्दितम्। मलयजं—श्वेतचन्दनं, चन्द्रं—कर्पूरम् ॥ ७०—७४ ॥

अथास्पर्शवातचिकित्सामाह,—एकभाग इत्यादि। तालकेश्वररसे।—रसस्येति—भस्मसूतस्य। "गुड़िकां गुड़तः" इति।—सर्वचूर्णापेक्षया गुड़स्य द्वैगुण्यम्। मात्रा चास्य तोलकैकपरिमिता ॥ ७५।७६ ॥

त्रैलोक्यचिन्तामणिरसे।—हीरं—हीरकं, तारं—मौक्तिकम्। तार-

हन्त्यामयान् योगशतैर्विवर्ज्यानथ प्रणाशाय मुनिप्रणीतः ।
अस्य प्रसादेन गदानशेषान् जरां विनिर्जित्य सुखं विभाति ॥७९॥

स्निग्धे श्लेष्मण्यार्द्रकस्य रसेन पाययेत् सुधीः ।
शुष्के च माक्षिकेणैव पित्ते घृतसितायुतम् ॥ ८० ॥
श्लेष्मणि मारुते सम्यग दुष्टे च समतां गते ।
कणाचूर्णं क्षौद्रयुतं प्रमेहे दुग्धसंयुतम् ॥ ८१ ॥
बलवर्णाग्निजननः कासघ्नः कफवातजित् ।
आयुःपुष्टिकरो वृष्यः सर्वरोगनिसूदनः ॥ ८२ ॥

[इति वातव्याधि-चिकित्सा] ।

अथ कफरोग-चिकित्सा ।—

—०*०—

श्लेष्मकालानलो रसः ।—

रसस्य द्विगुणो गन्धः गन्धकात् द्विगुणं विषम् ।
विषात्तु द्विगुणं देयं चूर्णं त्रिकटुसम्भवम् ॥ १ ॥

शब्देनात्र शुद्धमौक्तिकमेव, न तु रजतम्;—"क्षौरं स्वर्णं सुशुद्धञ्च मौक्तिकम्" इति पाठान्तरदर्शनात् । सममिति—समभागम् । "चतुर्णां समं मृताभ्रम्" इति ।—एषां चतुर्णां समं भस्माभ्रं योज्यम् । रससिन्दूरञ्चाभ्रतुल्यम् ; एतत् सर्वमेकीकृत्य लौहखल्ले पाषाणखल्ले वा कुमारिकारसेन मर्दयित्वा गुञ्जामाला वटिका कार्य्या ॥ ७७—८२ ॥

इति वातव्याध्यधिकारः ।

दोषत्वसामान्यात् वातपित्तकफानामिति वातरोगचिकित्सामभि-

रसतुल्या प्रदातव्या चाभया सविभीतकी।
धात्री पुष्करमूलञ्च चाजमोदाऽजगन्धिका ॥ २ ॥
विड़ङ्गं कट्फलं चव्यं पञ्चैव लवणानि च।
लवङ्गं त्रिवृता दन्ती सर्वमेकत्र चूर्णयेत् ॥ ३ ॥
भावयेत् सप्तधा रौद्रे स्वरसैः सुरसोद्भवैः।
हन्ति सर्वं कफोद्भूतं व्याधिं कालानलो रसः ॥ ४ ॥

श्लेष्मशैलेन्द्रो रसः।—

पारदः गन्धको लौहं त्र्यूषणं जीरकद्वयम्।
शटी शृङ्गी यमानी च पौष्करञ्चार्द्रकं तथा ॥ ५ ॥
गैरिकं यावशूकञ्च टङ्कणं गजपिप्पली।
जातीकोषाऽजमोदा च वरा यासलवङ्गकम् ॥ ६ ॥
कनकारुणवीजानि कट्फलं चव्यकं तथा।
प्रत्येकं तोलकञ्चैषां सूक्ष्मचूर्णानि कारयेत् ॥ ७ ॥
पाषाणे विमले खल्ले घृष्टं पाषाणमुद्गरैः।
विल्वमूलरसं दत्त्वा चार्कचित्रफलत्रिकाः ॥ ८ ॥
निर्गुण्डी गणिका-वासा चेन्द्राशनं प्रचोदनी।
धुस्तूरः कृष्णजीरञ्च पिप्पलीपारिभद्रके ॥ ९ ॥

अथ इदानीं कफरोगचिकित्सामाह,—रसस्येति। श्लेष्मकालानलरसे।— "द्विगुणं देयं चूर्णं त्रिकटुसम्भवम्" इति।—त्रिकटुचूर्णं मेलयित्वा विषात् द्विगुणं देयम्। अजगन्धिका—वर्वरौति ख्याता। सुरसा—तुलसी ॥ १—४ ॥

श्लेष्मशैलेन्द्ररसे।—त्र्यूषणं—त्रिकटु, यावशूकं—यवक्षारः, वरा—

एतेषाञ्च रसैर्मर्द्यमार्द्रकैश्च विभावयेत् ।
उष्णतोयानुपानेन सर्वव्याधिं विनाशयेत् ॥ १० ॥
विंशतिं श्लैष्मिकान् रोगान् सन्निपातभवान् गदान् ।
उदराष्टकदुर्नाममामवातञ्च दारुणम् ॥ ११ ॥
पञ्च पाण्डवामयान् दोषान् क्रिमिं स्थौल्यमथो नृणाम् ।
यथा शुष्केन्धने वह्निस्तथैवाग्निविवर्द्धनः ॥ १२ ॥

महाश्लेष्मकालानलो रसः ।—

हिङ्गुलसम्भवं सूतं शिला-गन्धक-टङ्कणम् ।
ताम्रं वङ्गं तथाऽभ्रञ्च स्वर्णमाक्षिकतालकम् ॥ १३ ॥
धुस्तूरं सैन्धवं कुष्ठं पिप्पली हिङ्गु कट्फलम् ।
दन्तीवीजं सोमराजी वनराजफलं त्रिवृत् ॥ १४ ॥
वज्रीक्षीरेण संमर्द्य वटिकां कारयेद्भिषक् ।
कलायपरिमाणान्तु खादेदेकां यथाबलम् ॥ १५ ॥
सन्निपातं निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ।
मत्तसिंहो यथाऽरण्ये मृगाणां कुलनाशनः ।
तथाऽयं सर्वरोगाणां सद्यो नाशकरो महान् ॥ १६ ॥

महालक्ष्मीविलासः ।—

पलं वज्राभ्रचूर्णस्य तदर्द्धो गन्धको भवेत् ।
तदर्द्धं वङ्गभस्मापि तदर्द्धः पारदस्तथा ॥ १७ ॥

त्रिफला, यासः,—दुरालभा, कनकवीजं—धुस्तूरबीजम् । इन्द्राशनस्य—त्रैलोक्यविजयायाः । "पिप्पलीपारिभद्रके" इत्यत्र पिप्पलीशब्देन गज-पिप्पली ग्राह्या ॥५—१६ ॥

तत्समं हरितालञ्च तदर्द्धं ताम्रभस्मकम्।
रसतुल्यञ्च कर्पूरं जातीकोषफले तथा॥ १८॥
वृद्धदारकवीजञ्च वीजं स्वर्णफलस्य च।
प्रत्येकं कार्षिकं भागं मृतस्वर्णञ्च शाणकम्॥ १९॥
निष्पिष्य वटिका कार्य्या द्विगुञ्जाफलमानतः।
निहन्ति सन्निपातोत्थान् गदान् घोरान् सुदारुणान्॥२०॥
गलोत्थानन्त्रवृद्धिञ्च तथाऽतीसारमेव च।
कुष्ठमेकादशविधं प्रमेहान् विंशतिं तथा॥ २१॥
श्लीपदं कफवातोत्थं चिरजं कुलजं तथा।
नाड़ीव्रणं व्रणं घोरं गुदामयभगन्दरम्॥ २२॥
कासपीनसयक्ष्मार्शः-स्थौल्यदौर्गन्ध्यरक्तनुत्।
आमवातं सर्वरूपं जिह्वास्तम्भं गलग्रहम्॥ २३॥
उदरं कर्णनासाक्षि-मुखवैजात्यमेव च।
सर्वशूलं शिरःशूलं स्त्रीरोगञ्च विनाशयेत्॥ २५॥
वटिकां प्रातरेकैकां खादेन्नित्यं यथाबलम्।
अनुपानमिह प्रोक्तं मांसं पिष्टं पयो दधि॥ २५॥
वारिभक्तं सुरासीधु सेवनात् कामरूपधृक्।
वृद्धोऽपि तरुणस्पर्द्धी न च शुक्रक्षयो भवेत्॥ २६॥
न च लिङ्गस्य शैथिल्यं न केशा यान्ति पक्वताम्।
नित्यं गच्छेत् शतं स्त्रीणां मत्तवारणविक्रमः॥ २७॥
द्विलक्षयोजनी दृष्टिर्जायते पौष्टिकं तथा।
प्रोक्तः प्रयोगराजोऽयं नारदेन महात्मना॥ २८॥
महालक्ष्मीविलासोऽयं वासुदेवो जगत्पतिः।

प्रसादादस्य भगवान् लक्ष्मनारीषु वल्लभः ॥ २९ ॥

कफकेतुरसः ।—

टङ्कणं मागधी शङ्खं वत्सनाभं समं समम् ।
आर्द्रकस्य रसेनैव भावयेद्दिवसत्रयम् ॥ ३० ॥
गुञ्जामात्रं प्रदातव्यमार्द्रकस्य रसेन वै ।
पीनसं श्वासकासञ्च गलरोगं गलग्रहम् ॥ ३१ ॥
दन्तरोगं कर्णरोगं नेत्ररोगं सुदारुणम् ।
सन्निपातं निहन्त्याशु कफकेतुरसोत्तमः ॥ ३२ ॥

कफचिन्तामणिरसः ।—

हिङ्गुलेन्द्रयवं टङ्कं त्रैलोक्यवीजमेव च ।
मरिचञ्च समं सर्वं भस्मसूतं त्रिभागिकम् ॥ ३३ ॥
आर्द्रकस्य रसेनैव मर्दयेत् याममात्रकम् ।
चणकाभा वटी कार्य्या सर्ववातप्रशान्तये ।
कफरोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ३४ ॥

[इति कफरोगचिकित्सा] ।

महालक्ष्मीविलासे ।—स्वर्णफलस्य—धुस्तूरफलस्य ॥ १७—२९ ॥

कफकेतुरसे ।—मागधी—पिप्पली ॥ ३०—३२ ॥

कफचिन्तामणिरसे ।—टङ्कं—टङ्कणलाजाः, त्रैलोक्यवीजं - त्रैलोक्यविजयावीजं, शक्राशनवीजमित्यर्थः ॥ ३३।३४ ॥

इति कफरोगाधिकारः ।

अथ पित्तरोग-चिकित्सा ।—

—०**—

गुडूच्यादिलौहम् ।—

गुडूचीसारसंयुक्तं त्रिकत्रययुतं त्वयः ।
वातरक्तं निहन्त्याशु सर्ववातहरं परम् ॥ १ ॥

धात्रीलौहम् ।—

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य ।
यष्टीमधुकरजस्च द्विपलं दद्यात् पटे घृष्टम् ॥ २ ॥
अमृताक्वाथेनैतद्भाव्यं चूर्णन्तु सप्ताहम् ।
चण्डातपे सुशुष्कं भूयः पिष्ट्वा नवे घटे स्थाप्यम् ॥ ३ ॥
घृतेन मधुना युक्तं भोजनाद्यन्तमध्यतः ।
त्रीन् वारान् भक्षयेन्नित्यं पथ्यं दोषानुबन्धतः ॥ ४ ॥
भक्तस्यादौ नाशयेच्च दोषान् पित्तकृतानपि ।
मध्ये चानाहविष्टम्भं तथाऽन्ते चाग्निमान्द्यताम् ।
रक्तपित्तसमुद्भूतान् रोगान् हन्ति न संशयः ॥ ५ ॥

प्रागुक्तरीत्या कफरोगानन्तरं पित्तरोगचिकित्सामाह,—गुडूची-त्यादि । गुडूच्यादिलौहे ।—गुडूचीसारं—गुडूचीसत्त्वं, त्रिकत्रयं—त्रिकटु, त्रिमदः, त्रिफला चेति । अत्र सर्वसमं लौहभस्म प्रदेयम् ॥ १ ॥

धात्रीलौहे ।—"पटे घृष्टं यष्टीमधुकरजः,"—वस्त्रछानितं यष्टीमधु-चूर्णम् । अत्र अमृता—आमलकीति भानुदासः, अन्ये तु—गुडूची-माहुः । सप्ताहं सप्त भावनाः । औषधस्य माषत्रयं भोजनादिमध्या-न्तेषु घृतमधुभ्यां मर्दितं भक्ष्यमिति त्रिपुरारिः ॥ २—५ ॥

पित्तान्तको रसः ।—

जातीकोषफले मांसी कुष्ठं तालीशपत्रकम् ।
माक्षिकं मृतलौहञ्च अभ्रं दिव्यं समांशिकम् ॥ ६ ॥
सर्वतुल्यं मृतं तारं समं निष्पिष्य वारिणा ।
द्विगुञ्जाभा वटी कार्य्या पित्तरोगविनाशिनी ॥ ७ ॥
कोष्ठाश्रितञ्च यत् पित्तं शाखाश्रितमथापि वा ।
शूलञ्चैवाम्लपित्तञ्च पाण्डुरोगं हलीमकम् ॥ ८ ॥
दुर्नाम भ्रान्तिवान्ती च क्षिप्रमेव विनाशयेत् ।
रसः पित्तान्तको ह्येष काशिराजेन भाषितः ॥ ९ ॥

महापित्तान्तको रसः ।—

यद्यत्र माक्षिकं त्यक्त्वा सुवर्णमपि दीयते ।
महापित्तान्तको नाम सर्वपित्तविनाशनः ॥ १० ॥

[इति पित्तरोगचिकित्सा] ।

पित्तान्तकरसे ।—जातीकोषः—"जैत्री" इति वङ्गभाषा. फलं—जातीफलं, मांसी—जटामांसी, माक्षिकं—स्वर्णमाक्षिकं, मृतलौहं—लौहभस्म, दिव्यं—मनःशिला । तारं—रौप्यम् ॥ ६—१० ॥

इति पित्तरोगाधिकारः ।

अथ वातरक्त-चिकित्सा ।—

—○*○—

लाङ्गल्याद्यं लौहम् ।—

विशुद्धलाङ्गलीमूल-त्रिकटुत्रिफलैस्तथा ।
द्राक्षागुग्गुलुभिस्तुल्यं लौहचूर्णं नियोजयेत् ॥ १ ॥
मातुलुङ्गरसेनैव त्रिफलाया रसेन च ।
विमृद्य यत्नतः पश्चात् गुड़िकां कोलसम्मिताम् ॥ २ ॥
भक्षयेन्मधुना सार्द्धं करोति शृणु यान् गुणान् ।
आजानुस्फुटितं घोरं सर्वाङ्गस्फुटितं तथा ।
तत् सर्वं नाशयत्याशु साध्यासाध्यञ्च शोणितम् ॥ ३ ॥

वातरक्तान्तको रसः ।—

गन्धकं पारदं लौहं शिलां तालं घनं तथा ।
शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥ ४ ॥
श्वेतापराजिता दार्व्वी वागुजी चित्रकं तथा ।
पुनर्नवा देवकाष्ठ-त्रिफलाव्योषवेल्लकम् ॥ ५ ॥

पित्तजनितरक्तदुष्टिसाधर्म्यात् पित्तरोगानन्तरं वातरक्तचिकित्सा-माह । लाङ्गल्याद्यलौहे ।—सर्व्वचूर्णसमं लौहम् । अत्र "विशुद्ध * * * तथा" इत्यत्र "लाङ्गलीमूलमधुकं त्रिकटु त्रिफला तथा" इति पाठान्तरम् ॥ १—३ ॥

वातरक्तान्तकरसे ।—घनम्—अभ्रम् । पुरं—गुग्गुलुम् । अत्र

चूर्णमेषां पृथक् तुल्यं सर्वमेकत्र कारयेत् ।
त्रिफला भृङ्गराजस्य रसेनैव त्रिधा त्रिधा ॥ ६ ॥
भावयेत् भक्षयेत् पश्चात् चणमात्रं दिने दिने ।
ततोऽनुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥ ७ ॥
शाणमात्रं घृतैः कुर्य्यात् सर्ववातविकारनुत् ।
वातरक्तं महाघोरं गम्भीरं सर्वजञ्च यत् ।
सर्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम् ॥ ८ ॥

तालभस्म ।—

हरितालं पलं शुद्धं तथा कर्षं विषस्य च ।
श्वेताङ्कोठरसेनैव द्वयमेकत्र खल्लयेत् ॥ ९ ॥
पलाशभस्म द्विपलं निधाय स्थालिकोपरि ।
तद्भस्मोपरि तालस्य गोलकं स्थापयेत् सुधीः ॥ १० ॥
तस्योपरि ह्यपामार्ग-भस्म दद्यात् पलत्रयम् ।
स्थालीमुखे शरावञ्च दद्यात् यत्नेन लेपयेत् ॥ ११ ॥
लेपयित्वा ततश्चुल्ल्यामहोरात्रं पचेत् भिषक् ।
ततस्तु जायते भस्म शुद्धकर्पूरसन्निभम् ॥ १२ ॥

"श्वेतापराजिता * * * वेल्लकम्" इत्यत्र "विडङ्गं त्रिफला व्योषमब्धिफेनं पुनर्नवा। देवदारु चित्रकञ्च दार्वी श्वेतापराजिता ॥" इति तन्त्रान्तरे पठ्यते, तत्र वागुजीस्थाने सिन्धुफेनमिति विशेषः। वागुजी—सोमराजो, वेल्लकं—विड़ङ्गम्। "चूर्णमेषां पृथक् तुल्यम्" इति—प्रत्येकं पारदसममित्यर्थः ॥ ४—८ ॥

तालभस्मनि।—शोधितं हरितालं श्वेताङ्कोठरसेन मर्दयित्वा गोलकं

गुञ्जात्रयं ततो भक्ष्यमनुपानविशेषतः।
वातरक्तञ्च कुष्ठञ्च दद्रुविस्फोटकापचीम् ॥ १३ ॥
विचर्चिकां चर्मदलं वातदुष्टञ्च शोणितम्।
रक्तपित्तं तथा शोथं गलत्कुष्ठं विनाशयेत्।
हलीमकं तथा शूलमग्निमान्द्यमरोचकम् ॥ १४ ॥

महातालेश्वरो रसः।—

तथा सिद्धेन तालेन गन्धतुल्येन मेलयेत्।
द्वयोस्तुल्यं जीर्णताम्रं बालुकायन्त्रगं पचेत् ॥ १५ ॥
अयं तालेश्वरो नाम रसः परमदुर्लभः।
हन्यात् कुष्ठानि सर्वाणि वातरक्तमथापि च।
शूलमष्टविधं श्वित्रं रसस्तालेश्वरो महान् ॥ १६ ॥

विश्वेश्वरो रसः।—

रसात् दश विषात् पञ्च गन्धकात् दश शोधितात्।
तुत्थात् दश पलाशस्य वीजेभ्यः पञ्च कारयेत् ॥ १७ ॥
क्षुद्राऽश्वमारधुस्तूर-नीलीतः करहाटकात्।
दशकं दशकं कुर्य्यात् शोषयित्वा जटात्वचः ॥ १८ ॥

कुर्य्यात्; ततः मृत्स्थाल्या अभ्यन्तरे यथामानं पलाशभस्म दत्त्वा हरितालगोलकं निदध्यात्। तदुपरितः आकण्ठं स्थाल्याः अपामार्ग-भस्म निधाय मुखे च शरावं दत्त्वा दृढं लेपयेत्; ततः अहोरात्रम् अवि-रामज्वालया विपाच्य साङ्गशीतां स्थालीम् उन्मोच्य भस्मराशेर्मध्यस्थं हरितालगोलकं गृह्णीयात्। मात्रा चास्य व्यवह्रियते तण्डुलपरिमिता ॥ ६—१६ ॥

दशकं दशकं दत्त्वा कुचिलात् दश नूतनात् ।
भल्लातकाच्च दशकं चूर्णयित्वा भिषक् ततः ॥ १९ ॥
सुदिने च बलिं दत्त्वा वैद्यः पूजापरायणः ।
रक्तिकाद्वितयं दद्यात् सहते यदि वा त्रयम् ॥ २० ॥
वातरक्तं ज्वरं कुष्ठं खरस्पर्शमसौख्यदम् ।
आजानुस्फुटितं हन्ति विषजं वाऽस्थिनिःसृतम् ॥ २१ ॥
कुष्ठमष्टादशविधमग्निमान्द्यमरोचकम् ।
विश्वेश्वरो रसो नाम विश्वनाथेन भाषितः ॥ २२ ॥

कुष्ठोक्तौषधप्रयोगोपदेशः ।—

वक्ष्यते कुष्ठरोगे यदौषधं भिषजां वरैः ।
वातरक्ते प्रयुञ्जीत कुर्य्याच्च रक्तमोक्षणम् ॥ २३ ॥

[इति वातरक्तचिकित्सा] ।

अथोरुस्तम्भ-चिकित्सा ।—

गुञ्जाभद्ररसः ।—

निष्कत्रयं शुद्धसूतं निष्कद्वादश गन्धकम् ।
गुञ्जावीजञ्च षड्निष्कं जयन्तीनिम्बवीजकम् ॥ १ ॥

विश्वेश्वररसे ।—क्षुद्रा—कण्टकारी । अश्वमारः,—करवीरः, करहाटकः,—हातजुरीति ख्याता लता ॥ १७—२२ ॥

इति वातरक्ताधिकारः ।

आवृतवातसाधर्म्यात् वातरक्तानन्तरम् ऊरुस्तम्भचिकित्सामाह,

प्रत्येकं निष्कमात्रन्तु निष्कं जैपालबीजकम्।
जयाजम्बीरधुस्तूर-काकमाचीद्रवैर्दिनम्॥ २॥
भावयित्वा वटीं कुर्य्यात् चतुर्गुञ्जाप्रमाणतः।
गुञ्जाभद्ररसो नाम हिङ्गुसैन्धवसंयुतः।
शमयत्युल्बणं दुःखमूरुस्तम्भं सुदारुणम्॥ ३॥

शिलाजत्वादियोगचतुष्टयम्।—

शिलाजतु गुग्गुलुं वा पिप्पलीमथ नागरम्।
ऊरुस्तम्भे पिबेत् मूत्रैर्दशमूलीरसेन वा॥ ४॥

वारिशोषणरसादिप्रयोगोपदेशः।—

प्लीहाधिकारे कथितं रसेन्द्रं वारिशोषणम्।
ऊरुस्तम्भे प्रयुञ्जीत चान्यद्वा योगवाहिकम्॥ ५॥

[इति ऊरुस्तम्भचिकित्सा]।

अथामवात-चिकित्सा।—

—०*०—

आमवातारिवटिका।—

रसगन्धकलौहाभ्रं तुत्थं टङ्कणसैन्धवम्।
समभागं विचूर्ण्याथ चूर्णाद्द्विगुणगुग्गुलुः॥ १॥

—निष्कत्रयमिति। गुञ्जाभद्ररसे।—निष्कम्—अर्द्धतोलकम्; गुञ्जाबीजं—श्वेतगुञ्जाबीजम्॥ १—५॥

इति ऊरुस्तम्भाधिकारः।

आमवातजन्यत्वसामान्यात् ऊरुस्तम्भानन्तरम् आमवातचिकित्सा-

गुग्गुलोः पादिकं देयं त्रिवृतामूलवल्कलम् ।
तत्समं चित्रकं देयं घृतेन परिमर्दयेत् ॥ २ ॥
खादेत् माषद्वयञ्चास्य त्रिफलाचूर्णयोगतः ।
आमवातारिवटिका पाचिका भेदिका मता ॥ ३ ॥
आमवातं निहन्त्याशु गुल्मशूलोदराणि च ।
यकृत्प्लीहोदराष्ठीला-कामलापाण्डुरोचकान् ॥ ४ ॥
ग्रन्थिशूलं शिरःशूलं वातरोगञ्च गृध्रसीम् ।
गलगण्डं गण्डमालां क्रिमिकुष्ठभगन्दरान् ॥ ५ ॥
विद्रधिञ्चान्त्रवृद्धिञ्च ह्यर्शांसि गुदजानि च ।
आमवातारिवटिका पुरेशानेन चोदिता ॥ ६ ।

अपराऽऽमवातारिवटिका ।—

रसगन्धौ वरावह्नी गुग्गुलुः क्रमवर्द्धितः ।
एतदेरण्डतैलेन मर्दयेदतिचिक्कणम् ॥ ७ ॥
कर्षोऽस्यैरण्डतैलेन हन्त्युष्णजलपायिनः ।
आमवातमतीवोग्रं दुग्धं मुद्गादि वर्जयेत् ॥ ८ ॥

माष्ट ।—आमवातारिवटिकायाम् ।—"लौहाभ्रम्" इत्यत्र "लौहार्कम्" इति पाठे—अर्कः,—ताम्रः । "चूर्णात् द्विगुणगुग्गुलुः" इति ।—गुग्गुलोः सर्वचूर्णात् द्वैगुण्यम् ॥ १—६ ॥

अपराऽऽमवातारिवटिकायाम् ।—रसगन्धौ कज्जलीकृतौ । वरा—त्रिफला । अत्र रसस्य एको भागः, गन्धकस्य द्वौ भागौ, तयोः कज्जलिकां कृत्वा इत्यर्थः ; त्रिफलायाः त्रिचतुःपञ्चभागिकाः, वह्नेः षट्, गुग्गुलोः सप्त भागाः बोध्याः ॥ ७।८ ॥

आमवातेश्वरो रसः ।—

शुद्धगन्धः पलार्द्धश्च मृतताम्रञ्च तत्समम् ।
ताम्रार्द्धः पारदः शुद्धः रसतुल्यं मृतायसम् ॥ ९ ॥
सर्वं पञ्चाङ्गुलेनैव भावयेच्च पुनः पुनः ।
सञ्चूर्ण्य पञ्चकोलोत्थैः क्वाथैः सर्वं विभावयेत् ॥ १० ॥
रौद्रे विंशतिवारांश्च गुडूचीनां रसैर्दृश ।
भृष्टटङ्कणचूर्णेन तुल्येन सह मेलयेत् ॥ ११ ॥
टङ्कणार्द्धं विड़ं देयं मरिचं विड़तुल्यकम् ।
तिन्तिड़ीक्षारतुल्यञ्च सूततुल्यञ्च दन्तिकम् ॥ १२ ॥
त्रिकटु त्रिफलञ्चैव लवङ्गञ्चार्द्धभागिकम् ।
आमवातेश्वरो नाम विष्णुना परिकीर्त्तितः ॥ १३ ॥
महाग्निकारको ह्येष आमवातान्तको मतः ।
स्थूलानां कर्षणः श्रेष्ठः कृशानां स्थौल्यकारकः ॥ १४ ॥
अनुपानविशेषेण सर्वरोगविनाशनः ।
अनेन सदृशो नास्ति वह्निदीप्तिकरो महान् ।
गुल्मार्शोग्रहणीदोष-शोथपाण्डुरुजापहः ॥ १५ ॥

वृद्धदाराद्यं लौहम् ।—

वृद्धदारत्रिवृद्दन्ती-गजपिप्पलिमाणकैः ।

आमवातेश्वररसे ।—गन्धार्द्ध सर्वं पञ्चाङ्गुलरसे इति—एरण्डमूलरसे, पुनः पुनः इति—सप्तवारं भावयेत्, ततः सञ्चूर्ण्य पञ्चकोलक्वाथैः विंशतिवारान् भावयेत् ; ततः टङ्कणादि सर्वं योज्यम् ॥ ९—१५ ॥

त्रिकत्रयसमायुक्तो रामवातान्तकं त्वयः ।
सर्वानेव गदान् हन्ति केशरी करिणो यथा ॥ १६ ॥

शिवागुग्गुलुः ।—

शिवाविभीतामलकीफलानां प्रत्येकशो मुष्टिचतुष्टयञ्च ।
तोयाढ़के तत् क्वथितं विधाय पादावशेषे त्ववतारणीयम् ॥१७॥
एरण्डतैलं द्विपलं निधाय पिचुत्रयं गन्धकनामकस्य ।
पचेत् पुरस्यात्र पलद्वयञ्च पाकावशेषे च विचूर्ण्य दद्यात् ॥१८॥
रास्ना विड़ङ्गं मरिचं कणा च दन्ती जटा नागरदेवदारु ।
प्रत्येकशः कोलमितं तथैषां विचूर्ण्य निक्षिप्य नियोजयेच्च ॥१९॥
आमवाते कटीशूले गृध्रसीक्रोष्टुशीर्षके ।
न चान्यदस्ति भैषज्यं यथाऽयं गुग्गुलुः स्मृतः ॥ २० ॥

आमवातगजसिंहमोदकः ।—

शुण्ठीचूर्णस्य प्रस्थैकं यमान्याश्च पलाष्टकम् ।
जीरकस्य पले द्वे च धन्याकस्य पलद्वयम् ॥ २१ ॥
पलैकं शतपुष्पाया लवङ्गस्य पलं तथा ।
टङ्कणस्य पलं भृष्टं मरिचस्य पलानि च ॥ २२ ॥

इन्द्रदाराद्यलौहे ।—त्रिवृदिति—त्रिवृन्मूलम् । माणकन्दं पुराणं ग्राह्यम् । "गजपिप्पलिमाणकैः" इत्यत्र "करिकर्णाग्निमाणकैः" इति पाठान्तरम् । अत्र सर्वसमं लौहं प्रदेयम् ॥ १६ ॥

शिवागुग्गुलौ ।—शिवा—हरीतकी, विभीतं—विभीतकी । "मुष्टि-चतुष्टयम्" इति—अर्द्धशरावम् ; पिचुत्रयमिति—तोलकषट्कम् । पुरस्य—गुग्गुलोः, कणा—पिप्पली, जटा—जटामांसी, नागरं—शुण्ठी । "प्रत्येकशः कोलमितम्" इति—प्रत्येकं तोलकमितम् ॥ १७—२० ॥

त्रिवृतात्रिफलाचार-पिप्पलीनां पलं तथा।
शट्येलातेजपत्राणां चविकानां पलं तथा ॥ २३ ॥
अभ्रं लौहं तथा वङ्गं प्रत्येकञ्च पलं पलम्।
एतेषां सर्वचूर्णानां खण्डं दद्यात् गुणत्रयम् ॥ २४ ॥
घृतेन मधुना मिश्रं कर्षमात्रन्तु मोदकम्।
एकैकं भक्षयेत् प्रातः शृतञ्चानुपिबेत् पयः ॥ २५ ॥
शूलघ्नो रक्तपित्तघ्नश्चाम्लपित्तविनाशनः।
आमबातकुलध्वंसी केशरी विधिनिर्मितः ॥ २६ ॥

योगवाहिरसान्तरप्रयोगोपदेशः।—

रामवाणो रसो देयो योगवाहिरसेन्द्रकाः।
आमवाते विधीयन्ते सानुपानैः प्रयत्नतः ॥ २७ ॥

[इति आमवात-चिकित्सा]।

अथ शूलरोग-चिकित्सा।—

—०*०—

सप्तामृतलौहम्।—

मधुकं त्रिफलाचूर्णमयोरजः समं लिहन्।
मधुसर्पिर्युतं सम्यक् गव्यक्षीरं पिबेदनु ॥ १ ॥

आमवातगजसिंहमोदके।—आदौ खण्डं किञ्चिज्जलञ्च संमिश्य मृद्वग्निसन्तापे उष्णीकृत्य, ततश्चूर्णादि सर्वं प्रक्षिप्य मोदकवत् पचेत्; घृतमधुनी च प्रक्षेप्ये ॥ २१—२७ ॥

इति आमवाताधिकारः।

छर्दिं सतिमिरं शूलमम्लपित्तं ज्वरारुचिम् ।
मूत्रकृच्छ्रं तथा मेहं हन्यादेतन्न संशयः ॥ २ ॥

त्रिफलालौहम् ।—

तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् ।
क्षीरेण पाययेद्धीमान् सद्यः शूलनिवारणम् ॥ ३ ॥

चतुःसमलौहम् ।—

अभ्रं ताम्रं रसं लौहं गन्धकं संस्कृतं पलम् ।
सर्वमेतत् समाहृत्य यत्नतः कुशलो भिषक् ॥ ४ ॥
आज्ये पले द्वादशके दुग्धे वत्सरसंख्यके ।
पक्त्वा तत्र क्षिपेत् चूर्णं सुपूतं घनवाससा ॥ ५ ॥
विड़ङ्गत्रिफलावह्नि-त्रिकटूनां तथैव च ।
पिष्ट्वा पलोन्मितानेतानथ संमिश्रितान् नयेत् ॥ ६ ॥
ततः पिष्ट्वा शुभे भाण्डे स्थापयेच्च विचक्षणः ।
आत्मनः शोभने चाह्नि पूजयित्वा रविं गुरुम् ॥ ७ ॥
घृतेन मधुनाऽऽलोड्य भक्षयेत् माषकादिकम् ।
अष्टौ माषान् क्रमेणैव वर्द्धयेच्च समाहितः ॥ ८ ॥

आमवाते शूलं भवति इत्यनन्तरं शूलचिकित्सामाह,—मधुकमित्यादि । सप्तामृतलौहे ।—"सममयोरजः" इति- सर्वद्रव्यसमं लौहमित्यर्थः । "मूत्रकृच्छ्रं * * * संशयः" इत्यत्र "आनाहं मूलसादञ्च शोथञ्चैव निहन्ति च" इति पाठान्तरम् ॥ १।२ ॥

त्रिफलालौहे ।—त्रिफलाचूर्णसमं लौहम् ॥ ३ ॥

चतुःसमलौहे ।—"अभ्रं * * * पलम्" इत्यत्र "अभ्रं गन्धं रसं लौहं प्रत्येकं संस्कृतं पलम्" इति पाठान्तरम् । अभ्रादिलौहान्तं द्रव्यचतुष्कं

अनुपानं प्रयोक्तव्यं नारिकेलजलं पयः।
जीर्णे लोहितशाल्यन्नं मुद्गमांसरसं तथा ॥ ९ ॥
भक्षयेत् घृतसंयुक्तं सद्यः शूलात् विमुच्यते।
हृच्छूलं पार्श्वशूलञ्च सामवातं कटीग्रहम्।
गुल्मशूलं शिरःशूलं योगेनानेन नाशयेत् ॥ १० ॥

पञ्चात्मको रसः।—

मृतसूताभ्रकं चाम्ल-वेतसं ताम्रगन्धकम्।
विषं फलत्रयाच्चूर्णं तुल्यं मद्यं दिनावधि ॥ ११ ॥
जयन्ती मुण्डिरी वासा वृहती च गुडूचिका।
महाराष्ट्री जम्बूरसैस्तथा नीलोत्पलस्य च ॥ १२ ॥
प्रतिद्रावैर्दिनं भाव्यं ततः संशोष्य यत्नतः।
अर्द्धांशं पञ्चलवणं दत्त्वाऽऽर्द्रकरसेन च ॥ १३ ॥
दिनं पेष्यं ततः कुर्य्याद् वटिकां चणसम्मिताम्।
प्रातर्मध्याह्नरात्रौ च भक्षयेद् वटिकात्रयम् ॥ १४ ॥
माषेक्षुपिष्टगुर्वन्नं गोपयश्च हितं तथा।
सेवेत वातशूलार्त्तो रसं पञ्चात्मकं शुभम् ॥ १५ ॥

प्रत्येकं पलम्। रामसेनस्तु—"अभ्रं ताम्रं रसं गन्धं लौहं प्रत्येकशः पलम्" इति पाठान्तरं स्वीकृत्य अभ्रादि-गन्धान्तानां मिलितानां चतुर्णां द्रव्याणां तुल्यं लौहं गृह्णाति ; अतश्चास्य चतुःसमलौहमिति संज्ञा इति वदति। "दुग्धे वत्सरसङ्ख्याके" इति—द्वादशपले दुग्धे। विड़ङ्गादी-नामष्टद्रव्याणां चूर्णं मिलित्वा पलं पाके निष्पत्तौ प्रक्षिपेत् ॥ ४—१० ॥

पञ्चात्मकरसे।—महाराष्ट्री—ब्रह्मयष्टिः, "अर्द्धांशं पञ्चलवणम्" इति।—सर्वद्रव्यापेक्षया मिलितं पञ्चलवणमर्द्धांशम् ॥ ११—१५ ॥

• धात्रीलौहम् ।—

कुड़वं शुद्धमण्डूरं यवञ्च कुड़वं तथा ।
पाकार्थञ्च जलं प्रस्थं चतुर्भागावशेषितम् ॥ १६ ॥
शतावरीरसस्याष्टावामलक्या रसस्य च ।
तथा दधि पयो भूमि-कुष्माण्डस्य चतुःपलम् ॥ १७
चतुःपलमिक्षुरसं दद्यात् तत्र विचक्षणः ।
प्रक्षिपेत् जीरकं धान्यं त्रिजातं करिपिप्पलीम् ॥ १८ ॥
मुस्तं हरीतकीञ्चैव अभ्रं लौहं कटुत्रयम् ।
रेणुका त्रिफला चैव तालीशं स्वर्णकेशरम् ॥ १९ ॥
कटुकं मधुकं रास्ना चाश्वगन्धा च चन्दनम् ।
एतेषां कार्षिकं भागं चूर्णयित्वा विनिक्षिपेत् ॥ २० ॥
भोजनाद्यवसाने च मध्ये चैव समाहितः ।
तोलैकं भक्षयेन्नित्यमनुपानं पयस्तथा ॥ २१ ॥
शूलमष्टविधं हन्ति साध्यासाध्यमथापि वा ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥ २२ ॥
परिणामसमुत्थञ्च ह्यन्नद्रवभवं तथा ।
द्वन्द्वजानपि शूलांश्च ह्यम्लपित्तं सुदारुणम् ।
सर्वशूलहरं श्रेष्ठं धात्रीलौहमिदं शुभम् ॥ २३ ॥

धात्रीलौहे ।—"कुड़वं शुद्धमण्डूरम्" इत्यत्र "षट्पलं शुद्धमण्डूरं" तथा "पाकार्थञ्च जलं प्रस्थम्" इत्यत्र "पाकाय नीरप्रस्थार्द्धम्" इति पाठान्तरम् ; एवं "चतुःपलमिक्षुरसम्" इत्यादौ "चतुष्पलं सर्पिरिक्षुरसं दद्यात् विचक्षणः" इति तथा "अभ्रं लौहं कटुत्रयम्" इत्यत्र

शूलराजलौहम्।—

कर्षैकं कान्तलौहस्य शुद्धमभ्रं पलं तथा।
सितायाश्च पलञ्चैकं मधु सर्पिस्तथैव च ॥ २४ ॥
सर्वमेकीकृतं पात्रे लौहदण्डेन मर्दयेत्।
त्रिकटु त्रिफला मुस्तं विडङ्गं चव्यचित्रकम् ॥ २५ ॥
प्रत्येकं तोलकं मानं चूर्णितं तत्र दापयेत्।
भक्षयेत् प्रातरुत्थाय शिशिराम्बनुपानतः ॥ २६ ॥
सर्वदोषभवं शूलं कुक्षिशूलञ्च यत् भवेत्।
हृच्छूलं पार्श्वशूलञ्च अम्लपित्तञ्च नाशयेत् ॥ २७ ॥
अर्शांसि ग्रहणीदोषं प्रमेहांश्च विसूचिकाम्।
शूलराजमिदं लौहं हरेण परिनिर्मितम् ॥ २८ ॥

विद्याधराभ्रम्।—

विडङ्गमुस्तत्रिफलागुडूची-दन्तीत्रिवृद्धङ्किकटुत्रिकञ्च।
प्रत्येकमेषां पिचुभागचूर्णं पलानि चत्वार्य्ययसो मलस्य ॥ २९ ॥
गोमूत्रशुद्धस्य पुरातनस्य यद्वाऽयसस्तानि शिवाटिकायाः।
कृष्णाभ्रचूर्णस्य पलं विशुद्धं निश्चन्द्रकं शुद्धमतीव सूतात् ॥ ३० ॥

"ताम्रं लौहं कटुत्रयम्" इति च पाठान्तरम्। कुड़वपरिमितयवस्य क्वाथे मण्डूरं शतावरीरसादींश्च प्रक्षिप्य पचेत्। पाकशेषे जीरकादिचूर्णं प्रक्षेप्यम्। त्रिजातं—त्रिसुगन्धि, एला, तेजपत्रं, गुड़त्वक् इत्यर्थः। स्वर्णकेशरं—नागकेशरम्। मात्रा चास्य माषकद्वयमारभ्य तोलकं यावत् ॥ १६—२८ ॥

विद्याधराभ्रे।—विड़ङ्गादिकटुत्रिकान्तानां द्वादशद्रव्याणां प्रत्येकं पिचुः कर्षः, उपलक्षणत्वात् पलं वा। "यद्वाऽयसस्तानि शिवाटिकायाः"

पादोनकर्षं स्वरसेन खल्ले शिलातले मन्दुमणीदलस्य ।
संमर्द्य पश्चादतिशुद्धगन्ध-पाषाण चूर्णेन पिचूम्मितेन ॥ ३१ ॥
युक्त्या ततः पूर्वरजांसि दत्त्वा सर्पिर्मधुभ्यामवमर्द्य यत्नात ।
निधापयेत् स्निग्धविशुद्धभाण्डे ततः प्रयोज्यास्य रसायनस्य ॥३२॥
प्राङ्माषको वाऽप्यथवा द्वितीयो गव्यं पयो वा शिशिरं जलं वा ।
पिबेदयं योगवरः प्रभूत-कालप्रनष्टानलदोपकश्च ॥ ३३ ॥
रोगं निहन्यात् परिणामशूलं शूलं तथाऽन्नद्रवसंज्ञकञ्च ।
यक्ष्माऽम्लपित्तं ग्रहणीं प्रवृद्धां जीर्णज्वरं लोहितपित्तमुग्रम् ।
न सन्ति ते यान्न निहन्ति रोगान् योगोत्तमः सम्यगुपास्यमानः॥३४

बृहद्विद्याधराभ्रम ।—

शुद्धसूतं तथा गन्धः फलत्रयकटुत्रयम् ।
विडङ्गं मुस्तकं दन्ती त्रिवृता चित्रकं तथा ॥ ३५ ॥

इति ।—यद्वा लौहस्य चत्वारि पलानि, अथवा लौहपत्रिकायाः चत्वारि पलानि । शिवाटिका—वंशपत्री । अत्र चिराटिका इति पाठे—लौहचटकेति भैषज्यरत्नावल्यां शूलाधिकारे गोविन्ददासः । "सूतात् पादोनकर्षम्" इति ।—पादहीनकर्षं, चतुर्दशमाषकमित्यर्थः । मन्दुमणीदलं—थान्कुनीति यस्य प्रसिद्धिः । थान्कुनीरसेन पारदं संशोध्य संमर्द्य पश्चात् गन्धकचूर्णं कर्षमितं दत्त्वा संमर्द्य च विडङ्गादिचूर्णं प्रक्षिप्य घृतभाण्डे स्थापनीयम्; ततो लौहपात्रे लौहदण्डेन घृतमधुभ्यां माषैकं पुरुषापेक्षया माषद्वयं वा संमर्द्य लिह्यात् । चतुःषष्टिगुणं गव्यदुग्धं शिशिरतोयं वा अनुपेयम् । अत्र मण्डूरस्थाने लौहं ग्राह्यम्; तच्च परिणामशूलेऽतिप्रशस्तम् । "प्राङ्माषको वाऽप्यथवा द्वितीयो" इत्यत्र "प्राङ्माषैको द्वावथ वा त्रयो वा" इति पाठान्तरम् ॥ २९—३४ ॥

आखुपर्णी ग्रन्थिकञ्च प्रत्येकं कर्षसम्मितम्।
पलं कृष्णाभ्रचूर्णस्य मृतायश्च चतुर्गुणम्॥ ३६॥
घृतेन मधुना पिष्ट्वा वटिकां कोलसम्मिताम्।
एकैकां वटिकां खादेत् प्रातरुत्थाय नित्यशः॥ ३७॥
अनुपानं गवां क्षीरं नीरं वा नारिकेलजम्।
सर्वशूलं निहन्त्याशु वातपित्तभवं तथा॥ ३८॥
एकजं द्वन्द्वजञ्चैव तथैव सान्निपातिकम्।
परिणामोद्भवं शूलमामवातोद्भवं तथा॥ ३९॥
कार्श्यं वैवर्ण्यमालस्यं तन्द्राऽरुचिविनाशनम्।
साध्यासाध्यं निहन्त्याशु भास्करस्तिमिरं यथा॥ ४०॥

सर्वाङ्गसुन्दरो रसः।—

शुद्धसूतं तथा ताम्रं शिलामाक्षिकतालकम्।
रजतं स्वर्णवङ्गञ्च लौहमभ्रं सनागरम्॥ ४१॥
चूर्णयेत् पञ्चलवणं देयं सर्वन्तु तुल्यकम्।
गन्धकं मिश्रयेत् सर्वं रसैरेषां विभावयेत्॥ ४२॥
शुण्ठी-जयन्ती-विजया-महाराष्ट्रिक-धूर्त्तजैः।
सर्वाङ्गसुन्दरो नाम्ना रसोऽयं विष्णुनिर्मितः॥ ४३॥
खादेदेरण्डशुण्ठीभ्यां माषमात्रं दिने दिने।
कफवातामयं हन्ति चानुपानं वदाम्यहम्॥ ४४॥

वृद्धविद्याधराभ्रे।—ग्रन्थिकं—पिप्पलीमूलम्। "अनुपानं गवां क्षीरम्" इति।—चतुःषष्टिगुणम्॥ ३५—४०॥

व्योषं सौवर्च्चलं हिङ्गु करञ्जवीजसंयुतम् ।
पिवेदुष्णाम्बुना चानु सर्वशूलनिकृन्तनम् ॥ ४५ ॥

शूलवज्रिणी वटिका ।—

रसगन्धकलौहानां पलार्द्धेन समन्वितम् ।
त्रिफला रामठं शुल्वं शटी त्रिकटु टङ्कणम् ॥ ४६ ॥
एवं त्वगेला-तालीश-जातीफल-लवङ्गकम् ।
यमानी जीरकं धान्यं प्रत्येकं तोलकं मतम् ॥ ४७ ॥
माषिका वटिका कार्य्या छागीदुग्धेन वा पुनः ।
एकैका भक्षिता चेयं वटिका शूलवज्रिणी ॥ ४८ ॥
शूलमष्टविधं हन्ति प्लीहगुल्मोदरं तथा ।
अम्लपित्तामवातञ्च पाण्डुत्वं कामलां तथा ॥ ४९ ॥
शोथं गलग्रहं वृद्धिं श्लीपदं सभगन्दरम् ।
वृद्धबालकरी चैव मन्दाग्नेरपि दीपनी ॥ ५० ॥

त्रिपुरभैरवो रसः ।—

भागो रसस्याश्महेम्नः भागो ग्राह्योऽतियत्नतः ।
तयोर्द्वादशभागानि ताम्रपत्राणि लेपयेत् ॥ ५१ ॥

सर्वाङ्गसुन्दररसे ।—महाराष्ट्री—ब्रह्मयष्टिः, व्योषं—त्रिकटु ॥ ४१—४५ ॥

शूलवज्रिणी वटिकायाम् ।—"रस * * * समन्वितम्" इत्यत्र "रसगन्धकलौहाभ्रं प्रत्येकञ्च पलार्द्धकम्" इति "पलार्द्धं लौहमभ्रञ्च कर्षञ्च रसगन्धकम्" इति च पाठान्तरद्वयं दृश्यते, एवं "शुल्वम्" इत्यत्र "शुण्ठी" इति पाठान्तरम् ॥ ४६—५० ॥

पचेत् शूलहरः सूतो भवेत् त्रिपुरभैरवः।
माषो मध्वाज्यसंयुक्तो देयोऽस्य परिणामजे।
अन्ये त्वेरण्डतैलेन हिङ्गुत्र्ययुतो रसः॥ ५२॥

अग्निमुखो रसः।—

रसबलिगगनार्कं वेतसाम्लं विषं स्यात्
सवरमिह पृथक् स्याद् भावयेद् घस्रमेतैः।
कनकभुजगवल्ली-कण्टकारीजयाऽद्भिः
कमलसलिलवासा-मुष्टिवज्राम्बुपूरैः॥ ५३॥
अरुणसदृशपाकैर्मातुलुङ्गैश्च योज्यः
पटुगण इह तुल्यो भावयेदार्द्रकाद्भिः।
दहनवदननाम्ना वल्लमात्रो निहन्ति
प्रबलसकलशूलं तद्विकारानशेषान्॥ ५४॥

शूलगजकेशरी रसः।—

शुद्धसूतं द्विधा गन्धं यामैकं मर्दयेद् दृढम्।
द्वयोस्तुल्यं शुद्धताम्रं सम्पुटे सन्निवेशयेत्॥ ५५॥

त्रिपुरभैरवे।—अश्महेम्नः,—गन्धकस्य॥ ५१।५२॥

अग्निमुखरसे।—रसबलिगगनार्कं—रसगन्धकाभ्रताम्रम्। सवरमिति—त्रिफलासहितं, कनकं—धुस्तूरं, भुजगवल्ली—पर्णं, जया—जयन्ती, सलिलं—बालकम्; मुष्टिः,—कुचिलं, वज्राम्बु—स्नुहीक्षीरम्। पुरः,—गुग्गुलुः; अत्र छन्दोऽनुरोधात् दीर्घत्वम्। पटुगणः,—पञ्चलवणम्॥ ५३।५४॥

शूलगजकेशरीरसे।—तस्य ताम्रस्य सम्पुटे सम्पुटं निर्माय तस्मिन्

ऊर्द्ध्वाधो लवणं दत्त्वा मृद्भाण्डे स्थापयेद् भिषक् ।
रुद्ध्वा गजपुटं दत्त्वा स्वाङ्गशीतं समुद्धरेत् ॥ ५६ ॥
सम्पुटं चूर्णयेत् श्लक्ष्णं पर्णखण्डे द्विगुञ्जकम् ।
भक्षयेत् सर्वशूलार्त्तो सशुण्ठीहिङ्गुजीरकम् ॥ ५७ ॥
वचामरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ।
असाध्यं नाशयेत् शूलं श्रीशूलगजकेशरी ॥ ५८ ॥

त्रिगुणाख्यो रसः ।—

टङ्कणं हारिणं शृङ्गं स्वर्णं गन्धः मृतं रसम् ।
दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा पुटे पचेत् ॥ ५९ ॥
त्रिगुणाख्यो रसो नाम्ना माषैकं मधुसर्पिषा ।
सैन्धवं जीरकं हिङ्गु मध्वाज्याभ्यां लिहेदनु ।
पक्तिशूलहरः ख्यातो याममात्रान्न संशयः ॥ ६० ॥

शूलहरणयोगः ।—

हरीतकी त्रिकटुकं कुचिलं हिङ्गु सैन्धवम् ।
गन्धकञ्च समं सर्वं वटीं कुर्य्यात् सुखावहाम् ॥ ६१ ॥
लघुकोलप्रमाणान्तु शस्यते प्रातरेव हि ।
एकैका वटिका ग्राह्या गुल्मशूलविनाशिनी ॥ ६२ ॥

सूतकगन्धककज्जलं दत्त्वा रोधयेत् लेपं विनैव । खल्पमृद्भाण्डे पलद्वयलवणप्रवेशयोग्ये पलैकं लवणं निक्षिप्य लवणमध्ये सम्पुटकं स्थापयित्वा अपरलवणपलेन आच्छाद्य भाण्डमुखं कर्पटेन आच्छाद्य लिप्त्वा च गजपुटे पचेत् । तस्मादाकृष्य सम्पुटं चूर्णयेत् । अनुपानञ्च हिङ्गुशुण्ठ्यादिचूर्णं माषैकम् ; कर्षमित्युपलक्षणम् ॥ ५५—५८ ॥

ग्रहण्यामतिसारे च साजीर्णे मन्दपावके।
योजयेदुष्णपयसा सुखमाप्नोति निश्चितम्।
सुवर्णञ्च भवेत् देहं सदोत्साहयुतं नृणाम्॥ ६३॥

शर्करालौहम् ।—

त्रिफलायास्तथा धात्र्याश्चूर्णं वा काललौहजम्।
शर्कराचूर्णसंयुक्तं सर्वशूलेषु योजयेत्॥ ६४॥

शङ्खादिचूर्णम्।—

शङ्खचूर्णस्य च पलं पञ्चैव लवणानि च।
क्षारं टङ्कणकं जाती शतपुष्पा यमानिका॥ ६५॥
हिङ्गु त्रिकटुकञ्चैव सर्वमेकत्र चूर्णयेत्।
आमवातं यकृच्छूलं परिणामसमुद्भवम्।
अन्नद्रवकृतं शूलं शूलञ्चैव त्रिदोषजम्॥ ६६॥

अपथ्यानि।—

व्यायामं मैथुनं मद्यं लवणानि कटूनि च।
वेगरोधं शुचं क्रोधं वर्जयेत् शूलवान् नरः॥ ६७॥

[इति शूलरोग-चिकित्सा]।

त्रिगुणाख्यरसे।—लिह्यात् स्थाने लिहेदित्यार्षः प्रयोगः॥ ५९—६३॥
शर्करालौहे।—लौहचूर्णं सर्वतुल्यम्॥ ६४॥
शङ्खादिचूर्णे।—शङ्खस्य—दग्धशङ्खस्य, क्षारं टङ्कणकमिति—टङ्कणक्षारम्। अत्र क्षारं—यवक्षार इति रामसेनः॥ ६५—६७॥

[इति शूलाधिकारः]।

अथोदावर्त्तानाह-चिकित्सा ।—

—०*०—

वैद्यनाथवटी ।—

पथ्या त्रिकटु सूतञ्च द्विगुणं कानकं तथा ।
मन्युमणीरसैरम्ल-लोणिकाया रसैः कृता ॥ १ ॥
गुड़िकोदरगुल्मादि-पाण्डामयविनाशिनी ।
क्रिमिकुष्ठगात्रकण्डू-पिड़कांश्च निहन्ति हि ।
गुड़ी सिद्धफला चेयं वैद्यनाथेन भाषिता ॥ २ ॥

बृहत् इच्छाभेदी रसः ।—

शुद्धं पारदटङ्गणं समरिचं गन्धाश्मतुल्यं त्रिवृत्
विश्वा च द्विगुणा ततो नवगुणं जैपालचूर्णं क्षिपेत् ।
खल्ले दण्डयुगं विमर्द्य विधिना चार्कस्य पत्रे ततः
स्वेदं गोमयवह्निना च मृदुना स्वेच्छावशाद्भेदकः ॥ ३ ॥
गुञ्जैकप्रमितो रसो हिमजलैः संसेवितो रेचयेत्
यावन्नोष्णजलं पिबेदपि वरं पथ्यञ्च दध्योदनम् ।

उदावर्त्तेऽपि शूलं भवतीति शूलानन्तरमुदावर्त्तचिकित्सामाह। वैद्यनाथवटिकायाम् ।—पथ्या—हरीतकी, कानकं—जैपालम् ; मन्युमणी—थानकुनीति ख्याता ॥ १।२ ॥

बृहदिच्छाभेदिरसे ।—गन्धाश्म,—गन्धकः। "नवगुणं जैपालचूर्णम्" इति ।—एकभागापेक्षया नवगुणं जैपालचूर्णमित्यर्थः। गुञ्जै-

आमं सर्वभवं सुजीर्णमुदरं गुल्मं विशालं हरेत्
वह्नेर्दीप्तिकरो बलासहरणः सर्वामयध्वंसनः ॥ ४ ॥

योगवाहिरसादिप्रयोगोपदेशः ।—

योगवाहिरसान् सर्वान् रेचके कथितानपि ।
प्लीहाधिकारे कथितं रसेन्द्रं वारिशोषणम् ।
उदावर्त्ते तथाऽऽनाहे प्रयुञ्जीतानुपानतः ॥ ५ ॥

लौहप्रयोगः ।—

पुटितं भावितं लौहं त्रिवृत्क्वाथैरनेकशः ।
उदावर्त्तहरं युञ्ज्यात् ससितं वा यथाबलम् ॥ ६ ॥

उदरोक्तरसप्रयोगोपदेशः ।—

उदावर्त्ते प्रयोक्तव्या उदरोक्ता रसाः खलु ॥ ७ ॥

[इत्युदावर्त्तानाह-चिकित्सा]।

केत्यादि ।—रक्तिमाना वटी शीतलजलैः खाद्या इत्यर्थः ; शोधने कर्त्तव्ये उष्णजलं पेयमित्यर्थः। सर्वभवं—त्रिदोषजन्यमित्यर्थः। सुजीर्णमुदरं —दीर्घकालोत्पन्नम् उदररोगम्। विशालं—प्रवृद्धम् इत्यर्थः। रेचके कथितान्—विरेचनाधिकारोक्तान्। "त्रिवृत्क्वाथैरनेकशः" इति ।— पुटितं लौहं त्रिवृत्क्वाथैः सप्तवारान् भावयित्वा त्रिवृताक्वाथेन एव प्रयोज्यम् इत्यर्थः। ससितं—शर्करासहितम् ॥ ३—७ ॥

[इति उदावर्त्तानाहाधिकारः]।

अथ गुल्मरोग-चिकित्सा ।—

—००*००

महानाराचरसः ।—

ताम्रं सूतं समं गन्धं जैपालञ्च फलत्रिकम् ।
कटुकं पेषयेत् क्षारैर्निष्कं गुल्महरं पिबेत् ।
उष्णोदकं पिबेच्चानु नाराचोऽयं महारसः ॥ १ ॥

पञ्चाननरसः ।—

पारदं शिखितुत्थञ्च गन्धजैपालपिप्पलीः ।
आरग्वधफलान्मज्जां वज्रीक्षीरेण पेषयेत् ॥ २ ॥
धात्रीरसयुतं खादेद्रक्तगुल्मप्रशान्तये ।
चिञ्चाफलरसञ्चानु पथ्यं दध्योदनं हितम् ॥ ३ ॥

गुल्मवज्रिणी वटिका ।—

रसगन्धकताम्रञ्च कांस्यं टङ्कणतालकम् ।
प्रत्येकं पलिकं ग्राह्यं मर्दयेदतियत्नतः ॥ ४ ॥

गुल्मोऽप्यानाहो भवतीत्यानाहानन्तरं गुल्मचिकित्सामाह । महानाराचरसे ।—फलत्रिकं—त्रिफला । कटुकं—त्रिकटुकं, क्षारैः,—टङ्कण-स्वर्जिका-यवक्षाररूपैः क्षारत्रयैः । निष्कम्—अर्द्धतोलकम् ; एतत्तु पूर्व-युगाभिप्रायेण ; अधुना तु गुञ्जात्रयं चतुष्टयं वा खाद्यम् ॥ १ ॥

पञ्चाननरसे ।—शिखितुत्थं—शिखिग्रीवाभं तुत्थम् । आरग्वधः,—"सोँदाल्" इति ख्यातः । वज्रीक्षीरैः,—स्नुहीदुग्धैः । धात्री—आमलकी । चिञ्चाफलरसञ्चान्विति—तिन्तिड़ीफलरसञ्चानुपानम् ॥ २।३ ॥

तद् यथाऽग्निबलं खादेद्रक्तगुल्मप्रशान्तये।
निर्म्मिता नित्यनाथेन वटिका गुल्मवज्रिणी ॥ ५ ॥
गुल्मप्लीहोदराष्ठीला-यकृदानाहनाशिनी।
कामलापाण्डुरोगघ्नी ज्वरशूलविनाशिनी ॥ ६ ॥

गुल्मकालानलो रसः।—

सूतकं लौहकं ताम्रं तालकं गन्धकं समम्।
तोलद्वयमितं भागं यवक्षारञ्च तत्समम् ॥ ७ ॥
मुस्तकं मरिचं शुण्ठीं पिप्पलीं गजपिप्पलीम्।
हरीतकीं वचां कुष्ठं तोलैकं चूर्णयेद्बुधः ॥ ८ ॥
सर्वमेकीकृतं पात्रे क्रियन्ते भावनास्ततः।
पर्पटं मुस्तकं शुण्ठ्यपामार्गं पापचेलिमम् ॥ ९ ॥
तत्पुनश्चूर्णयेत् पश्चात् सर्वगुल्मनिवारणम्।
गुञ्जाचतुष्टयं खादेद्धरीतक्यनुपानतः ॥ १० ॥
वातिकं पैत्तिकं गुल्मं तथा चैव त्रिदोषजम्।
द्वन्द्वजं श्लैष्मिकं हन्ति वातगुल्मं विशेषतः।
गुल्मकालानलो नाम सर्वगुल्मकुलान्तकृत् ॥ ११ ॥

गुल्मवज्रिणीवटिकायाम्। टङ्कणं—"सोहागा" इति ख्यातं, तालकं —हरितालम् ॥ ४—६ ॥

गुल्मकालानलरसे।—लौहकमित्यत्र टङ्कणमिति पाठान्तरम्। "यवक्षारञ्च तत्समम्" इति—सर्वद्रव्यसमम्। पापचेलिमम्—"आक्नादि" इति ख्यातम्। पर्पटादिभिः प्रत्येकस्य सप्त सप्त भावनाः कार्य्याः; भावनाऽन्ते शुष्कीकृत्य चूर्णयित्वा स्थापितव्यः। "हरीतक्यनुपानतः" इति।—क्वाथं चूर्णं वा अनुपानम्। "पर्पटं * * * पापचेलिमम्"

वड़वानलो रसः।

पारदं गन्धकं ताप्यं यवक्षारार्कमभ्रकम्।
अग्न्यम्बुनाऽहिपत्रेण संमर्द्याथ द्विगुञ्जकम् ॥ १२ ॥
भक्षयेत् पर्णखण्डेन हिङ्गुसिन्धुसुवर्चलैः।
दाड़िमञ्च तथा विल्वं कार्षिकं भृङ्गजैर्द्रवैः ॥ १३ ॥
पिष्ट्वा तु सुरया युक्तं देयं स्यादनुपानकम्।
सर्वगुल्मं निहन्त्याशु शूलञ्च परिणामजम् ॥ १४ ॥

महानाराचरसः।—

सूतटङ्कणतुल्यांशं मरिचं सूततुल्यकम्।
गन्धकं पिप्पलीशुण्ठ्योः द्वौ द्वौ भागौ विमिश्रयेत् ॥ १५ ॥
सर्वतुल्यं क्षिपेद् दन्ती-वीजं निस्तुषमेव च।
द्विगुञ्जं रेचनं सिद्धं नाराचाख्यो महारसः ॥ १६ ॥

इत्यत्र "पर्पटं हस्तिशुण्डो च ह्यपामार्गं पटोलकम्" इति पाठान्तरम् ॥ ७—११ ॥

वड़वानलरसे।—ताप्यं—स्वर्णमाक्षिकम्, अर्कः,—ताम्रम्, अग्न्यम्बुना—चित्रकक्वाथेन, तथा अहिपत्रेण—नागवल्लीपत्रेण च, पर्णपत्रेण इत्यर्थः, संमर्द्य रक्तिद्वयमितां वटीं कृत्वा पश्चात् पर्णखण्डेन भक्षयेत्; हिङ्ग्वादिचूर्णं त्वनुयोज्यम्। सुवर्चलं,—सौवर्चललवणं, विल्वं—विल्वमूलत्वक्। भृङ्गजैर्द्रवैः,—भृङ्गराजरसैः ॥ १२—१४ ॥

महानाराचरसे।—सूतादिद्रव्यत्रयं प्रत्येकमेकभागसमम्; सर्वतुल्यमिति—दन्तीवीजञ्च सर्वचूर्णसमम्। निस्तुषं—त्वग्रहितम् ॥ १५।१६ ॥

विद्याधररसः।—

पारदं गन्धकं तालं ताप्यं स्वर्णं मनःशिलाम्।
कृष्णाक्वाथैः स्नुहीक्षीरैर्दिनैकं मर्दयेत् सुधीः॥ १७॥
निष्कार्द्धं श्लैष्मिकं गुल्मं हन्ति मूत्रानुपानतः।
रसो विद्याधरो नाम गोदुग्धञ्च पिबेदनु॥ १८॥

महागुल्मकालानलो रसः।—

गन्धकं तालकं ताम्रं तथैव तीक्ष्णलौहकम्।
समांशं मर्दयेत् गाढ़ं कन्यानीरेण यत्नतः॥ १९॥
सम्पुटं कारयेत् पश्चात् सन्धिलेपञ्च कारयेत्।
ततो गजपुटं दत्त्वा साङ्गशीतं समुद्धरेत्॥ २०॥
द्विगुञ्जां भक्षयेद् गुल्मी शृङ्गवेरानुपानतः।
सर्वगुल्मं निहन्त्याशु भास्करस्तिमिरं यथा॥ २१॥

अभयावटी।—

अभया मरिचं कृष्णा टङ्कणञ्च समांशिकम्।
सर्वचूर्णसमञ्चैव दद्यात् कानकजं फलम्॥ २२॥
स्नुहीक्षीरैर्वटी कार्य्या धीरैः स्विन्नकलायवत्।
वटीद्वयं शिवामेकां पिष्ट्वा चोष्णाम्बुना पिबेत्॥ २३॥

विद्याधररसे।—तालं—हरितालं, ताप्यं—स्वर्णमाक्षिकम्। "ताप्यं स्वर्णम्" इत्यत्र "तुत्थं ताम्रम्" इति पाठान्तरम्। कृष्णाक्वाथैः,—पिप्पली-क्वाथैरित्यर्थः। निष्कार्द्धं—माषद्वयम्॥ १७।१८॥

महागुल्मकालानले।—कन्यानीरेण—घृतकुमारीरसेन। शृङ्गवेरानु-पानतः,—आर्द्रकरसानुपानेन॥ १९—२१॥

अभयावटिकायाम्।—कानकजं फलं—जैपालफलम्। शिवा-

उष्णाद्विरेचयेद्देषा शीते स्वास्थ्यमुपैति च ।
जीर्णज्वरं पाण्डुरोगं प्लीहाष्ठीलोदराणि च ।
रक्तपित्ताम्लपित्तादि सर्वाजीर्णञ्च नाशयेत् ॥ २४ ॥

गोपीजलः ।—

जैपालाष्टौ द्विको गन्धः शुण्ठो मरिचचित्रकम् ।
एकः सूतः ससौभाग्यो गोपीजल इति स्मृतः ॥ २५ ॥
शूलव्याध्याश्रयान् गुल्मान् कोष्ठादौ दश पैत्तिकान् ।
भगन्दरादिहृद्रोगान् नाशयेदेव भक्षणात् ॥ २६ ॥

काङ्कायनगुड़िका ।—

शटीं पुष्करमूलञ्च दन्तीं चित्रकमाढ़कीम् ।
शृङ्गवेरं वचाञ्चैव पलिकानि समाहरेत् ॥ २७ ॥
त्रिवृतायाः पलञ्चैकं कुर्य्यात् त्रीणि च हिङ्गुनः ।
यवक्षारात् पले द्वे च द्वे पले चाम्लवेतसात् ॥ २८ ॥
यमान्यजाजी मरिचं धान्यकञ्चेति कार्षिकम् ।
उपकुञ्च्यजमोदाभ्यां पृथगर्द्धपलं भवेत् ॥ २९ ॥
मातुलुङ्गरसेनैव गुड़िकां कारयेद्भिषक् ।
तामामिकां पिबेत् द्वे वा तिस्रो वाऽथ सुखाम्बुना ॥ ३० ॥

:मिति—हरीतकीम् । अस्याः वटीद्वयं तथा एकां हरीतकीम् ऐकध्यं पिष्ट्वा इत्यर्थः । उष्णाम्बुना—उष्णजलेन । उष्णात्—उष्णक्रियातः । शीते—शीतक्रियायां कृतायाम् ॥ २२—२४ ॥

गोपीजले ।—जैपालाष्टाविति—जैपालवीजस्य चाष्टौ भागाः ; एवमन्यत ॥ २५।२६ ॥

काङ्कायनगुड़िकायाम् ।—पुष्करमूलं—कुष्ठम् । आढ़कीं—तुवरीम्,

अम्लैर्मद्यैश्च यूषैश्च घृतेन पयसाऽथवा।
एषा काङ्कायनेनोक्ता गुड़िका गुल्मनाशिनी ॥ ३१ ॥
अर्शोहृद्रोगशमनी क्रिमीणाञ्च विनाशिनी।
गोमूत्रयुक्ता शमयेत् कफगुल्मं चिरोत्थितम् ॥ ३२ ॥
क्षीरेण पित्तगुल्मञ्च मद्यैरम्लैश्च वातिकम्।
त्रिफलारसमूत्रैश्च नियच्छेत् सान्निपातिकम्।
रक्तगुल्मेषु नारीणामुष्ट्रीक्षीरेण पाययेत् ॥ ३३ ॥

गुल्मशार्दूलो रसः।—

रसं गन्धं शुद्धलौहं गग्गुलोः पिष्टितं पलम्।
त्रिवृता पिप्पली शुण्ठी शटी धान्यकजीरकम् ॥ ३४ ॥
प्रत्येकं पलिकं ग्राह्यं पलार्द्धं कानकं फलम्।
सञ्चूर्ण्य वटिका कार्य्या घृतेन वल्लमानतः ॥ ३५ ॥
वटीद्वयं भक्षयेच्चार्द्रकोष्णाम्बु पिबेदनु।
हन्ति प्लीहयकृद्गुल्म-कामलोदरशोथकम् ॥ ३६ ॥
वातिकं पैत्तिकं गुल्मं श्लैष्मिकं रौधिरं तथा।
गहनानन्दनाथोक्त-रसोऽयं गुल्मशार्दूलः ॥ ३७ ॥

उपकुञ्ची—कृष्णजीरकम्; अजमोदा—यमानी। अत्र यमान्या भागद्वयं, दशतोलकमितमित्यर्थः। सुखाम्बुना—ईषदुष्णाम्बुना, अम्लैः,—काञ्जिकादिभिः ॥ २७—३३ ॥

गुल्मशार्दूलरसे।—गुग्गुलोः पिष्टितं—शोधितपीषितगुग्गुलोः पलमानं ग्राह्यम्। "गुग्गुलोः पिष्टितं पलम्" इत्यत्र "गुग्गुलोः पिप्पलं पलम्" इति वा पाठः। कानकं फलं—जैपालफलम्। वल्लमानतः,—वल्लमाना, द्विगुञ्जा परिमितेत्यर्थः ॥ ३४—३७ ॥

प्राणवल्लभो रसः ।—

लौहं ताम्रं वराटञ्च तुत्थं हिङ्गु फलत्रिकम् ।
स्नुहीमूलं यवक्षारं जैपालं टङ्कणं त्रिवृत् ॥ ३८ ॥
प्रत्येकं पलिकं ग्राह्यं छागीदुग्धेन पेषयेत् ।
चतुर्गुञ्जां वटीं खादेद् वारिणा मधुनाऽपि वा ॥ ३९ ॥
प्राणवल्लभनामायं गहनानन्दभाषितः ।
निहन्ति कामलां पाण्डुं मेहं हिक्कां विशेषतः ॥ ४० ॥
असाध्यं सन्निपातञ्च गुल्मं रुधिरसम्भवम् ।
वातरक्तञ्च कुष्ठञ्च कण्डू-विस्फोटकापचीम् ॥ ४१ ॥

सर्वेश्वरो रसः ।—

ताम्रं दशगुणं स्वर्णात् स्वर्णपादं कटुत्रिकम् ।
त्रिफला त्रिकटोः तुल्या त्रिफलाऽर्द्धमयोरजः ॥ ४२ ॥
अयसोऽर्द्धं विषञ्चैव सर्वं संमर्द्य यत्नतः ।
सर्वेश्वररसो नाम रक्तगुल्मविनाशनः ॥ ४३

[इति गुल्मरोग-चिकित्सा] ।

प्राणवल्लभरसे ।—वराटं—वराटकभस्म । स्नुहीमूलमिति—स्नुही-मूलक्षारम् । त्रिवृत्—त्रिवृन्मूलम् ॥ ३८—४१ ॥

सर्वेश्वररसे ।—स्वर्णपादमिति—स्वर्णस्य चतुर्थांशं मिलितत्रिकटु-चूर्णम् । त्रिफलाऽर्द्धमयोरजः,—मिलितत्रिफलाचूर्णार्द्धं लौहचूर्णम् ॥ ४२।४३ ॥

इति गुल्मरोगाधिकारः ।

अथ हृद्रोग-चिकित्सा ।—

—०*०—

हृदयार्णवो रसः ।—

शुद्धसूतसमं गन्धं मृतताम्रं तयोः समम् ।
मर्दयेत् त्रिफलाक्काथैः काकमाचीद्रवैर्दिनम् ॥ १ ॥
चणमात्रां वटीं खादेद् रसोऽयं हृदयार्णवः ।
काकमाचीफलं कर्षं त्रिफलाफलसंयुतम् ॥ २ ॥
द्वात्रिंशत् तोलकं तोयं क्काथमष्टावशेषितम् ।
अनुपानं पिबेच्चात्र हृद्रोगे च कफोत्थिते ॥ ३ ॥

नागार्जुनाभ्रम् ।—

सहस्रपुटनैः शुद्धं वज्राभ्रमर्जुनत्वचः ।
सत्त्वैर्विमर्दितं सप्त-दिनं खल्ले विशोषितम् ॥ ४ ॥
छायाशुष्का वटी कार्य्या नाम्नेदमर्जुनाह्वयम् ।
हृद्रोगं सर्वशूलार्शो-हृल्लासच्छर्द्यरोचकान् ॥ ५ ॥
अतीसारमग्निमान्द्यं रक्तपित्तं क्षतक्षयम् ।

गुल्मस्य हृदयं स्थानमुक्तम्, अतः स्थानसाम्याद् हृद्रोग उच्यते । शुद्धसूतसममित्यादौ ।—काकमाचीफलमिति ।—आदौ वटिकां भक्षयित्वा पश्चात् त्रिफला-काकमाचीफलानां मिलित्वा कर्षं गृहीत्वा क्काथविधिना विपाच्य अनुपानं कार्य्यम् इत्यर्थः ॥ १—३ ॥

शोथोदराम्लपित्तञ्च विषमज्वरमेव च ।
हन्त्यन्यान्यपि रोगाणि बल्यं वृष्यं रसायनम् ॥ ६ ॥

पञ्चानन रसः ।—

सूतगन्धौ द्रवैर्धात्र्या मर्दयेत् गोस्तनोद्रवैः ।
यष्टिखर्जूरसलिलैर्दिनञ्च परिमर्दयेत् ।
धात्रीचूर्णं सिताञ्चानु पिबेत् हृद्रोगशान्तये ॥ ७ ॥

[इति हृद्रोग-चिकित्सा] ।

अथ मूत्रकृच्छ्र-चिकित्सा ।—

त्रिनेत्राख्यो रसः ।—

वङ्गं सूतं गन्धकं भावयित्वा लौहे पात्रे मर्दयेदेकघस्रम् ।
दूर्वायष्टीगोक्षुरैः शाल्मलीभिः मूषामध्ये भूधरे पाचयित्वा ॥ १ ॥

नागार्जुनाभ्रे ।—अर्जुनत्वचः सत्त्वैरिति—अर्जुनवल्कलक्वाथैरित्यर्थः ॥ ४—६ ॥

पञ्चाननरसे ।—द्रवैर्धात्र्या इति—आमलकीरसैः । गोस्तनोद्रवैः,—द्राक्षाक्वाथैः । यष्टि—यष्टीमधुकं, यष्टिखर्जूरसलिलैः,—यष्टीमधुखर्जूरयोः पृथक् पृथक् क्वाथैः ॥ ७ ॥

इति हृद्रोगाधिकारः ।

सप्तोत्तरे मर्मशते त्रीणि मर्माणि शिरोहृदयवस्तयश्च प्रधानानि ।

तत्तद्द्रावैर्भावयित्वाऽस्य वल्लं दद्यात् शीतं पायसं वक्ष्यमाणम्।
दूर्वायष्टीशाल्मलीतोयदुग्धैस्तुल्यैः कुर्य्यात् पायसं तद्ददीत।
प्रातःकाले शीतपानीयपानात् मूत्रे जाते स्यात् सुखी च क्रमेण॥२॥

वरुणाद्यं लौहम्।—

द्विपलं वरुणं धात्र्यास्तदर्द्धं धातुपुष्पिकाम्।
हरीतक्याः पलार्द्धञ्च पृश्निपर्णी तदर्द्धकम्॥ ३॥
कर्षमानञ्च लौहाभ्रं चूर्णमेकत्र कारयेत्।
भक्षयेत् प्रातरुत्थाय शाणमानं विधानवित्॥ ४॥
मूत्राघातं तथा घोरं मूत्रकृच्छ्रञ्च दारुणम्।
अश्मरीं विनिहन्त्याशु प्रमेहं विषमज्वरम्॥ ५॥
बलपुष्टिकरञ्चैव वृष्यमायुष्यमेव च।
वरुणाद्यमिदं लौहं चरकेण विनिर्मितम्॥ ६॥

मूत्रकृच्छ्रान्तकयोगौ।—

अयोरजः श्लक्ष्णपिष्टं मधुना सह योजयेत्।
मूत्राघातं निहन्त्याशु मूत्रकृच्छ्रं सुदारुणम्॥ ७॥
रसगन्धयवक्षारं सितातक्रयुतं पिबेत्।
मूत्रकृच्छ्राण्यशेषाणि निहन्ति नियतं नृणाम्॥ ८॥

तत्र हृदयगतविकारचिकित्सामभिधाय वस्तिगतरोगचिकित्सामाह,—वङ्गमित्यादि। त्रिनेत्राख्यरसे।—घस्रं—दिनम्। तत्तद्द्रावैः,—पूर्वोक्तदूर्वादीनां रसैः। शीतं पायसमित्यादि।—औषधसेवनानन्तरं दूर्वादिसाधितं वक्ष्यमाणं शीतगुणविशिष्टं पायसं भक्ष्यम् इत्यर्थः॥ १।२॥

वरुणादिलौहे।—धातुपुष्पिकाम्—धातकी, "धाइफुल" इति

भैषज्यैरश्मरीप्रोक्तैर्मूत्रकृच्छ्रमुपाचरेत् ।
योगवाहिरसैर्वाऽपि चानुपानविशेषतः ॥ ९ ॥

मूत्रकृच्छ्रान्तको रसः ।—

शतावरीरसैः पिष्ट्वा मृतसूतञ्च तालकम् ।
शिखितुल्यञ्च तुल्यांशं दिनैकं मर्दयेत् दृढम् ॥ १० ॥
तद्गोलं सार्षपे तैले पाच्यं यामञ्च चूर्णयेत् ।
मूत्रकृच्छ्रान्तकश्चास्य क्षौद्रैर्गुञ्जाचतुष्टयम् ॥ ११ ॥
भक्षणान्नात्र सन्देहो मूत्रकृच्छ्रं निहन्त्यलम् ।
तुलसीतिलपिण्याकं विल्वमूलं तुषाम्बुना ।
कर्षैकं वाऽनुपानेन सुरया वा सुवर्चलैः ॥ १२ ॥

[इति मूत्रकृच्छ्र-चिकित्सा]

वङ्गभाषा । पृश्निपर्णं—"चाकुलिया" इति वङ्गभाषा । कर्षमानञ्च लौहाभ्रमिति—प्रत्येकं कर्षमानम् ; लौहाभ्रं मिलितं कर्षमानमिति प्राञ्चः ॥ ३—९ ॥

मूत्रकृच्छ्रान्तकरसे ।—मृतसूतं—रससिन्दूरम् । तालकं—हरितालम् । शिखितुल्यं—तुल्यकमेव । तुषाम्बुना—काञ्जिकेन ॥१०—१२॥

इति मूत्रकृच्छ्राधिकारः ।

अथ मूत्राघात-चिकित्सा ।—

—०*०—

तारकेश्वरो रसः ।—

मृतसूताभ्रगन्धञ्च मर्दयेन्मधुना दिनम् ।
तारकेश्वरनामायं गहनानन्दभाषितः ॥ १ ॥
माषमात्रं भजेत् चौद्रैर्बहुमूत्रप्रशान्तये ।
औडुम्बरफलं पक्कं चूर्णितं कर्षमात्रकम् ।
संलिह्यान्मधुना सार्द्धमनुपानं सुखावहम् ॥ २ ॥

लघुलोकेश्वरो रसः ।—

शुद्धसूतस्य भागैकं चतुरः शुद्धगन्धकात् ।
पिष्ट्वा वराटिका पूर्य्या रसपादेन टङ्गणम् ॥ ३ ॥
चोरैः पिष्ट्वा मुखं लिप्त्वा भाण्डे रुद्ध्वा पुटे पचेत् ।
साङ्गशीतं विचूर्ण्याथ लघुलोकेश्वरो मतः ॥ ४ ॥
चतुर्गुञ्जाप्रमाणन्तु मरिचेन तथैव च ।
जातीमूलफलैर्युक्तमजाचीरेण पाययेत् ।
शर्कराभावितञ्चानु पिबेत् कृच्छ्रहरं परम् ॥ ५ ॥

मूत्रगतविकारसाधर्म्यादनन्तरं मूत्राघातचिकित्सामाह । तारकेश्वररसे ।—औडुम्बरफलं पक्कमिति—पक्कयज्ञोडुम्बरफलवीजम् ॥ १।२ ॥

लघुलोकेश्वरे ।—ससूतं गन्धकं पिष्ट्वा तेन वराटिका पूरणीया, ततो रसपादेन टङ्गणं दुग्धे पिष्ट्वा वराटिकामुखं लिप्त्वा पुटपाके योजयेदिति

क्षुद्रयोगाः ।—

येनौषधेन मतिमान् मूत्रकृच्छ्रमुपाचरेत् ।

तेनौषधेन श्रेष्ठेन मूत्राघातानुपाचरेत् ॥ ६ ॥

लवणाम्लवरायुक्तं घृतञ्चापि पिबेन्नरः ।

तस्य नश्यन्ति वेगेन मूत्राघातास्त्रयोदश ॥ ७ ॥

पक्वैर्वारुकवीजानामक्षमात्रं ससैन्धवम् ।

धान्याम्लयुक्तं पीत्वैव मूत्राघातात् विमुच्यते ॥ ८ ॥

त्रिकण्टकैरण्डशतावरीभिः सिद्धं पयो वा तृणपञ्चमूलैः ।

गुड़प्रगाढ़ं सघृतं पयो वा रोगेषु कृच्छ्रादिषु शस्तमेतत् ॥९॥

[इति मूत्राघात-चिकित्सा]।

भावः । शर्कराभावितमिति ।—अजाक्षीरेण सह औषधं पीत्वा पश्चात् सशर्करम् अजाक्षीरं पेयम् इत्यर्थः ॥ ३—५ ॥

मूत्रकृच्छ्रचिकित्सां मूत्राघातेऽप्यतिदिशति,—येनौषधेनेति ।— क्षुद्रयोगेषु ।—लवणं—सैन्धवम्, अम्लः,—काञ्जिकादिः, वरा—त्रिफला, पक्वैर्वारुकवीजानां—पक्वकर्कटीफलवीजानामित्यर्थः ; अक्षमात्रं—कर्षमेकम् । धान्याम्लं—काञ्जिकम् । त्रिकण्टकः,—गोक्षुरः । गुड़प्रगाढ़ं—प्रभूतगुड़मिश्रम् ॥ ६—९ ॥

इति मूत्राघाताधिकारः ।

अथाश्मरी-चिकित्सा ।—

——०*०——

पाषाणवज्रको रसः ।—

शुद्धसूतं द्विधा गन्धं रसैः श्वेतपुनर्नवैः ।
मर्दयित्वा दिनं खल्ले रुद्धा तद् भूधरे पचेत् ॥ १ ॥
दिनान्ते तत् समुद्धृत्य मर्दयेद्गुड़संयुतम् ।
अश्मरीं वस्तिशूलञ्च हन्ति पाषाणवज्रकः ॥ २ ॥
गोरचकर्कटीमूल-क्वाथं कौलत्थकं तथा ।
अनुपानं प्रयोक्तव्यं बुद्धा दोषबलाबलम् ॥ ३ ॥

त्रिविक्रमो रसः ।—

मृतताम्रमजाक्षीरैः पाच्यं तुल्यं गते द्रवे ।
तत् ताम्रं शुद्धसूतञ्च गन्धकञ्च समं समम् ॥ ४ ॥
निर्गुण्डीस्वरसैर्मर्द्यं दिनं तद्गोलकीकृतम् ।
यामैकं बालुकायन्त्रे पक्का योज्यं द्विगुञ्जकम् ॥ ५ ॥
वीजपूरस्य मूलञ्च सजलञ्चानुपाययेत् ।
रसस्त्रिविक्रमो नाम शर्करामश्मरीं जयेत् ॥ ६ ॥

मूत्रविरोधित्वसामान्यात् तदनन्तरमश्मरीचिकित्सितमुच्यते । पाषाणवज्रकरसे ।—गोरचकर्कटी—इन्द्रवारुणिका, "राखालशशा" इति ख्याता, तस्या मूलक्वाथम् ॥ १—३ ॥

त्रिविक्रमरसे ।—ताम्रतुल्यं छागीदुग्धं दत्त्वा पाच्यं, दुग्धे निःशेषिते ताम्रतुल्यं रसगन्धकं निक्षिप्य निर्गुण्डीरसैर्दिनैकं संमर्द्य बालुकायन्त्रे

लौहप्रयोगः ।—

अयोरजः श्लक्ष्णपिष्टं मधुना सह योजितम् ।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणम् ॥ ७ ॥

क्षुद्रयोगौ ।—

इन्द्रवारुणिकामूलं मरिचं चीरपाचितम् ।
पर्पटीरससंयुक्तं सप्ताहादश्मरीं जयेत् ॥ ८ ॥
गन्धको जीरकं क्षुद्रा-फलं टङ्कद्वयं सदा ।
अश्मरीं शर्करां मूत्रकृच्छ्रं क्षपयति ध्रुवम् ॥ ९ ॥

[इति अश्मरी-चिकित्सा] ।

दिनैकं पचेत् । मात्रा चास्य गुञ्जाद्वयपरिमिता । वीजपूरस्य—मातुलुङ्गस्य, "टावा" इति ख्यातस्य । सजलं—सवालकम् ; अनयोः क्वाथम् ॥ ४—६ ॥

लौहप्रयोग उपदिशति, अयोरज इति ।—अयोरजः,—लौहचूर्णम् ॥ ७ ॥

क्षुद्रयोगयोः ।—इन्द्रवारुणिका—गोरक्षकर्कटी, "राखालशशा" इति ख्याता । मरिचमित्यत्र सवचमिति पाठान्तरम् । चीरपाकपरिभाषया द्वे एते पक्वा तेन चीरेण सह पर्पटीरसः पेयः ॥ ८ ॥

गन्धक इत्यादौ ।—क्षुद्राफलं—वृहतीफलम् । टङ्कद्वयं—कोलमितम् ॥ ९ ॥

इति अश्मर्य्यधिकारः ।

अथ प्रमेह-चिकित्सा ।—

हरिशङ्करो रसः ।—

मृतसूताभ्रकं तुल्यं धात्रीफलनिशाद्रवैः ।
सप्ताहं भावयेत् खल्वे योगोऽयं हरिशङ्करः ।
माषामात्रां वटीं खादेत् सर्वमेहप्रशान्तये ॥ १ ॥

इन्द्रवटी ।—

मृतं सूतं मृतं वङ्गमर्जुनस्य त्वचान्वितम् ।
तुल्यांशं मर्दयेत् खल्वे शाल्मल्या मूलजः द्रवैः ॥ २ ॥
दिनान्ते वटिका कार्य्या माषमात्रा प्रमेहहा ।
एषा इन्द्रवटीनाम्ना मधुमेहप्रशान्तकृत् ॥ ३ ॥

वङ्गावलेहः ।—

वङ्गभस्म द्विवल्लञ्च लेहयेन्मधुना सह ।
ततो गुड़समं गन्धं भक्षयेत् कर्षमात्रकम् ॥ ४ ॥

वस्तिविकृतिसाम्यादश्मर्य्यनन्तरं प्रमेहचिकित्सितमुच्यते। हरिशङ्कररसे।—मृतसूतः,—रससिन्दूरम्। धात्रीफलं—आमलकीफलम्। निशा—हरिद्रा; तयोः द्रवै. रसैः, तदभावे क्वाथैः। अत्र "सूताभ्रमामलजलैः सप्ताहं भावयेदयम्। हरिशङ्करसंज्ञः स्याद् रसः सर्वप्रमेहनुत्॥" इति पाठान्तरम्। तत्र आमलजलैरिति—आमलकीरसैः, तदभावे क्वाथैः॥ १—३॥

गुडूचीसत्त्वमथवा शर्करासहितं तथा ।
सर्वमेहहरो ज्ञेयो वङ्गावलेह उत्तमः ॥ ५ ॥

प्रमेहसेतुरसः ।—

सूताभ्रञ्च वटक्षीरैर्मर्दयेत् प्रहरद्वयम् ।
विशोष्य पक्कमूषायां सर्वरोगे प्रयोजयेत् ॥ ६ ॥
विशेषान्मेहरोगेषु त्रिफलामधुसंयुतम् ।
युञ्जीत बल्लमेकन्तु रसेन्द्रस्यास्य वैद्यराट् ॥ ७ ॥

विड़ङ्गाद्यलौहः । –

विड़ङ्गत्रिफलामुस्तैः कणया नागरेण च ।
जीरकाभ्यां युतो हन्ति प्रमेहानतिदारुणान् ।
लौहो मूत्रविकारांश्च सर्वानेव विनाशयेत् ॥ ८ ॥

वृहद्धरिशङ्करो रसः । —

रसगन्धकलौहञ्च स्वर्णं वङ्गञ्च माक्षिकम् ।
समभागन्तु सम्पिष्य वटिकां कारयेद्भिषक् ॥ ९ ॥
सप्ताहमामलाद्रावैर्भावितोऽयं रसेश्वरः ।
हरिशङ्करनामायं गहनानन्दभाषितः ।
प्रमेहान् विंशतिं हन्ति सत्यं सत्यं न संशयः ॥ १० ॥

वङ्गावलेहे ।—द्विवल्लं—गुञ्जाचतुष्टयमितम् । मिलितगुड़गन्धकयोः कर्षमानम् ॥ ४।५ ॥

प्रमेहसेतुरसे । –सूतमिति – भस्मसूतम् । अत्र रसाभ्रसमो गन्धको देयः ॥ ६।७ ॥

विड़ङ्गाद्यलौहे ।—कणया—पिप्पल्या । नागरेण—शुण्ठ्या । जीरकाभ्यां—सितजीरक-कृष्णजीरकाभ्याम् इत्यर्थः । लौहः सर्वतुल्यः ॥ ८ ॥

आनन्दभैरवो रसः।—

वङ्गभस्म मृतं स्वर्णं रसं चौद्रैर्विमर्दयेत्।
द्विगुञ्जं भक्षयेन्नित्यं हन्ति मेहं चिरोद्भवम्।
गुञ्जामूलं तथा चौद्रैरनुपानं प्रशस्यते॥ ११॥

विद्यावागीशो रसः।—

मृतसूताभ्रनागञ्च स्वर्णं तुल्यं प्रकल्पयेत्।
महानिम्बस्य चूर्णन्तु चतुर्भिः सममाहरेत्॥ १२॥
मधुना लेहयेन्माषं लालामेहप्रशान्तये।
सचौद्रं रजनीचूर्णं लेह्यं निष्कद्वयं तथा।
असाध्यं नाशयेन्मेहं विद्यावागीशको रसः॥ १३॥

मेहमुद्गरो रसः।—

रसाञ्जनं विड़ं दारु विल्वगोक्षुरदाड़िमम्।
भूनिम्बः पिप्पलीमूलं त्रिकटु त्रिफला त्रिवृत्॥ १४॥
प्रत्येकं तोलकं देयं लौहचूर्णन्तु तत्समम्।
पलैकं गुग्गुलुं दत्त्वा घृतेन वटिकां कुरु॥ १५॥

वृहद्धरिशङ्करसे।—आमलाद्रावैः,—आमलकीरसैः। गुञ्जाद्वयमिता वटी कार्य्या॥ ८।१०॥

आनन्दभैरवरसे।—रसमिति—पारदभस्म, रससिन्दूरमिति यावत्॥ ११॥

विद्यावागीशरसे।—नागं—सीसकम्। महानिम्बस्य—पर्वतनिम्बस्य, "घोंड़ानिम" इति ख्यातस्य। सचौद्रं हरिद्राचूर्णमनुलेह्यम्। निष्कद्वयं—तोलकैकम्॥ १२।१३॥

मेहमुद्गररसे।—विड़ं—विड़लवणं, दारु—दारुहरिद्रा। विल्वं—

माषैका निर्म्मिता चेयं मेहमुद्गरसंज्ञिनी ।
श्रीमद्गहननाथेन लोकनिस्तारकारिणा ॥ १६ ॥
अनुपानं प्रकर्त्तव्यं छागीदुग्धं जलञ्च वा ।
विंशन्मेहं निहन्त्याशु मूत्रकृच्छ्रं हलीमकम् ॥ १७ ॥
अश्मरीं कामलां पाण्डुं मूत्राघातमरोचकम् ॥
अर्शांसि व्रणकुष्ठञ्च वातरक्तं भगन्दरम् ॥ १८ ॥

मेघनादो रसः ।—

भस्मसूतं समं कान्तमभ्रकन्तु शिलाजतु ।
शुद्धताप्यं शिलाव्योष-त्रिफलाऽङ्कोठजीरकम् ॥ १९ ॥
कार्पासवीजं रजनी-चूर्णं भाव्यञ्च वह्निना ।
विंशद्वारं विशोष्याथ लिह्याच्च मधुना सह ।
माषमात्रो हरेन्मेहं मेघनादरसो महान् ॥ २० ॥

चन्द्रप्रभा वटिका ।—

मृतसूताभ्रकं लौहं नागं वङ्गं समं समम् ।
एलावीजं लवङ्गञ्च जातीकोषफलं तथा ॥ २१ ॥

विल्वमूलत्वक् । भूनिम्बः,—किराततिक्तकः । "लौहचूर्णन्तु तत्समम्" इति—सर्वचूर्णसममित्यर्थः ॥ १४—१८ ॥

मेघनादरस ।—कान्तं—कान्तलौहं, ताप्यं—स्वर्णमाक्षिकम् । शिला—मनःशिला । व्योषं—त्रिकटु । अङ्कोठः,—"आंकड़ा" इति ख्यातः । रजनी—हरिद्रा । भाव्यञ्च वह्निनेति—चित्रकरसेन भाव्यम् । विंशद्वारं—विंशतिवारम् ॥ १९।२० ॥

चन्द्रप्रभावटिकायाम् ।—"जातीकोषफलं तथा" इति—जातीकोषं

मधुकं मधुयष्टीञ्च धात्रीञ्च समशर्कराम्।
कर्पूरं खादिरं सारं शताह्वां कण्टकारिकाम्॥ २२॥
अम्लवेतसकं तुल्यं दिनैकं लाङ्गलीद्रवैः।
भावयेत् मेषदुग्धेन नागवल्ल्या रसैर्दिनम्॥ २३॥
वटिका बदरास्थ्याभा कार्य्या चन्द्रप्रभा परा।
भक्षयेद् वटिकामेकां सर्वमेहकुलान्तिकाम्॥ २४॥
धात्री पटोलपत्राणां कषायं वाऽमृतायुतम्।
सक्षौद्रं भक्षयेच्चानु सर्वमेहप्रशान्तये॥ २५॥

वङ्गेश्वरो रसः (इक्षुमेहे) :—

रसभस्मसमायुक्तं वङ्गभस्म प्रकल्पयेत्।
अस्य माषद्वयं हन्ति मेहान् क्षौद्रसमन्वितम्॥ २६॥

वृहद्वङ्गेश्वरो रसः :—

वङ्गभस्म रसं गन्धः रौप्यं कर्पूरमभ्रकम्।
कर्षं कर्षं मानमेषां सूताङ्घ्रि हेममौक्तिकम्॥ २७॥
केशराजरसैर्भाव्यं द्विगुञ्जाफलमानतः।
प्रमेहान् विंशतिञ्चैव साध्यासाध्यमथापि वा॥ २८॥
मूत्रकृच्छ्रं तथा पाण्डुं धातुस्थञ्च रंज्व जयेत्।
हलीमकं रक्तपित्तं वातपित्तकफोद्भवम्॥ २९॥
ग्रहणीमामदोषञ्च मन्दाग्नित्वमरोचकम्।

जातीफलञ्च। "धात्रीञ्च समशर्कराम्" इत्यत्र "धात्री दाड़िमशर्कराः" इति पाठान्तरम्। "धात्री पटोलपत्राणाम्" इत्यत्र च "धात्री पटोलपत्रं वा" इति पाठान्तरम्। "वाऽमृतायुतम्" इत्यत्र "वा घृतान्वितम्" इति साधीयान् पाठः॥ २१—२५॥

वङ्गेश्वररसे।—रससिन्दूरं वङ्गभस्म च समभागं ग्राह्यम्॥ २६॥

एतान् सर्वान् निहन्त्याशु वृत्रमिन्द्राशनिर्यथा ॥ ३० ॥
वृहद्वङ्गेश्वरो नाम सोमरोगं निहन्त्यलम् ।
बहुमूत्रं बहुविधं मूत्रमेहं सुदारुणम् ॥ ३१ ॥
मूत्रातिसारं कृच्छ्रञ्च क्षीणानां पुष्टिवर्द्धनः ।
ओजस्तेजस्करो नित्यं स्त्रीषु सम्यक् वृषायते ।
बलवर्णकरो रुच्यः शुक्रसञ्जननः परः ॥ ३२ ॥
छागं वा यदि वा गव्यं पयो वा दधि निर्मलम् ।
अनुपानं प्रयुञ्जीत बुद्धा दोषगतिं भिषक् ॥ ३३ ॥
दद्याच्च बाले प्रौढ़े च सेवनार्थं रसायनम् ॥ ३४ ॥

वङ्गादियोगाः ।—

वङ्गाभ्रमथ नागाभ्रं नागं वङ्गञ्च केवलम् ।
मेहरोगे प्रयोक्तव्यं शिलाजतुसमन्वितम् ॥ ३५ ॥

कस्तूरीमोदकः ।—

कस्तूरी वनिता क्षुद्रा त्रिफला जीरकद्वयम् ।
एलाबीजं त्वचं यष्टि-मधुकं मिषि बालकम् ॥ ३६ ॥
शतपुष्पोत्पलं धात्री मुस्तकं भद्रसंज्ञकम् ।
कदलीनां फलं पक्वं खर्जूरं कृष्णतिलकम् ॥ ३७ ॥

वृहद्वङ्गेश्वररसे ।—"सूताभ्रं हेममौक्तिकम्" इति—स्वर्णं मुक्ता च प्रत्येकं पारदात् चतुर्थभागम् ॥ २७—३४ ॥

वङ्गादियोगेषु ।—वङ्गाभ्रेत्यादि ।—वङ्गभस्मसममभ्रं धात्रीरसेन रक्तिकादिक्रमेण बोध्यम् ; अथवा नागं—सीसकं, तच्च अभ्रसमम् ; अथवा केवलं सीसकं वङ्गं वा धात्रीरसेन ; अथवा केवलं शिलाजतु मधुना लेह्यम् ॥ ३५ ॥

कोकिलाक्षस्य वीजञ्च माषमात्रं समं समम्।
यावन्त्येतानि चूर्णानि द्विगुणा सितशर्करा ॥ ३८ ॥
धात्रीरसेन पयसा कुष्माण्डस्वरसेन च।
विपचेत् पाकविद्वैद्यो मन्दमन्देन वह्निना ॥ ३९ ॥
अवतार्य्य सुशीते च यथालाभं विनिक्षिपेत्।
अक्षमात्रं प्रयुञ्जीत सर्वमेहप्रशान्तये ॥ ४० ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।
सोमरोगं बहुविधं मूत्रातिसारमुल्वणम् ॥ ४१ ॥
मूत्रकृच्छ्रं निहन्त्याशु मूत्राघातं तथाऽश्मरीम्।
ग्रहणीं पाण्डुरोगञ्च कामलां कुम्भकामलाम् ॥ ४२ ॥
वृष्यो बलकरो हृद्यः शुक्रवृद्धिकरः परः।
कस्तूरीमोदकश्चायं चरकेण च भाषितः ॥ ४३ ॥

मेहवज्रः।—

भस्मसूतं मृतं कान्त-लौहभस्म शिलाजतु।
शुद्धताप्यं शिला व्योषं त्रिफला विल्वजीरकम् ॥ ४४ ॥
कपित्थं रजनीचूर्णं भृङ्गराजेन भावयेत्।
त्रिंशद्वारं विशोष्याथ लिह्याच्च मधुना सह।
निष्कमात्रं हरेन्मेहान् मूत्रकृच्छ्रं सुदारुणम् ॥ ४६ ॥
महानिम्बस्य वीजञ्च षड्निष्कं पेषितञ्च यत्।
पलतण्डुलतोयेन घृतनिष्कद्वयेन च।

कस्तूरीमोदके।—वनिता—प्रियङ्गुः, क्षुद्रा—कण्टकारी, जीरकद्वयं—जीरकं कृष्णजीरकञ्च। उत्पलं—कुष्ठम्। सर्वचूर्णात् चतुर्गुणेन धात्र्यादिरसेन पाचयेत् ॥ ३६—४३ ॥

एकीकृत्य पिबेच्चानु हन्ति मेहं चिरोत्थितम् ॥ ४६ ॥

कुमारिकायोगः ।—

कुमारी केवला देया चेषल्लवणसंयुता ।
प्रमेहं हन्ति सकलं सप्ताहात् परतो नृणाम् ॥ ४७ ॥

मेहकेशरी । -

मृतं वङ्गं सुवर्णञ्च कान्तलौहञ्च पारदम् ।
मुक्तां गुड़त्वचञ्चैव सूक्ष्मैलां नागकेशरम् ॥ ४८ ॥
समभागं विचूर्ण्याथ कन्यानीरेण भावयेत् ।
द्विमाषां वटिकां खादेद् दुग्धान्नं प्रपिबेत् ततः ।
प्रमेहं नाशयत्याशु केशरी करिणं यथा ॥ ४९ ॥
शुक्रप्रमेहं शमयेत् त्रिरात्रान्नात्र संशयः ।
चिरजातं प्रमेहञ्च मधुमेहञ्च नाशयेत् ॥ ५० ॥

योगेश्वरो रसः ।—

सूतकं गन्धको लौहः नागञ्चापि वराटिका ।
ताम्रकं वङ्गभस्मापि व्योमकञ्च समांशिकम् ॥ ५१ ॥
सूक्ष्मैलापत्रमुस्तञ्च विड़ङ्गं नागकेशरम् ।
रेणुकाऽऽमलकञ्चैव पिप्पलीमूलमेव च ॥ ५२ ॥
एषाञ्च द्विगुणं भागं मर्दयित्वा प्रयत्नतः ।
भावना तत्र दातव्या धात्रीफलरसेन च ॥ ५३ ॥

मेहवज्रे ।—ताप्यं—स्वर्णमाक्षिकं, शिला – मनःशिलाः ॥४३ –४७॥

मेहकेशरिणि ।—"नागकेशरम्" इत्यत्र "पत्रकेशरम्" इति पाठान्तरम् ॥ ४८—५० ॥

मात्रा चणकतुल्या च गुड़िकेयं प्रकीर्त्तिता ।
प्रमेहं बहुमूत्रञ्च अश्मरीं मूत्रकृच्छ्रकम् ॥ ५४ ॥
व्रणं हन्ति महाकुष्ठं ह्यर्शांसि च भगन्दरम् ।
योगेश्वरो रसो नाम महादेवेन भाषितः ॥ ५५ ॥

[इति रसेन्द्रसारसंग्रहे प्रमेह-चिकित्सा] ।

अथ सोमरोग-चिकित्सा ।—

—०*०—

तालकेश्वरो रसः ।—

तालं सूतं समं गन्धं मृतलौहाभ्रवङ्गकम् ।
मर्द्दयेन्मधुना चैव रसोऽयं तालकेश्वरः ॥ १ ॥
माषमात्रं भजेत् क्षौद्रैर्बहुमूत्रप्रशान्तये ।
उडुम्बरफलं पक्वं चूर्णितं कर्षमानतः ।
संलेह्यं मधुना सार्द्धमनुपानं सुखावहम् ॥ २ ॥

योगेश्वररसे ।—समांशिकमिति प्रत्येकमेकैकभागं बोध्यम् ॥५१—५५॥

इति प्रमेहाधिकारः ।

मूत्रगतविकारसाधर्म्यात् तथा प्रमेहान्तरेण सह प्रायस्तुल्यलक्षण-चिकित्सितत्वात् प्रमेहाधिकारे एव प्रमेहविशेषस्य सोमरोगस्य चिकित्सा-माह, तालमित्यादि ।—तालकेश्वररसे ।—तालं परिशुद्धं प्रथमं सम्यक् मर्द्दयित्वा रसगन्धककृतां कज्जलीं दद्यात्, पश्चादन्यत् सर्वम् । मात्रा चास्य गुञ्जापरिमिता व्यवह्रियते वृद्धैः ॥ १।२ ॥

गगनादिलौहम् ।—

गगनं त्रिफला लौहं कुटजं कटुकत्रयम् ।
पारदः गन्धकश्चैव विषटङ्कणसर्जिकाः ॥ ३ ॥
त्वगेला तेजपत्रञ्च वङ्गं जीरकयुग्मकम् ।
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत् ॥ ४ ॥
तदर्द्धं चैत्रकं चूर्णं कर्षैकं मधुना लिहेत् ।
अवश्यं विनिहन्त्याशु मूत्रातीसारसोमकम् ॥ ५ ॥

सोमनाथरसः ।—

कर्षं जारितलौहञ्च तदर्द्धं रसगन्धकम् ।
एलापत्रं निशायुग्मं जम्बूवीरणगोक्षुरम् ॥ ६ ॥
विड़ङ्गं जीरकं पाठा धात्रीदाड़िमटङ्कणम् ।
चन्दनं गुग्गुलुः लोध्र-शालार्जुनरसाञ्जनम् ॥ ७ ॥
छागीदुग्धेन वटिकां कारयेद् दशरक्तिकाम् ।
निर्मितो नित्यनाथेन सोमनाथरसस्त्वयम् ॥ ८ ॥
सोमरोगं बहुविधं प्रदरं हन्ति दुर्जयम् ।
योनिशूलं मेढ्रशूलं सर्वजं चिरकालजम् ।
बहुमूत्रं विशेषेण दुर्जयं हन्त्यसंशयम् ॥ ८ ॥

गगनादिलौहे ।—गगनम्—अभ्रं, सर्जिका—क्षारविशेषः । "विषटङ्कणसर्जिकाः" इत्यत्र "विड़सैन्धवसर्जिकाः" इति तथा "चैत्रकं चूर्णम्" इत्यत्र "दीपिकाचूर्णम्" इति च पाठान्तरद्वयम् । सोमकं—सोमरोगम् । मात्रा विविच्य प्रयोज्या ॥ ३—५ ॥

सोमनाथरसे ।—रसगन्धकादीनां प्रत्येकं लौहार्द्धमानम् । शालं—शालसारम् । अर्जुनमिति—अर्जुनवल्कलम् ॥ ६—८ ॥

बृहत् सोमनाथरसः ।—

हिङ्गुलसम्भवं सूतं पालिधा-रसमर्दितम् ।
रम्भाशोधितगन्धश्च तेनैव कज्जलीकृतम् ॥ १० ॥
तद्द्वयोर्द्विगुणं लौहं कन्यारसविमर्दितम् ।
अभ्रकं वङ्गकं रौप्यं खर्परं माक्षिकं तथा ॥ ११ ॥
सुवर्णञ्च समं सर्वं प्रत्येकञ्च रसार्द्धकम् ।
तत् सर्वं कन्यकाद्रावैर्मर्दयेद् भावयेत् ततः ॥ १२ ॥
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं ततः ।
मधुना भक्षयेच्चापि सोमरोगनिवृत्तये ॥ १३ ॥
प्रमेहान् विंशतिं हन्ति बहुमूत्रञ्च सोमकम् ।
मूत्रातिसारं कृच्छ्रञ्च मूत्राघातं सुदारुणम् ॥ १४ ॥
बहुदोषं बहुविधं प्रमेहं मधुसंज्ञकम् ।
हस्तिमेहमिक्षुमेहं लालामे ' विनाशयेत् ॥ १५ ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सोमसंज्ञकम् ।
नाशयेद् बहुमूत्रञ्च प्रमेहमविकल्पतः ॥ १६ ॥

सोमेश्वरो रसः ।—

शालार्जुनं लोध्रकञ्च कदम्बागुरुचन्दनम् ।
अग्निमन्थो निशायुग्मं धात्रीदाड़िमगोक्षुरम् ॥ १७ ॥
जम्बूवीरणमूलञ्च भागमेषां पलार्द्धकम् ।
रसगन्धकधान्याब्दमेला पत्रं तथाऽभ्रकम् ॥ १८ ॥

बृहत्सोमनाथरसे ।—रम्भा—मूषिकपर्णी ॥ १०—१६ ॥

सोमेश्वररसे ।—शालं शालसारम् । अर्जुनमिति—अर्ज्जुनवल्कलम् ।

लौहं रसाञ्जनं पाठा विड़ङ्गं टङ्कजीरकम् ।
प्रत्येकं पलिकं भागं पलार्द्धं गुग्गुलोरपि ॥ १९ ॥
घृतेन वटिकां कृत्वा खादेत् षोड़शरत्तिकाम् ।
गहनानन्दनाथेन रसो यत्नेन निर्म्मितः ॥ २० ॥
सोमेश्वरो महातेजाः सोमरोगं निहन्त्यलम् ।
एकजं द्वन्द्वजञ्चैव सन्निपातसमुद्भवम् ।
मूत्राघातं मूत्रकृच्छ्रं कामलाञ्च हलीमकम् ॥ २१ ॥
भगन्दरोपदंशौ च विविधान् पैड़कान् व्रणान् ।
विस्फोटार्बुदकण्डूश्च सर्वमेतं विनाशयेत् ॥ २२ ॥

[इति रसेन्द्रसारसंग्रहे सोमरोग-चिकित्सा]।

अथ स्थौल्य-चिकित्सा ।—

—०*०—

त्र्यूषणाद्यं लौहम् ।—

त्र्यूषणं विजया चव्यं चित्रकं विड़मौद्भिदम् ।
वागुजो सैन्धवञ्चैव सौवर्चलसमन्वितम् ॥ १ ॥

अग्निमन्थः,—गणियारी, निशायुग्ममिति—हरिद्राद्वयम्, टङ्कजीरकं—टङ्कणलाजाः जीरकञ्च ॥ १९—२२ ॥

इति सोमरोगाधिकारः ।

प्रमेहवत् स्थौल्यस्यापि व्यायामसाध्यत्वात्, तथा दुष्टमेदोजन्यत्वाच्च

अयश्चूर्णेन संयुक्तं भक्षयेन्मधुसर्पिषा ।
स्थौल्यापकर्षणं श्रेष्ठं बलवर्णाग्निवर्द्धनम् ॥ २ ॥
मेहघ्नं कुष्ठशमनं सर्वव्याधिहरं परम् ।
नाहारे यन्त्रणा कार्य्या न विहारे तथैव च ।
त्र्यूषणाद्यमिदं लौहं रसायनवरोत्तमम् ॥ ३ ॥

बड़वाग्निलौहम् ।—

सूतभस्म सतालञ्च लौहं ताम्रं समं समम् ।
मर्दयेत् सूर्य्यपत्रेण चास्य वल्लं प्रयोजयेत् ॥ ४ ॥
मधुना स्थूलरोगे च शोथे शूले तथैव च ।
मध्वाज्यमनुपानञ्च देयं वाऽपि कफोल्बणे ॥ ५ ॥

बड़वाग्निरसः ।—

शुद्धसूतं समो गन्धः ताम्रं तालं समं समम् ।
अर्कक्षीरैर्दिनं मर्द्यं क्षौद्रैर्लेह्यं त्रिगुञ्जकम् ।
बड़वाग्निरसो नाम्ना स्थौल्यमाशु नियच्छति ॥ ६ ॥

[इति रसेन्द्रसारसंग्रहे स्थौल्य-चिकित्सा] ।

प्रमेहानन्तरं स्थौल्यचिकित्सामाह । त्र्यूषणाद्यलौहे —त्र्यूषणं—त्रिकटु, विजया—शक्राशनम् । वागुजी—सोमराजी । लौहमत्र सर्वचूर्णसमम् ॥ १—३ ॥

बड़वाग्निलौहे ।—सूर्य्यपत्रेणेति—अर्कपत्ररसेन ॥ ४—६ ॥

इति स्थौल्याधिकारः ।

अथ उदररोग-चिकित्सा ।—

—०*०—

त्रैलोक्यसुन्दरो रसः ।—

शुद्धसूतं द्विधा गन्धं ताम्राभ्रं सैन्धवं विषम् ।
कृष्णजीरं विड़ङ्गञ्च गुड़ूचीसत्त्वचित्रकम् ॥ १ ॥
उग्रगन्धा यवक्षारं प्रत्येकं कर्षमात्रकम् ।
निर्गुण्डिकाद्रवैरग्नि-वीजपूरद्रवैर्दिनम् ॥ २ ॥
मर्दयेत् शोषयेत् सोऽयं रसस्त्रैलोक्यसुन्दरः ।
गुञ्जाद्वयं घृतैर्लेह्यं वातोदरकुलान्तकम् ॥ ३ ॥
वह्निचूर्णं यवक्षारं प्रत्येकञ्च पलद्वयम् ।
घृतप्रस्थं विपक्तव्यं गोमूत्रैश्च चतुर्गुणैः ।
घृतावशेषं कर्त्तव्यं कर्षमात्रं पिबेदनु ॥ ४ ॥

वैश्वानरी वटी ।—

शुद्धसूतं द्विधा गन्धं मृताकायःशिलाजतु ।
रसमानं प्रदातव्यं रसस्य द्विगुणं विषम् ॥ ५ ॥
त्रिकटु चित्रकं वीरा निर्गुण्डी मूषलीरजः ।

उदरोत्सेधसाधर्म्यात् स्थौल्यानन्तरम् उदरचिकित्सितमुच्यते,—शुद्धसूतमित्यादि ।—"प्रत्येकं कर्षमात्रकम्" इत्यत्र "प्रत्येकं स्याद्रसार्द्धकम्" इति पाठान्तरम् ॥ १—४ ॥

वैश्वानरीवटिकायाम् ।—अर्कः,—ताम्रं, अयः,—लौहं, वीरा—

अजमोदा विषांशेन प्रत्येकञ्च नियोजयेत् ॥ ६ ॥
निम्बपञ्चाङ्गुलक्काथैर्भावना चैकविंशतिः ।
भृङ्गराजरसैः सप्त दत्त्वा क्षौद्रैर्विलोड़येत् ॥ ७ ॥
भक्षयेद्बदरास्थ्याभां वटिकां तां दिवा निशि ।
श्लेष्मोदरं निहन्त्याशु नाम्ना वैश्वानरी वटी ॥ ८ ॥
देवदारु वह्निमूल-कल्कं क्षीरेण पाययेत् ।
भोजनं मेषदुग्धेन कुलत्थानां रसेन तु ॥ ९ ॥

जलोदरारिरसः ।—

पिप्पली मरिचं ताम्रं रजनीचूर्णसंयुतम् ।
स्नुहीक्षीरैर्दिनं मर्द्यं तुल्यं जैपालवीजकम् ॥ १० ॥
निष्कं खादेद्विरेकः स्यात् सद्यो हन्ति जलोदरम् ।
रेचनानाञ्च सर्वेषां दध्यन्नं स्तम्भने हितम् ।
दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम् ॥ ११ ॥

क्षीरकाकोली । "वीरा" इत्यत्र "कुष्ठम्" इति पाठान्तरम् । मूषली-रजः,- तालमूलीचूर्णम् । विषांशेनेति—विषार्द्धभागेन, पञ्चाङ्गुल-क्काथैः,- एरण्डमूलक्काथैः ; अत्र "पञ्चाङ्गनिम्बक्काथेन" इति साधीयान् पाठः ; तत्र पञ्चाङ्गनिम्बं—निम्बस्य मूल-त्वक्-पत्र-पुष्प-फलानि । औषध-सेवनानन्तरं देवदारु चित्रकमूलञ्च दुग्धेन पिष्ट्वा तेन सह पिबेत् ॥ ५—९॥

जलोदरारिरसे ।—"तुल्यं जैपालवीजकम्" इति—सर्वचूर्णसमं जैपालचूर्णम् ; सविशेषं विविच्य विरेचनस्य मात्रा प्रयोज्या, विशेषतः जैपालघटितानामौषधानाम् ॥ १०।११ ॥

महावह्निरसः ।—

चतुः सूतस्य गन्धाष्टौ रजनीत्रिफलाशिला: ।
प्रत्येकञ्च द्विभागं स्यात् त्रिवृत् जैपालचित्रकम् ॥ १२ ॥
प्रत्येकञ्च त्रिभागं स्याद्दन्ती त्र्यूषणजीरकम् ।
प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥ १३ ॥
जयन्तीस्नुक्पयोभृङ्ग- वह्निवातारितैलकैः ।
प्रत्येकेन क्रमाद्भाव्यं सप्तवारं पृथक् पृथक् ॥ १४ ॥
महावह्निरसो नाम्ना निष्कमुष्णजलैः पिबेत् ।
विरेचनं भवेत् तेन तक्रं भक्तं ससैन्धवम् ॥ १५ ॥
दिनान्ते दापयेत् पथ्यं वर्जयेच्छीतलं जलम् ।
सर्वोदरहरः प्रोक्तः श्लेष्मवातहरः परः ॥ १६ ॥

त्रैलोक्योडुम्बरो रसः ।—

द्वौ भागौ शिववीजस्य गन्धकस्य चतुष्टयम् ।
अभ्रवह्निविड़ङ्गानां गुडूचीसत्त्वनागयोः ॥ १७ ॥

महावह्निरसे ।—चतुः सूतस्येति ।—चतुर्भागः सूतस्य । रजनी—हरिद्रा, शिला—मनःशिला, रजन्यादिशिलान्तानां प्रत्येकं द्विभागः, तेन प्रत्येकं सूतार्द्धम् । त्रिवृत्—त्रिवृन्मूलम् ; त्रिवृतादिचित्रकान्तानां प्रत्येकं त्रिभागः । दन्त्यादिजीरकान्तानां प्रत्येकञ्चाष्टौ भागाः, तेन गन्धकसमत्वम् । वातारितैलकैः,—एरण्डतैलैः । "चतुः सूतस्य गन्धाष्टौ" इत्यत्र "सूतस्य गन्धकस्याष्टौ" तथा "प्रत्येकमष्टभागम्" इत्यत्र "प्रत्येकं सप्तभागम्" इति पाठान्तराणि क्वचित् दृश्यन्ते, तत्र सूतस्य तथा गन्धकस्य च प्रत्येकम् अष्टौ भागाः ज्ञेयाः ; "शिला" इत्यत्र "शिवा" इति पाठे—हरीतकी इति विशेषः ॥ १२—१६ ॥

कृष्णजीर-कटूनाञ्च लवणक्षारयोरपि।
प्रत्येकं भागमादाय मर्दयेत् सुरसाद्रवैः॥ १८॥
वीजपूररसैर्भूयो मर्दयित्वा विशोषयेत्।
त्रैलोक्योडुम्बरो नाम वातोदरकुलान्तकः॥ १९॥
गुञ्जाद्वयं ततश्चास्य ददीत घृतसंयुतम्।
भोजयेत् स्निग्धमुष्णञ्च पायसञ्च विवर्जयेत्॥ २०॥

इच्छाभेदी रसः।—

शुण्ठीमरिचसंयुक्तं रसगन्धकटङ्कणम्।
जैपालो द्विगुणः प्रोक्तः सर्वमेकत्र चूर्णयेत्॥ २१॥
इच्छाभेदी द्विगुञ्जः स्यात् सितया सह दापयेत्।
पिवेत्तु चुल्लकान् यावत् तावद्वारान् विरेचयेत्।
तक्रौदनञ्च दातव्यं पथ्यमत्र विजानता॥ २२॥

पिप्पल्याद्यं लौहम्।—

पिप्पलीमूलचित्राभ्र-त्रिकत्रयेन्दुसैन्धवम्।
सर्वचूर्णसमं लौहं हन्ति सर्वोदरामयम्॥ २३॥

उदराग्निरसः।—

पारदं शिखितुल्यञ्च जैपालं पिप्पलीसमम्।
आरग्वधफलान्मज्जा वज्रीक्षीरेण मर्दयेत्।
माषमात्रां वटीं खादेत् स्त्रीणां जलोदरं जयेत्॥ २४॥

त्रैलोक्योडुम्बररसे।—शिववीजं—पारदः, नागं—सीसकम्।
अभ्रादिक्षारान्तानामेकादशद्रव्याणां प्रत्येकम् एको भागः॥ १७—२०॥
इच्छाभेदिरसे।—चुल्लकान्—सितोदकगण्डूषान्॥ २१—२३॥

चिञ्चाफलरसञ्चानु पथ्यं दध्योदनं हितम् ।
दकोदरहरञ्चैव तीव्रेण रेचनेन च ॥ २५ ॥

वङ्गेश्वरो रसः ।—

सूतभस्म वङ्गभस्म भागैकं सम्प्रकल्पयेत् ।
गन्धकं मृतताम्रञ्च प्रत्येकञ्च चतुःपलम् ॥ २६ ॥
अर्कक्षीरैर्दिनं मर्द्यं सर्वं तद्गोलकीकृतम् ।
रुद्ध्वा तद्भूधरे पक्त्वा पुटकेन समुद्धरेत् ॥ २७ ॥
एष वङ्गेश्वरो नाम प्लीहगुल्मोदरान् जयेत् ।
घृतैर्गुञ्जाद्वयं लेह्यं निष्कां श्वेतपुनर्नवाम् ।
गवां मूत्रैः पिबेच्चानु रजनीं वा गवां जलैः ॥ २८ ॥

[इति उदररोग-चिकित्सा] ।

अथ प्लीहरोग-चिकित्सा ।—

——०*०——

रोहीतकलौहम् ।—

रोहितकसमायुक्तं त्रिकत्रययुतं त्वयः ।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत् ॥ १ ॥

उदरारिरसे ।—वज्रीक्षीरेण—स्नुहीक्षीरेण ॥ २४।२५ ॥

वङ्गेश्वररसे ।—"भागैकं सम्प्रकल्पयेत्" इति—प्रत्येकं पलमित्यर्थः ॥ २६—२८ ॥

इत्युदराधिकारः ।

लोकनाथो रसः ।—

पारदं गन्धकञ्चैव समभागं विमर्दयेत् ।
मृताभ्रं रसतुल्यञ्च पुनस्तत्रैव मर्दयेत् ॥ २ ॥
रसात् द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम् ।
भस्म वराटिकायाश्च ताम्रतस्त्रिगुणं कुरु ॥ ३ ॥
नागवल्लीरसेनैव मर्दयेत् यत्नतो भिषक् ।
पुटेद् गजपुटे विद्वान् साङ्गशीतं समुद्धरेत् ॥ ४ ॥
यकृत् प्लीहोदरं गुल्मं श्वयथुञ्च विनाशयेत् ।
पिप्पलीमधुसंयुक्तां सगुड़ां वा हरीतकीम् ।
गोमूत्रञ्च पिबेच्चानु गुड़ं वा जीरकान्वितम् ॥ ५ ॥

बृहल्लोकनाथो रसः ।—

शुद्धसूतं द्विधा गन्धं खल्ले कृत्वा तु कज्जलम् ।
सूततुल्यं जारिताभ्रं मर्दयेत् कन्यकाम्बुना ॥ ६ ॥
ततो द्विगुणितं दद्यात् ताम्रं लौहं प्रयत्नतः ।
काकमाचीरसेनैव सर्वं तत् परिमर्दयेत् ॥ ७ ॥
सूताच्च द्विगुणं गन्धं वराटीसम्भवं रजः ।
पिष्ट्वा जम्बीरनीरेण मूषायुग्मं प्रकल्पयेत् ॥ ८ ॥
तन्मध्ये गोलकं क्षिप्त्वा यत्नेन छादयेद् भिषक् ।
शरावसम्पुटं कृत्वा मृद्भस्मलवणाम्बुभिः ॥ ९ ॥
शरावसन्धिमालिप्य चातपे शोषयेत् क्षणम् ।
ततो गजपुटं दत्त्वा साङ्गशीतं समुद्धरेत् ॥ १० ॥

प्लीहवृद्धा उदरसम्भवादनन्तरं प्लीहचिकित्सामाह । रोहीतक-लौहे ।—रोहीतक',—"रोहेरा" इति ख्यातो वृक्षः, "रयना"

पिष्ट्वा तु सर्वमेकत्र स्थापयेद् भाजने शुभे ।
खादेत् वल्लद्वयञ्चास्य मूत्रञ्चानु पिबेन्नरः ॥ ११ ॥
मधुना पिप्पलीचूर्णं सगुड़ां वा हरीतकीम् ।
अजाजीं वा गुड़ेनैव भक्षयेत् तुल्ययोगतः ॥ १२ ॥
यकृत्प्लीहोदरोगञ्च श्वयथुञ्च विनाशयेत् ।
वाताष्ठीलाञ्च कमठीं प्रत्यष्ठीलां तथैव च ॥ १३ ॥
कांस्यक्रोड़ाग्रमांसञ्च शूलञ्चैव भगन्दरम् ।
वह्निमान्द्यञ्च कासञ्च लोकनाथरसोत्तमः ॥ १४ ॥

ताम्रेश्वरवटी ।—

हिङ्गु त्रिकटुकञ्चैवापामार्गस्य च पत्रकम् ।
अर्कपत्रं स्नुहीपत्रं तथा च समभागिकम् ॥ १५ ॥
सैन्धवं तत्समं ग्राह्यं लौहं ताम्रञ्च तत्समम् ।
प्लीहानं यकृतं गुल्ममामवातं सुदारुणम् ॥ १६ ॥
अर्शांसि घोरमुदरं मूर्च्छां पाण्डुं हलीमकम् ।
ग्रहणीमतिसारञ्च यक्ष्माणं शोथमेव च ॥ १७ ॥

अग्निकुमारलौहम् ।—

तुल्यरामठटङ्कानि सैन्धवं धान्यजीरकम् ।
यमानी मरिचं शुण्ठी लवङ्गैला विड़ङ्गकम् ॥ १८ ॥

"रोढ़ा" "कड़ार" इति च भाषा, अस्य वल्कलं ग्राह्यम् । अत्र सर्वचूर्णसमं लौहं मधुना लौहपात्रे विमर्द्य रक्तिकादिक्रमेण लिह्यात् ॥ १—१४ ॥

ताम्रेश्वरवटिकायाम् ।—अपामार्गपत्रस्य तथा अर्कपत्रस्य तथा स्नुहीपत्रस्य च क्षारम् इति उपदिशन्ति वृद्धाः ॥ १५—१७ ॥

प्रत्येकं तोलकं चूर्णं लौहचूर्णन्तु तत्समम्।
रसस्य गन्धकस्यापि पलैकं कज्जलीकृतम् ॥ १९ ॥
घृतेन मधुना खाद्यं लौहमग्निकुमारकम्।
यकृत्प्लीहोदरहरं गुल्मञ्चापि हलीमकम् ॥ २० ॥
बलवर्णाग्निजननं कान्तिपुष्टिविवर्द्धनम्।
श्रीमद्गहननाथेन निर्मितं विश्वसम्पदे ॥ २१ ॥

प्राणवल्लभो रसः।—

लौहं ताम्रं वराटञ्च तुत्थं हिङ्गु फलत्रिकम्।
स्नुहीमूलं यवक्षारः जैपालं टङ्कणं त्रिवृत् ॥ २२ ॥
प्रत्येकञ्च पलं ग्राह्यं छागीदुग्धेन पेषितम्।
चतुर्गुञ्जां वटीं खादेद्वारिणा मधुनाऽपि वा ॥ २३ ॥
प्राणवल्लभनामाऽयं गहनानन्दभाषितः।
दोषं रोगञ्च संवीक्ष्य युक्त्या वा वृटिवर्द्धनम् ॥ २४ ॥
निहन्ति कामलां पाण्डुमानाहं श्लीपदार्बुदम्।
गलगण्डं गण्डमालां व्रणानि च हलीमकम् ॥ २५ ॥
अपचीं वातरक्तञ्च कण्डूं विस्फोटकुष्ठकम्।
नातःपरतरः श्रेष्ठः कामलाऽर्त्तिभयेष्वपि ॥ २६ ॥

यकृदरिलौहम्।—

द्विकर्षं लौहचूर्णस्य चाभ्रकस्य पलार्द्धकम्।
कर्षं शुद्धं मृतं ताम्रं लिम्पाकाङ्घ्रित्वचं पलम् ॥ २७ ॥

अग्निकुमारलौहे।—रामठं—हिङ्गु ॥ १८—२१ ॥
प्राणवल्लभरसे।—फलत्रिकं—त्रिफला ॥ २२—२६ ॥

मृगाजिनभस्मपलं सर्वमेकत्र कारयेत्।
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्॥ २८ ॥
यकृत्प्लीहोदरञ्चैव कामलाञ्च हलीमकम्।
कासं श्वासं ज्वरं हन्याद् बलवर्णाग्निकारकम्।
यकृदरि त्विदं लौहं वातगुल्मविनाशनम्॥ २९ ॥

मृत्युञ्जयलौहम्।—

शुद्धसूतं समं गन्धो जारिताभ्रं समं समम्।
गन्धकाद्द्विगुणं लौहं मृततांम्रं चतुर्गुणम्॥ ३० ॥
द्विक्षारं टङ्कणं विड़ं वराटमथ शङ्खकम्।
चित्रकं कुनटी तालं कटुकी रामठं तथा॥ ३१ ॥
रोहीतकं त्रिवृच्चिञ्चा विशाला धवलाङ्कठम्।
अपामार्गः तालखण्डमम्लिका च निशायुगम्॥ ३२ ॥
कानकं तुत्थकञ्चैव यक्कन्मर्दं रसाञ्जनम्।
एतानि समभागानि चूर्णयित्वा विभावयेत्॥ ३३ ॥
आर्द्रकस्वरसेनैव गुडूच्याः स्वरसेन च।
मधुनः कुड़वैर्भाव्यं वटिका माषमात्रतः॥ ३४ ॥

यकृदरिलौहे।—लिम्पाकाङ्घ्रित्वचं—लिम्पाकः निम्बुविशेषः, "पातीलेबु" इति बङ्गभाषा, तस्य मूलवल्कलम्॥ २७—२९ ॥

मृत्युञ्जयलौहे।—जारिताभ्रमिति—मृताभ्रम्। "मृततांम्रं चतुर्गुणम्" इति—भस्मताम्रं गन्धकात् चतुर्गुणमित्यर्थः। कुनटी—मनःशिला, चिञ्चा—तिन्तिड़ीत्वग्भस्म। विशाला—गोरक्षकर्कटीमूलम्। धवलाङ्कठं—श्वेताङ्कोठः, तालखण्डं—तालजटा, तद्भस्म प्रयुज्यते, अम्लिका—

अनुपानं प्रदातव्यं बुद्ध्वा दोषानुसारतः ।
भक्षयेत् प्रातरुत्थाय सर्व्वरोगकुलान्तकम् ॥ ३५ ॥
प्लीहानं ज्वरमुग्रञ्च कासञ्च विषमज्वरम् ।
चिरजं कुलजञ्चैव श्लीपदं हन्ति दारुणम् ॥ ३६ ॥
रोगानीकविनाशाय धन्वन्तरिकृतं पुरा ।
मृत्युञ्जयमिदं लौहं सिद्धिदं शुभदं नृणाम् ॥ ३७ ॥

प्लीहार्णवो रसः ।—

हिङ्गुलं गन्धकः टङ्गमभ्रकं विषमेकं च ।
प्रत्येकं पलिकं भागं चूर्णयेदतिचिक्कणम् ॥ ३८ ॥
पिप्पली मरिचञ्चैव प्रत्येकञ्च पलार्द्धकम् ।
मर्दयित्वा वटीं कुर्य्यात् वल्लमात्रां प्रयत्नतः ॥ ३९ ॥
सेव्या शेफालिदलजैर्व्वटी माक्षिकसंयुता ।
प्लीहानं षट्प्रकारञ्च हन्ति शीघ्रं न संशयः ॥ ४० ॥
ज्वरं मन्दानलञ्चैव कासं श्वासं वमिं भ्रमिम् ।
प्लीहार्णव इति ख्यातो गहनानन्दभाषितः ॥ ४१ ॥

प्लीहशार्दूलो रसः ।—

सूतकं गन्धकं व्योषं समभागं पृथक् पृथक् ।
एभिः समं ताम्रभस्म योजयेच्चैव बुद्धिमान् ॥ ४२ ॥

अम्लवेतसं, निशायुगं—हरिद्राद्वयं, कानकं—शोधितं जैपालवीजम् । मात्रा विविच्य देया ॥ ३०—३७ ॥

प्लीहार्णवरसे ।—जम्बीररसेन शोधितं हिङ्गुलं ग्राह्यम् । विषञ्चात्र गोमूत्रशोधितम् । "शेफालिदलजैः" इत्यत्र रसैरिति शेषः ॥३८—४१॥

मनःशिला वराटञ्च तुल्यं रामठलौहकम् ।
जयन्ती रोहितञ्चैव क्षारटङ्कणसैन्धवम् ॥ ४३ ॥
विड़ं चित्रं कानकञ्च रसतुल्यं पृथक् पृथक् ।
भावयेत् त्रिदिनं यावत् त्रिवृच्चित्रकणाऽऽर्द्रकैः ॥ ४४ ॥
गुञ्जामात्रां वटीं खादेत् सद्यः प्लीहविनाशिनीम् ।
पिप्पलीमधुसंयुक्तां द्विगुञ्जां वा प्रयोजयेत् ॥ ४५ ॥
प्लीहानमग्रमांसञ्च यकृद्गुल्मं सुदुस्तरम् ।
आमाशयेषु सर्वेषु चोदरे शोथविद्रधौ ॥ ४६ ॥
अग्निमान्द्ये ज्वरे चैव प्लीह्नि सर्वज्वरेषु च ।
श्रीमद्गहननाथेन प्लीहशार्दूलः भाषितः ॥ ४७ ॥

प्लीहारिरसः ।—

द्विकर्षं लौहभस्मापि कर्षं ताम्रं प्रदापयेत् ।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः ॥ ४८ ॥
मृगाजिनभस्मपलं लिम्पाकाङ्घ्रित्वचः पलम् ।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिकां वटीम् ॥ ४९ ॥
नवगुञ्जामितां खादेच्चाथ नित्यं हि पूतवाक् ।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः ॥ ५० ॥

प्लीहशार्दूलरसे ।—व्योषं—त्रिकटु, क्षारं—यवक्षारः, कानकं—जैपालम् । "त्रिवृच्चित्रकणाऽऽर्द्रकैः" इत्यत्र "त्रिवृच्चित्राऽऽर्द्रधुस्तूरैः" इति पाठान्तरम् ॥ ४३—४७ ॥

प्लीहारिरसे ।—"शुद्धसूतं तथा गन्धं कर्षमानम्" इति ।—अत्र प्रत्येकमिति शेषः, लिम्पाकाङ्घ्रित्वक्—निम्बुविशेषमूलत्वक् ॥ ४८—५० ॥

अपरप्लीहारिरस: ।—

कर्षैकं तालचूर्णस्य तत्पादांशं सुवर्णकम् ।
पलार्द्धं मृतताम्रञ्च तत्समं शुद्धमभ्रकम् ॥ ५१ ॥
मृगाजिनस्य भस्मापि कर्षमत्र प्रदापयेत् ।
लिम्पाकाङ्घ्रित्वचस्तद्वत् सर्वमेकत्र कारयेत् ॥ ५२ ॥
रसगुञ्जाप्रमाणेन वटिकां कारयेत् ततः ।
मधुना वह्निचूर्णेन खादेन्नित्यं यथाबलम् ॥ ५३ ॥
असाध्यमपि प्लीहानं हन्त्यवश्यं न संशयः ।
यकृतं पाण्डुरोगञ्च गुल्मादिकभगन्दरान् ॥ ५४ ॥

लौहमृत्युञ्जयो रस: ।—

रसगन्धकलौहाभ्रं कुनटी मृतताम्रकम् ।
विषमुष्टिवराटञ्च तुल्यं शङ्खं रसाञ्जनम् ॥ ५५ ॥
जातीफलञ्च कटुकी द्विक्षारं कानकं तथा ।
व्योषं हिङ्गु सैन्धवञ्च प्रत्येकं सूततुल्यकम् ॥ ५६ ॥
श्लक्ष्णचूर्णीकृतं सर्वमेकत्र भावयेत् ततः ।
सूर्य्यावर्त्तरसेनैव विल्वपत्ररसेन च ॥ ५७ ॥
सूर्य्यावर्त्तेन मतिमान् वटिकां कारयेत् ततः ।
प्लीहानं यकृतं गुल्ममष्ठीलाञ्च विनाशयेत् ॥ ५८ ॥
अग्रमांसं तथा शोथं तथा सर्वोदराणि च ।
वातरक्तञ्च कमठं चान्तर्विद्रधिमेव च ॥ ५९ ॥

अपरप्लीहारिरसे ।—रसगुञ्जा—षट्गुञ्जेत्यर्थः ॥ ५१—५४ ॥

लौहमृत्युञ्जयरसे ।—कुनटी—मनःशिला, विषमुष्टिः,—"कुंचिला"

महामृत्युञ्जयो रसः ।—

रसगन्धकलौहाभ्रं कुनटी तुत्थताम्रकम् ।
सैन्धवञ्च वराटञ्च वागुजी विड़शङ्खकम् ॥ ६० ॥
चित्रकं हिङ्गु कटुकी द्विक्षारं कट्फलं तथा ।
रसाञ्जनं जयन्ती च टङ्कणं समभागिकम् ॥ ६१ ॥
एतत्सर्वं विचूर्ण्याथ दिनमेकं विभावयेत् ।
आर्द्रकस्वरसेनैव गुडूच्याः स्वरसेन च ॥ ६२ ॥
गुञ्जामात्रां वटीं कृत्वा भक्षयेन्मधुना सह ।
नानारोगप्रशमनो यकृद्गुल्मोदराणि च ॥ ६३ ॥
अग्रमांसं तथा प्लीहमग्निमान्द्यमरोचकम् ।
एतान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा ।
महामृत्युञ्जयो नाम महेशेन प्रकाशितः ॥ ६४ ॥

बृहद्गुड़पिप्पली ।—

विड़ङ्गं त्र्यूषणं हिङ्गु कुष्ठं लवणपञ्चकम् ।
त्रिक्षारं फेनकं चव्यं श्रेयसी कृष्णजीरकम् ॥ ६५ ॥
तालपुष्पोद्भवं क्षारं नाड्याः कुष्माण्डकस्य च ।
अपामार्गोद्भवं क्षारं चिञ्चायाः चित्रकं तथा ॥ ६६ ॥
एतानि समभागानि पुराणो द्विगुणो गुड़ः ।
गुड़तुल्यं प्रदातव्यं चूर्णञ्चैव कणोद्भवम् ॥ ६७ ॥

इति वङ्गभाषा । द्विक्षारं—यवक्षारं सर्जिक्षारञ्च, कानकं—जैपालफलम् ॥ ५५—५९ ॥

महामृत्युञ्जयरसे ।—वागुजी—हाकुचीति ख्याता ; केचित्तु सोमराजीत्याहुः ॥ ६०—६४ ॥

मर्दयित्वा दृढ़े पात्रे मोदकानुपकल्पयेत्।
भक्षयेद् वर्द्धयेन्नित्यं प्लीहानं हन्ति दुस्तरम् ॥ ६८ ॥
प्रमेहं पाण्डुरोगञ्च कामलां वह्निमान्द्यकम्।
यकृतं पञ्चगुल्मञ्च तूदरं सर्वरूपकम् ॥ ६९ ॥
जीर्णज्वरं तथा शोथं कासं पञ्चविधं तथा।
अश्विभ्यां निर्मिता ह्येषा सुबृहद्गुड़पिप्पली ॥ ७० ॥

ताम्रकल्पम्।—

अभ्रपारदगन्धञ्च कर्षद्वयमितं पृथक्।
सर्वैः समं भवेत् ताम्रं जम्बीराम्लेन मर्दयेत् ॥ ७१ ॥
सूर्य्यावर्त्तरसैः पश्चात् कणा मोचरसेन च।
योजयेत् तीव्रघर्मे तु यावत् सर्वन्तु जीर्य्यति ॥ ७२ ॥
जम्बीरस्य रसैर्भूयो रसं दण्डेन चालयेत्।
दृढ़े शिलामये पात्रे चूर्णयेदतिशोभनम् ॥ ७३ ॥
रक्तिद्वयक्रमेणैव योज्यं माषद्वयावधि।
ह्रासयेच्च क्रमेणैव तथा चैव विवर्द्धयेत् ॥ ७४ ॥
जीर्णे भुञ्जीत शाल्यन्नं क्षीरं घृतसमन्वितम्।
हन्त्यम्लपित्तं विविधां ग्रहणीं विषमज्वरम् ॥ ७५ ॥
चिरज्वरं प्लीहगदं यकृद्रोगं सुदुस्तरम्।
अश्मांसं तथा शोथं कास्यक्रोड़ं सुदुर्जयम् ॥ ७६ ॥

बृहद्गुड़पिप्पलिकायाम्।—त्रूषण—त्रिकटुकं, त्रिक्षारं—यवक्षारं, सर्जिक्षारं, टङ्कणक्षारञ्चेति; फेनकं—समुद्रफेनं, तालपुष्पोद्भवं क्षारमिति—ताललवणक्षारमित्यर्थः। नाड्याः कुष्माण्डकस्य—कुष्माण्डलताभस्मजक्षारम्। कणा—पिप्पली ॥ ६५—७० ॥

कमठञ्च तथा शोथमौदरञ्च सुदारुणम् ।
धातुवृद्धिकरं वृष्यं बलवर्णकरं शुभम् ॥ ७७ ॥
सद्यो वह्निकरञ्चैव सर्वरोगहरं परम् ।
मुखशुद्धिर्विधातव्या पर्णैश्चूर्णसमन्वितैः ।
ताम्रकल्पमिदं नाम्ना सर्वरोगप्रशान्तये ॥ ७८ ॥

दारुभस्म :—

दारु सैन्धवगन्धञ्च भस्मीकृत्य प्रयत्नतः ।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत् ॥ ७९ ॥

वज्रक्षारम् ।—

सामुद्रं सैन्धवं काचं यवक्षारं सुवर्चलम् ।
टङ्कणं सर्जिकाक्षारं तुल्यं सर्वं विचूर्णयेत् ॥ ८० ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन लिप्त्वाऽर्कपत्रञ्च रुद्ध्वा चान्तःपुटे पचेत् ॥ ८१ ॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलारजः ।
जीरकं रजनी वह्निर्नवभागं समं समम् ॥ ८२ ॥
क्षारार्द्धमिव सर्वञ्च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥ ८३ ॥

ताम्रकल्पे ।—अक्षं,—सौवर्चललवणम् ॥ ७१—७८ ॥

दारुभस्मनि ।—दारु—दारुमूषम् ॥ ७९ ॥

वज्रक्षारे ।—काचं—लवणविशेषः, त्र्यूषणं—त्रिकटु, त्रिफलारजः,—त्रिफलाचूर्णानि, रजनी—हरिद्रा, वह्निः,—चित्रकमूलम् । सामुद्रादि सर्वम् अर्कक्षीरैः तथा स्नुहीक्षीरैः आतपे भावयेत्, ततस्तेन कल्केन अर्क-

सर्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत्।
अग्निमान्द्येऽप्यजीर्णेऽपि भक्ष्यं निष्कद्वयं द्वयम् ॥ ८४ ॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम्।
कफे गोमूत्रसंयुक्तमारनालं त्रिदोषजे ॥ ८५ ॥

उदरामयकुम्भिकेशरी रसः।—

रसगन्धकभस्मशुल्वकं कटुकक्षारयुगं सटङ्कणम्।
कणमूलकचव्यचित्रकं लवणान्येव यमानिरामठम् ॥ ८६ ॥
समभागमिदं विभावयेत् खरतापे त्वथ जम्भवारिणा।
उदरामयकुम्भिकेशरी-रस एष प्रथितोऽस्य माषकः ॥ ८७ ॥
सुरवार्य्यनुदापयेद्भिषक् प्रसभं हन्ति च सव्रणं गदम्।
यकृतं क्रिमिमग्रमांसकं कमठं प्लीहजलोदराह्वयम्।
जठरामयपञ्चगुल्मकं पवनं साममथाम्लपित्तकम् ॥ ८८ ॥

वारिशोषणो रसः।—

चतुर्विंशतिभागाः स्युर्गन्धाद्वङ्गं तदर्द्धकम्।
वङ्गभागाद्भवेदर्द्धः पारदः कृष्णमभ्रकम् ॥ ८९ ॥

पत्रं—ताम्रपत्रं लिप्त्वा अन्तर्दग्धव्यं यथा भस्मीभवति। ततस्तत्क्षार-सहितं ताम्रं विचूर्ण्य लूषणादिचूर्णञ्च यथोक्तं गृहीत्वा मर्द्दयेदिति ॥ ८०—८५ ॥

उदरामयकुम्भिकेशरिरसे।—शुल्वं—ताम्रं, कटुकं—त्रिकटुकम्। कणमूलं—पिप्पलीमूलं, छन्दसत्वात् ह्रस्वः, एवं सुर इत्यत्रापि ; अत्र चव्यचित्रकचूर्णन्तु न प्रयच्छन्ति वृद्धाः। लवणानि—सैन्धव-सौवर्चल-विड़ौद्भिद-सामुद्रभेदात् पञ्चविधानि। अनुपानं सुरा अथवा वारि

॥ ८६—८८ ॥

चतुर्दशविभागं स्यान्मृतं तद्दीयते पुनः ।
मृतलौहमष्टभागं मृतताम्रं नवात्र तत् ॥ ९० ॥
मृतहेम द्वयं तत्र मृतरूप्यञ्च सप्तकम् ।
अतिशुद्धमतिस्थूलं मृतं हीरं त्रयोदश ॥ ९१ ॥
भागा ग्राह्या माक्षिकस्य विशुद्धस्यात्र षोड़श ।
अष्टादशमितं ग्राह्यं नवकाशीशकं पुनः ॥ ९२ ॥
तुत्थकञ्च षड़ेवात्र नवीनं ग्राह्यमेव च ।
तालकञ्च चतुर्भागं शिला योज्यास्त्रयो बुधैः ॥ ९३ ॥
शैलेयं पञ्च दातव्यं सर्वमेकत्र नूतनम् ।
मृतमौक्तिकभागैकं सौभाग्यं द्वयमेव च ॥ ९४ ॥
कुट्टयित्वा विचूर्ण्याथ जम्बीरस्य रसेन वै ।
भावयेत् सप्तधा गाढ़ं गुड़िकां तस्य कारयेत् ॥ ९५ ॥
पानकद्वितये कृत्वा मुद्रयेत् पानकद्वयम् ।
घटमध्ये निवेश्याथ दत्त्वा पूर्वञ्च बालुकाम् ॥ ९६ ॥
ऊर्द्ध्वञ्च तां पुनर्दत्त्वा बालुकां मुद्रयेन्मुखम् ।
अहोरात्रं दहेदग्नौ स्वाङ्गशीतं समुद्धरेत् ॥ ९७ ॥
वकुलस्य च वीजेन कण्टकारीद्वयेन च ।
गुड़ूचीत्रिफलावारा भावयेत् सप्तसप्ततः ॥ ९८ ॥
वृद्धदाररसेनापि तथा देयास्तु भावनाः ।
गिरिकर्ण्या रसेनापि मत्स्यरोहितपित्ततः ॥ ९९ ॥
एवं सिद्धो भवेत् सम्यक् रसोऽसौ वारिशोषणः ।
देवान् गुरून् समभ्यर्च्य यतिनो ब्राह्मणांस्तथा ॥ १०० ॥

वारिशोषणरसे ।—पानकद्वितयं—खर्परद्वयं, कण्टकारीद्वयं—कण्ट-

रत्तिकाद्वितयं देयं सन्निपाते समुच्छ्रये।
मरिचेन समं देयं तेन जागर्त्ति मानवः ॥ १०१ ॥
श्लैष्मिके च गदे देयं ग्रहण्यामग्निमान्द्यके।
प्लीह्नि पाण्डौ प्रयोक्तव्यं त्रिकटुत्रिफलाऽम्भसा ॥ १०२ ॥
शूलरोगे प्रयोक्तव्यमुदावर्त्ते विशेषतः।
कुष्ठे सुदुष्टे देयोऽयं काकोडुम्बरिकाऽम्भसा ॥ १०३ ॥
अतिवह्निकरः श्रोदो बलवर्णाग्निवर्द्धनः।
धन्वन्तरिकृतः सद्यो रसः परमदुर्लभः।
सर्वरोगे प्रयोक्तव्यो निःसन्देहं भिषग्वरैः ॥ १०४ ॥

सर्वतोभद्रो रसः।—

सूतं गन्धं तपनगगनं कान्तलौहस्य चूर्णं
कृत्वैकध्यं दृषदि मथितं शृङ्गबेरस्य वारा।
युञ्ज्याद्रोगे यकृति गुदजे प्लीह्नि सर्वज्वरेषु
शोथे पाण्डौ क्रिमिकृतगदे सर्वतः कामलायाम् ॥ १०५ ॥
कासे श्वासे च मेहे जलजठरगदे सर्वदोषप्रसूते।
ख्यातो योगः सुरमणिकृतः सर्वतोभद्रनामा ॥ १०६ ॥

[इति प्लीहरोग-चिकित्सा]।

कारी वृहती च। त्रिफलावारा—त्रिफलाक्वाथेन, गिरिकर्णी—अपराजिता ॥ ८८—१०४ ॥

सर्वतोभद्रे।—तपनं—ताम्रभस्म, गगनम्—अभ्रभस्म। कान्तलौहस्य चूर्णं—लौहभस्म, दृषदि—प्रस्तरखल्ले, मथितं—मर्दितं, शृङ्गबेरस्य वारा—आर्द्रकरसेन। १०५।१०६ ॥

इति प्लीहरोगाधिकारः।

अथ शोथरोग-चिकित्सा ।—

—०*✱—

त्रिकट्वाद्यं लौहम् ।—

त्रिकटु त्रिफला दन्ती मार्गत्रिमदशुण्ठकैः ।
पुनर्नवासमायुक्तं शोथं हन्ति सुदुस्तरम् ।
लौहं शोथोदरस्थौल्यजलोदरनिवारणम् ॥ १ ॥

कटुकाद्यं लौहम् ।—

कटुकी त्रूषणं दन्ती विडङ्गं त्रिफला तथा ।
चित्रको देवकाष्ठञ्च त्रिवृद्वारणपिप्पली ॥ २ ॥
तुल्यान्येतानि चूर्णानि द्विगुणं स्यादयोरजः ।
क्षीरेण पीतमेतत्तु श्रेष्ठं श्वयथुनाशनम् ॥ ३ ॥

त्रूषणाद्यं लौहम् ।—

अयोरजस्त्र्यूषणयावशूक-चूर्णञ्च पीतं त्रिफलारसेन ।
शोथं निहन्यात् सहसा नरस्य यथाऽशनिर्वृक्षमुदीर्णवेगः ॥ ४ ॥

उत्सेधसाधर्म्यादनन्तरं शोथचिकित्सामाह ।—त्रिकट्वादिलौहे ।—मार्गः,—अपामार्गः । शुण्ठकैरिति—मूलकशुण्ठकैः, शुष्कमूलकैरित्यर्थः । लौहमत्र सर्वचूर्णसमम् ॥ १ ॥

कटुकाद्यलौहे ।—त्रूषणं—त्रिकटु । वारणपिप्पली—गजपिप्पली ॥ २।३ ॥

त्रूषणाद्यलौहे ।—सर्वचूर्णसमं लौहम् । यावशूकं—यवक्षारम् ॥ ४ ॥

सुवर्चलाद्यं लौहम्।—

सुवर्चला व्याघ्रनखं चित्रकं कटुरोहिणी।
चव्यञ्च देवकाष्ठञ्च दीप्यकं लौहमेव च।
शोथं पाण्डुं तथा कासमुदराणि निहन्ति च॥ ५॥

क्षारगुड़िका।—

क्षारद्वयं स्यात् लवणानि पञ्च चत्वार्य्ययो व्योषफलत्रिकञ्च।
सपिप्पलीमूलविड़ङ्गसारं मुस्ताऽजमोदाऽमरदारुविल्वम्॥ ६॥
कलिङ्गकश्चित्रकमूलपाठा यष्ट्याह्वयं सातिविषं पलाशम्।
सहिङ्गुकर्षं त्वतिसूक्ष्मचूर्णं द्रोणं तथा मूलकशुण्ठकानाम्॥ ७॥
स्याद्भस्मनस्तत् सलिलेन साध्यमालोड्य यावद् घनमप्यदग्धम्।
स्यान्नं ततः कोलसमाञ्च मात्रां कृत्वा तु शुष्कां विधिना प्रयुञ्ज्यात्॥८
प्लीहोदरं श्वित्रहलीमकार्शः-पाण्ड्वामयारोचकशोथशोषान्।
विसूचिकागुल्मगराश्मरीश्च सश्वासकासान् प्रणुदेत् सकुष्ठान्॥९॥
सौवर्चलं सैन्धवञ्च विड़मौद्भिदमेव च।
सामुद्रलवणञ्चात्र जलमष्टगुणं भवेत्॥ १०॥

[इति शोथरोग-चिकित्सा]।

सुवर्चलाद्यलौहे :—देवकाष्ठं—देवदारु, दीप्यकं—यमानी॥ ५॥

क्षारगुड़िकायाम्।—लवणानि पञ्चेति—पञ्चलवणानि। चत्वार्य्यय इति—वज्र-पाण्डा-तीक्ष्ण-कान्तभेदात् चतुर्विधं लौहं ग्राह्यम्। "क्षारद्वयं स्याल्लवणानि चत्वार्य्ययोरजो व्योषफलत्रिके च" इति चक्रदत्तधृतपाठः। [तत्र सैन्धव-सौवर्चल-विड़ौद्भिदानि चत्वारि लवणानि;

अथार्बुदरोग-चिकित्सा ।—

—०✱०—

रौद्ररसः ।—

शुद्धसूतं समं गन्धं मर्द्यं यामचतुष्टयम् ।
नागवल्लीरसैर्युक्तं मेघनादपुनर्नवैः ॥ १ ॥
गोमूत्रपिप्पलीयुक्तं मर्द्यं रुद्ध्वा पुटेल्लघु ।
लिह्यात् चौद्रैः रसो रौद्रो गुञ्जामात्रोऽर्बुदं जयेत् ॥ २ ॥

योगवाहिरसान्तरप्रयोगोपदेशः ।—

रामबाणादिकान् योग-वाहिनोऽत्र प्रयोजयेत् ॥ ३ ॥

[इति अर्बुदरोग-चिकित्सा]।

अयोरजः,—यथाविधिभस्मीकृतं लौहचूर्णम् ; अयमेव पचः वृद्धव्यवहारसिद्धः]। विड़ङ्गसारं—विड़ङ्गतण्डुलम् । मूलकभस्मनः सलिलं पुनः पाकात् घनतामुपगते यवक्षारादि सर्वं प्रक्षेपणीयम् ॥ ६—१० ॥

इति श्लीपदरोगाधिकारः ।

———

उत्सेधसाधर्म्यादनन्तरमर्बुदचिकित्सामाह ।—रौद्ररसे ।—मेघनादः,—मारिषः, "चाँपानटे" इति वङ्गभाषा ॥ १—३ ॥

इति अर्बुदरोगाधिकारः ।

———

अथ श्लीपदरोग-चिकित्सा ।—

—०*०—

नित्यानन्दो रसः ।—

हिङ्गुलात् सम्भवं सूतं गन्धको मृतताम्रकम् ।
वङ्गं तालञ्च तुत्थञ्च शङ्खं कांस्यं वराटकम् ॥ १ ॥
त्रिकटु त्रिफला लौहं विड़ङ्गं पटुपञ्चकम् ।
चविका पिप्पलीमूलं हवुषा च वचा तथा ॥ २ ॥
शटी पाठा देवदारु एला च वृद्धदारकम् ।
एतानि समभागानि सञ्चूर्ण्य वटिकां कुरु ॥ ३ ॥
हरीतकीरसं दत्त्वा पञ्चगुञ्जामितां शुभाम् ।
एकैकां भक्षयेत् नित्यं शीतं वारि पिबेदनु ॥ ४ ॥
श्लीपदं कफवातोत्थं रक्तमांसगतञ्च यत् ।
मेदोगतं धातुगतं हन्त्यवश्यं न संशयः ॥ ५ ॥
श्रीमद्गहननाथेन निर्मितो विश्वसम्पदे ।
नित्यानन्दरसश्चायं यत्नतः श्लीपदे गदे ॥ ६ ॥

उत्सेधसाधर्म्यात् तथाऽर्बुदेन सह कफसम्बन्धाव्यभिचारसाम्यात् च अनन्तरं श्लीपदचिकित्सामाह । नित्यानन्दरसे ।—शङ्खं वराटञ्च दग्धव्यम् । हवुषेति ।—स्वनामख्याता, शुष्काम्रमुकुलमिति टीका ; तदभावे धान्यकम् । "एला च वृद्धदारकम्" इत्यत्र "त्वगेला वृद्धदारकम्" इति पाठान्तरम् । अत्र "त्रिवृता चित्रकं दन्ती ग्रहीत्वा तु पृथक्

कणादिवटी ।—

कणा-वचा-दारु-पुनर्नवानां चूर्णं सबिल्वं समवृद्धदारम् ।
संमर्द्य चैतस्य निहन्ति वल्लः सकाञ्जिकः श्लीपदमुग्रवेगम् ॥ ७॥

[इति श्लीपदरोग-चिकित्सा] ।

अथ भगन्दररोग-चिकित्सा ।—

—०✱०—

रविताण्डवो रसः ।—

शुद्धसूतं द्विधा गन्धं कुमारीरसमर्दितम् ।
त्र्यहान्ते गोलकं कृत्वा ततस्तेन प्रलेपयेत् ॥ १ ॥
तयोः समं ताम्रपत्रं हण्डिकान्तर्निवेशयेत् ।
तद्भाण्डं भस्मनाऽऽपूर्य्य चुल्ल्यां तीव्राग्निना पचेत् ॥ २ ॥
द्वियामान्ते समुद्धृत्य चूर्णयेत् स्वाङ्गशीतलम् ।
जम्बीरस्य रसैः पिष्ट्वा रुद्ध्वा सप्तपुटे पचेत् ॥ ३ ॥

पृथक्" इत्यधिकपाठः । रसरत्नाकरे तु अत्र—"त्रिवृच्चित्रक-दन्तीनां भावयित्वा रसैः पृथक्" इति पाठान्तरं दृश्यते । सूतादिवृद्धदारकान्तानि एकत्रिंशद्द्रव्याणि समभागानि सञ्चूर्ण्य हरीतकीक्वाथेन सम्पिष्य पञ्चगुञ्जाप्रमाणां गुड़िकां कुर्य्यादित्यर्थः ॥ १—६ ॥

कणादिवटिकायाम् ।—"चूर्णम्" इत्यत्र "सूतम्" इति पाठे—सूतं—सूतभस्म ॥ ७ ॥

इति श्लीपदरोगाधिकारः ।

उत्सेधसाधर्म्यादनन्तरं भगन्दरचिकित्सामाह । रविताण्डवरसे ।—

गुञ्जैकं मधुनाऽऽज्येन लिह्याद्धन्ति भगन्दरम्।
मूषलीलवणञ्चानु ह्यारनालयुतं पिबेत्॥ ४॥
भुञ्जीत मधुराहारं दिवास्वापञ्च मैथुनम्।
वर्जयेच्छीतलाहारं रसेऽस्मिन् रविताण्डवे॥ ५॥

भगन्दरहरो रसः।—

सूतस्य द्विगुणेन शुद्धबलिना कन्यापयोभिस्त्र्यहम्
शुद्धं ताम्रमयः समस्ततुलितं पात्रे निधायोपरि।
स्वेद्यं यामयुगञ्च भस्म-पिठरे निम्बूजलैः सप्तधा
साकं तद् पुटयेद् भगन्दरहरो गुञ्जोन्मितः स्यादिति॥ ६॥

[इति भगन्दररोग-चिकित्सा]।

रसस्य द्विगुणं गन्धं कुमार्य्या रसैः त्रिदिनं विमर्द्य हण्डिकामध्ये निक्षिप्य ताम्रकटोरिकया आच्छाद्य कटोरिकां स्वल्पशरावेण आच्छाद्य च सन्धिं लिप्त्वा तद्भाण्डं भस्मना आपूर्य्य कपर्य्यां पचेत्, तत उद्धृत्य चूर्णयेत्; ततः जम्बीररसेन पिष्ट्वा सप्तवारं प्रपुटेत्॥ १—५॥

भगन्दरहररसे।—बलिना—गन्धकेन॥ ६॥

* इति भगन्दररोगाधिकारः।

अथोपदंशरोग-चिकित्सा ।—

—०*०—

उपदंशे साधारणविधिः ।—

स्निग्धस्विन्नशरीरस्य ध्वजमध्ये शिराव्यधः ।
जलौकःपातनं वा स्यादूर्द्ध्वाधःशोधनं तथा ॥ १ ॥
सद्यो निर्जितदोषस्य रुक्शोथावुपशाम्यतः ।
पाको रक्ष्यः प्रयत्नेन शिश्नक्षयकरो हि सः ॥ २ ॥

धावनकषायः ।—

त्रिफलायाः कषायेण भृङ्गराजरसेन वा ।
व्रणप्रक्षालनं कुर्य्यादुपदंशप्रशान्तये ॥ ३ ॥

लेपः ।—

दहेत् कटाहे त्रिफलां सा मसी मधुसंयुता ।
उपदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम् ॥ ४ ॥

स्थानप्रत्यासत्त्या उपदंशचिकित्सामाह, स्निग्धस्विन्नेत्यादि ।—आदौ स्निग्धं स्विन्नञ्च कृत्वा ध्वजमध्ये—लिङ्गमध्ये । जलौकःपातनं—जलौकसा रक्तमोक्षणम् । ऊर्द्ध्वाधःशोधनं—वमनविरेचनम् । निर्जित-दोषस्य—वमनविरेचनादिना निर्हृतदोषस्य । पाको रक्ष्यः इति ।—यथा पाकं न व्रजेत् तथा प्रयत्नः कार्य्यः ॥ १।२ ॥

धावनकषाये ।—त्रिफलायाः इत्यादि ।—षड़ङ्गपरिभाषया त्रिफलायाः क्वाथं कृत्वा तेन उपदंशव्रणधावनं कार्य्यम् ॥ ३ ॥

लेपे ।—दहेत् इत्यादि ।—लौहकटाहे समभागा त्रिफला दग्धव्या,

भैरवरसः।—

शुद्धसूतं ग्रहीतव्यं रक्तिकाशतमात्रकम्।
त्रिगुणां शर्करां लौहे निम्बदण्डेन मर्दयेत्॥ ५॥
याममात्रं ततो दद्याच्छ्वेतं खदिरचूर्णकम्।
सूततुल्यं ततः कुर्य्यान्मर्दनात् कज्जलोपमम्॥ ६॥
विंशतिर्वटिकाः कार्य्याः स्थाप्या गोधूमचूर्णके।
निःशेषनिःसृता ज्ञात्वा पिड़कास्ताः कलेवरे॥ ७॥
भैरवं देवमभ्यर्च्य बलिं तस्मै प्रदाय च।
विधाय योगिनीपूजां दुर्गामभ्यर्च्य यत्नतः॥ ८॥
वटिकास्ताः प्रयोक्तव्या भिषजा जानता क्रियाम्।
दिवसत्रितयं दद्यात् तिस्रस्तिस्रो विजानता॥ ९॥
चतुर्थाच्च समारभ्य एकामेकां प्रयोजयेत्।
एवं चतुर्दशदिने नीरोगो जायते नरः॥ १०॥

यावत् अङ्गारकल्पा भवेत्; यद्वा—नूतनस्थाल्यां समभागत्रिफलां संस्थाप्य शरावेण मुखमाच्छाद्य सन्धिलेपं कृत्वा भस्मीकर्त्तव्या; ततः चूर्णीकृत्य वस्त्रेण शोधयित्वा मधुना संमिश्र्य उपदंशव्रणे लेपः कार्य्यः॥ ४॥

भैरवरसे।—"त्रिगुणां शर्कराम्" इति—शतत्रयरक्तिमिताम्। लौहे—लौहपात्रे। याममात्रं—प्रहरमात्रम्। "श्वेतं खदिरचूर्णकं सूततुल्यम्" इति—श्वेतखदिरचूर्णस्य रक्तिकाशतमात्रकम्। सर्वं संमर्द्य विंशतिः वटिकाः कृत्वा गोधूमचूर्णमध्ये स्थापयेत्। निःशेषेति।—उपदंशपिड़काः सर्वाः एव यदा निःसृताः भवेयुः तदा वटिकाः प्रयोज्याः। दिवसत्रितयमिति—दिनत्रयं यावत्, सायं प्रातर्मध्याह्ने

पथ्यं शर्करया सार्द्धमुष्णान्नं घृतगन्धि च।
कुर्य्यात्साकाङ्क्षमुत्थानं सकृद्भोजनमिष्यते॥ ११॥
जलपानं जलस्पर्शं कदाचन न कारयेत्।
दुःसहायान्तु तृष्णायामिक्षुदाड़िमकादिकम्॥ १२॥
शौचकार्य्येऽप्युष्णवारि वाससा प्रोञ्छनं द्रुतम्।
वाताऽऽतपाग्निसम्पर्कं दूरतः परिवर्जयेत्॥ १३॥
मेघागमे वा शीते वा कार्य्यमेतद्विजानता।
मुखरोगे तु सञ्जाते मुखरोगहरी क्रिया॥ १४॥
श्रमाध्वभाराध्ययन-स्वप्नालस्यानि वर्जयेत्।
ताम्बूलं भक्षयेन्नित्यं कर्पूरादिसुवासितम्॥ १५॥
क्रिया श्लेष्महरी युक्ता वातपित्ताविरोधिनी।
लवणं वर्जयेदम्लं दिवानिद्रां तथैव च॥ १६॥
रात्रौ जागरणञ्चैव स्त्रीमुखालोकनं तथा।
सप्ताहद्वयमुत्क्रम्य स्नानमुष्णाम्बुना चरेत्॥ १७॥
पथ्यं कुर्य्याद्धितमिदं जाङ्गलानां रसादिभिः।
व्यायामाद्यं वर्जनीयं यावन्न प्रकृतिर्भवेत्॥ १८॥
एवं कृतविधानस्तु यः करोत्येतदौषधम्।
स एव पापरोगस्य पारं याति जितेन्द्रियः॥ १९॥
पिड़का विलयं यान्ति बलं तेजश्च वर्द्धते।
रुजा च प्रशमं याति ग्रन्थिशोथश्च शाम्यति॥ २०॥

एकैकां कृत्वा वासरत्रयं तिस्रो वटिकाः देयाः। चतुर्थदिनमारभ्य चतुर्दशदिनं यावत् प्रातरेव एकैका वटिका प्रयोज्या। सकृद्भोजनम्—एकवारभोजनम्। प्रोञ्छनं—मार्जनम्। मेघागमे—वर्षासु। सप्ताह-

अस्थ्नां भवति दार्ढ्यंच्च आमवातश्च शाम्यति।
भैरवेण समाख्यातो रसोऽयं भैरवाख्यकम्॥ २१॥

रसशेखरः।—

पारदञ्चाहिफेनञ्च द्विर्द्वादशकरक्तिकम्।
अयःपात्रे निम्बकाष्ठे मर्दयेत् तुलसीद्रवैः॥ २२॥
तस्मिन् संमूर्च्छिते दद्याद्दरदं रससम्मितम्।
मर्दयेच्च तुलस्यैव ततश्चैतानि दापयेत्॥ २३॥
जातीकोषफले चैव पारसीययमानिकाम्।
आकारकरभञ्चैव द्वात्रिंशद्रक्तिकाम्मति॥ २४॥
मर्दयेत् तुलसीतोयैरेतेषां द्विगुणं शुभम्।
दद्यात् खदिरसत्त्वञ्च वटिका चणकप्रमा॥ २५॥
सायं द्वे द्वे प्रयोज्ये च लवणाम्लञ्च वर्जयेत्।
गलत्कुष्ठं तथा स्फोटान् दुष्टान् गर्दभिकामपि॥ २६॥

द्वयमुत्क्रम्य—सप्ताहद्वयमतीत्य, चतुर्दशदिनानन्तरमित्यर्थः। जाङ्गलानां—जाङ्गलमृगपक्षिणाम्। प्रकृतिः,—प्रकृतिस्थ इत्यर्थः॥ ५—२१॥

रसशेखरे।—"द्विर्द्वादशकरक्तिकम्" इति—द्विः द्विरावृत्तं द्वादशकरक्तिकम्, अर्थात् चतुर्विंशतिरक्तिकम्; तेन पारदाहिफेनयोः प्रत्येकं चतुर्विंशतिरक्तिकम् इत्यर्थः। अयःपात्रे—लौहपात्रे, निम्बकाष्ठे—निम्बदण्डेन इत्यर्थः। संमूर्च्छिते—सम्यक् मिश्रिते। दरदं—हिङ्गुलम्। जातीकोषफले—जातीकोषः जातीफलञ्च। पारसीययमानिका—"खोरासानी यमानी" इति प्रसिद्धा। आकारकरभः,—"आकरकोरा" इति प्रसिद्धः। जातीकोषादि-आकारकरभान्तानां प्रत्येकं द्वात्रिंशद्

ये स्युर्व्रणा नृणामन्ये उपदंशपुरःसराः ।
तान् सर्वान् नाशयत्याशु सिद्धोऽयं रसशेखरः ॥ २७ ॥

प्रक्रियान्तरम् ।—

योगवाहिरसान् सर्वान् सर्वरोगोदितानपि ।
उपदंशे प्रयुञ्जीत तथा शोणितशोधनम् ॥ २८ ॥

[इति उपदंशरोग-चिकित्सा] ।

अथ कुष्ठरोग-चिकित्सा ।—

—०*०—

कन्याकोटिप्रदानेन गङ्गायां पितृतर्पणे ।
विश्वेश्वरपुरीवासे तत्फलं कुष्ठनाशने ॥ १ ॥
गवां कोटिप्रदानेन चाश्वमेधशतेन च ।
वृषोत्सर्गे च यत् पुण्यं तत्पुण्यं कुष्ठनाशने ॥ २ ॥

गलत्कुष्ठारिरसः ।—

रसो बलिस्ताम्रमयः पुरोऽग्निः शिलाजतु स्याद्विषतिन्दुकञ्च ।
वरा च तुल्यं गगनञ्च सर्वैः करञ्जवीजं सचतुष्टयञ्च ॥ ३ ॥

रक्तिकाः बोध्याः । खदिरसत्त्व—खदिरसारं, तच्च सर्वेभ्यो द्विगुणं देयम् । चणकप्रभा—चणकमिता ॥ २२—२७ ॥

योगवाहि इत्यादि ।—योगवाहिरसान्—रामबाण-वारिशोषणा-दीन् ॥ २८ ॥

इति उपदंशरोगाधिकारः ।

त्वग्गतरक्तदुष्टिसाधर्म्यादनन्तरं कुष्ठचिकित्सितमुच्यते ।—गलत्कुष्ठारि-

संमर्द्य सर्वं मधुना घृतेन घृतस्य पात्रे निहितं प्रयत्नात्।
कर्षं भजेत् प्रत्यहमस्य पथ्यं शाल्योदनं दुग्धमधुत्रयञ्च ॥ ४ ॥
विशीर्णकर्णाङ्गुलिनासिकोऽपि भवेदनेन स्मरतुल्यमूर्त्तिः।
दारापरित्याग इह प्रदिष्टो जलौदनं तत्र निबद्धमूले ॥ ५ ॥

उदयभास्करः।—

गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत्।
ऊषणं पञ्चभागं स्यादमृतञ्च द्विभागिकम् ॥ ६ ॥
श्लक्ष्णचूर्णीकृतं सर्वं रक्तिकैकप्रमाणतः।
दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः ॥ ७ ॥
गलिते स्फुटिते चैव विपुले मण्डले तथा।
विचर्च्चिका-दद्रु-पामा-कुष्ठरोगप्रशान्तये ॥ ८ ॥

तालकेश्वरो रसः।—

धात्रीटङ्कणतालानां दशभागं समुद्धरेत्।

रसे।—बलिः,—गन्धकः, अयः,—लौहभस्म, ताम्रमयश्च मारितम्। पुरः,—गुग्गुलुः, अग्निः,—चित्रकः, गगनम्—अभ्रं, विषतिन्दुकः,—"कुँचिला" इति ख्यातः। वरा—त्रिफला। रसादि-वरान्तानि समभागानि, गगनं सर्वैः तुल्यं, करञ्जवीजञ्च रसापेक्षया चतुर्गुणं, मधुघृते वटीकरणयोग्ये देये। तत्र कुष्ठे बद्धमूले सति सजलमन्नं पथ्यम् ॥ १—५ ॥

उदयभास्करे।—केवलं गन्धकेन सह मृतं ताम्रं दशभागम्। अमृतं—विषं, तस्य द्विभागम्। सर्वं दिनैकं संमर्द्य रक्तिप्रमाणा वटिका कार्य्या ॥ ६—८॥

तालकेश्वररसे।—आमलकीचूर्णं, टङ्कणलाजाः, शोधितहरितालञ्च

धात्र्या रसैर्मर्दयित्वा शिखरीमूलवारिणा ।
सर्वकुष्ठहरः सेव्यः सर्वदा भोजनप्रियः ॥ ९ ॥

ब्रह्मरसः ।—

भागैकं मूर्च्छितं सूतं गन्धकं त्वग्निवागुजी ।
चूर्णन्तु ब्रह्मबीजानां प्रति द्वादशभागिकम् ॥ १० ॥
त्रिंशद्भागं गुड़स्यापि चौद्रेण गुड़िका कृता ।
अयं ब्रह्मरसो नाम्ना ब्रह्महत्याविनाशनः ॥ ११ ॥
द्विनिष्कं भक्षणाद्धन्ति प्रसुप्तिकुष्ठमण्डलम् ।
पातालगरुड़ीमूलं जलैः पिष्ट्वा पिबेदनु ॥ १२ ॥

चन्द्राननो रसः ।—

सूतव्योमाग्नयस्तुल्यास्त्रिभागाः गन्धकस्य च ।
काकोडुम्बरिकाक्षीरैः सर्वमेकत्र मर्दयेत् ॥ १३ ॥
माषमात्रां गुटीं कृत्वा कुष्ठरोगे प्रयोजयेत् ।
देहशुद्धिं पुरा कृत्वा सर्वकुष्ठानि नाशयेत् ।
एष चन्द्राननो नाम साक्षात् श्रीभैरवोदितः ॥ १४ ॥

कुष्ठकालानलो रसः ।—

रसं बलिष्टङ्कणताम्रलौहं भस्मीकृतं मागधिकासमेतम् ।

प्रत्येकं दशभागं गृहीत्वा आमलकीरसेन तत् क्वाथेन वा तथा अपामार्गमूलरसेन मर्दयित्वा वटी कार्य्या ॥ ९ ॥

ब्रह्मरसे ।—अग्निः,—चित्रकः, वागुजी,—सोमराजीबीजं, ब्रह्मबीजं—ब्रह्मयष्टिबीजम् । पातालगरुड़ी—तिक्तालाबुः ॥ १०—१२ ॥

चन्द्राननरसे ।—व्योम—अभ्रम् ; अग्निः,—चित्रकः ॥ १३।१४ ॥

कुष्ठकालानले ।—बलिः,—गन्धकः, मागधिका—पिप्पली,

पञ्चाङ्गनिम्बेन फलत्रिकेण विभावितं राजतरोस्तथैव ।
नियोजयेद्वल्लकयुग्ममानं कुष्ठेषु सर्वेषु च रोगसङ्घे ॥ १५ ॥

वज्रवटी ।—

शुद्धसूताग्निमरिचं सूताद्द्विगुणगन्धकम् ।
काकोडुम्बरिकाक्षीरैर्दिनं मर्द्यं प्रयत्नतः ॥ १६ ॥
वराव्योषकषायेण वटीञ्चास्य समाचरेत् ।
लिह्याद् वज्रवटी ह्येषा पामारोगविनाशिनी ॥ १७ ॥

चन्द्रकान्तिरसः ।—

पलत्रयं मृतं ताम्रं सूतमेकं द्विगन्धकम् ।
त्रिकटुत्रिफलाचूर्णं प्रत्येकञ्च पलं पलम् ॥ १८ ॥
निर्गुण्ड्याश्चार्द्रकद्रावैर्वह्निद्रावैर्विमर्दयेत् ।
दिनैकं तद्विशोष्याथ तुषाग्नौ स्वेदयेद्दिनम् ॥ १९ ॥
समुद्धृत्य विचूर्ण्याथ वागुजीतैलमर्दितम् ।
त्रिदिनं भावयेत् तेन निष्कैकं भक्षयेत् सदा ॥ २० ॥
चन्द्रकान्तिरसो नाम्ना कुष्ठं हन्ति न संशयः ।
तैलं करञ्जवीजोत्थं वह्निगन्धकसैन्धवैः ।
अनुपानं प्रकर्त्तव्यं कल्कं वा वागुजीभवम् ॥ २१ ॥

पञ्चाङ्गनिम्बेन—निम्बस्य पत्रपुष्पफलवल्कलमूलैः । फलत्रिकं—त्रिफला, राजतरुः,—सोनालु: ॥ १५ ॥

वज्रवटिकायाम् ।—अग्निः,—चित्रकः, वरा—त्रिफला, व्योषः,—त्रिकटु । पामा—"सूक्ष्मा बह्वाः पिड़काः स्राववत्यः पामा" इत्युक्तलक्षणा ॥ १६—२१ ॥

सङ्कोचरसः।—

मृततास्राभ्रकं तुल्यं तयोः सूतं चतुर्गुणम्।
शुद्धं तन्मर्दयेत् खल्ले गोलकं कारयेत् ततः॥ २२॥
त्रिभिस्तुल्यं शुद्धगन्धं लौहपात्रे क्षणं पचेत्।
तन्मध्ये गोलकं पाच्यं यावज्जीर्णन्तु गन्धकम्॥ २३॥
एतन्मृद्वग्निना तावत् समुद्धृत्य विचूर्णयेत्।
गुग्गुलुः निम्बपञ्चाङ्गं त्रिफला चामृता विषम्॥ २४॥
पटोलं खादिरं सारं व्याधिघातं समं समम्।
चूर्णितं मधुना लेह्यं निष्कमौडुम्बरापहम्।
रसः सङ्कोचनामाऽयं कुष्ठे परमदुर्लभः॥ २५॥

अमृताङ्कुरलौहम्।—

हुताशमुखसंशुद्धं पलमेकं रसस्य वै।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च॥ २६॥
अभ्रकस्य पलञ्चैकं गन्धकस्य चतुःपलम्।
हरीतकीविभीतक्योश्चूर्णं कर्षद्वयं द्वयोः॥ २७॥

सङ्कोचरसे।—"व्याधिघातं समं समम्" इति—गुग्गुल्वादीनां प्रत्येकमेकभागसमम्। व्याधिघातं—सोनालुः। औडुम्बरापहम्—औडुम्बराख्यकुष्ठनाशनम्; यदुक्तम्,—"उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत्। रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम्॥" इति॥ २२—२५॥

अमृताङ्कुरलौहे।—हुताशमुखसंशुद्धं पलमेकं रसस्य वै" इति।—हुताशमुखेत्यादि-विशेषणेन रससिन्दूरं गृह्णन्तीति केचित्; अपरे तु—हिङ्गुलोद्भवं पारदं पातनायन्त्रयोगात् गृह्णन्ति। वृद्धास्तु प्रायः रससिन्दूरं व्यवहरन्ति। रसादि-सर्वमेकीकृत्य लौहपात्रे त्रिफलाक्वाथेन

अष्टमाषाधिकं तत्र धात्रग्राः पाणितलानि षट्।
घृतञ्चाष्टगुणं लौहाद्द्वात्रिंशत् त्रिफलाजलम्॥ २८॥
एकीकृत्य पचेत् पात्रे लौहे च विधिपूर्वकम्।
पाकमेवास्य जानीयात् शास्त्रज्ञो लौहपाकवित्॥ २९॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्दितम्॥ ३०॥
लौहे च लौहदण्डेन कुर्य्यादेतद् रसायनम्।
अनुपानञ्च कुर्वीत नारिकेलजलं पयः॥ ३१॥
सर्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम्।
अग्निदीप्तिकरं हृद्यं कान्त्यायुर्बलवर्द्धनम्॥ ३२॥
सेव्यो रसो जाङ्गललावकानां वर्ज्यं हि शाकाम्लमपि स्त्रियञ्च।
शाल्योदनं षष्टिकमाज्यमुद्गं क्षौद्रं गुडं क्षीरमिह क्रियायाम्॥३३॥

माणिक्यो रसः —

पलं तालं पलं गन्धः शिलायाश्च पलार्द्धकम्।
चपलः शुद्धसीसञ्च ताम्रमभ्रमयोरजः॥ ३४॥
एतेषां कोलभागञ्च वटक्षीरेण मर्दयेत्।
ततो दिनत्रयं घर्मे निम्बक्काथेन भावयेत्॥ ३५॥

पचनीयम्; पाकशेषे तु त्रिफलाचूर्णं प्रक्षिपेत्। "अभ्रकस्य पलञ्चैकं गन्धकस्य चतुःपलम्" इत्यत्र "गन्धकस्य पलञ्चैकमभ्रकस्य च गुग्गुलोः" इति केचित् पठन्ति, स च न भट्टादिसम्मतः पाठः, नापि वृद्धवैद्यव्यवहारसिद्धः। पाणितलं—कर्षः, तेन धात्र्याः द्वादश तोलकमित्यर्थः॥ २६—३३॥

गुडूचीबालहिन्ताल-वानरीनीलझिण्टिका: ।
शोभाञ्जनमुराऽजाजी-निर्गुण्डीहयमारकम् ॥ ३६ ॥
एषां शाणमितं चूर्णमेकीकृत्य सरित्तटे ।
मृत्पात्रे कठिने कृत्वा मृदम्बरयुते दृढ़े ॥ ३७ ॥
एकाकी पाकविद्वैद्यो नग्न: शिथिलकुन्तल: ।
पचेदवहितो रात्रौ यत्नात् संयतमानस: ॥ ३८ ॥
शनैर्मध्यमवेगेन वह्निना प्रहरद्वयम् ।
प्रात: सम्पूज्य मार्त्तण्डं स्वाङ्गशीतं समुद्धरेत् ॥ ३९ ॥
यदि भाग्यवशाद् एतत् माणिक्याभं शुभं भवेत् ।
तद्धि जानीहि भैषज्यं सर्वकुष्ठविनाशनम् ।
सर्पिषा मधुना लौह-पात्रे तद्दण्डमर्दितम् ॥ ४० ॥
द्विगुञ्जं सर्वकुष्ठानां नाशनं बलवर्द्धनम् ।
शीतलं सारसं तोयं दुग्धं वा पाकशीतलम् ॥ ४१ ॥
आनीतं तत्क्षणादाजमनुपानं सुखावहम् ।
वातरक्तं शीतपित्तं हिक्काञ्च दारुणां जयेत् ॥ ४२ ॥
ज्वरान् सर्वान् वातरोगान् पाण्डुं कण्डूञ्च कामलाम् ।
श्रीमद्गहननाथेन निर्मितो बहुयत्नत: ॥ ४३ ॥

कुष्ठकुठारो रस: ।—

भस्मसूतसमो गन्धो मृतायस्ताम्रगुग्गुलू ।
त्रिफला च महानिम्बश्चित्रकश्च शिलाजतु ॥ ४४ ॥
इत्येतच्चूर्णितं कुर्य्यात् प्रत्येकं शाणषोड़श ।
चतु:षष्टि करञ्जस्य वीजचूर्णं प्रकल्पयेत् ॥ ४५ ॥

चतुःषष्टि मृतञ्चाभ्रं मध्वाज्याभ्यां विलोड़येत्।
स्निग्धभाण्डे स्थितं खादेद् द्विनिष्कं सर्वकुष्ठनुत्।
रसः कुष्ठकुठारोऽयं गलत्कुष्ठविनाशनः ॥ ४६ ॥

तालेश्वररसः।—

गुञ्जाशङ्खकरञ्जचूर्णरजनीभल्लातकाग्निशिखी-
कन्यासूर्य्यपयः पुनर्नवरजो गन्धः तथा सूतकम्।
गोमूत्रे पचितं विड़ङ्गमरिचैः चौद्रञ्च तत्तुल्यकम्
हन्यादाशु विचर्चिकारुजमिदं कण्डूं तथा कैटिमम् ॥ ४७ ॥

राजतालेश्वरः।—

नागस्य भस्म शाणैकं तोलकं गन्धकस्य च।
द्विनिष्कं शुद्धतालस्य सर्वमेतद् गवां जलैः ॥ ४८ ॥
विपचेत् षोड़शगुणैः पात्रे ताम्रमये शनैः।
घर्मे द्विघस्रं जम्बीर-कुमारीवज्रकन्दजैः ॥ ४९ ॥
रसैर्भङ्गस्य चाम्भोभिर्युतं वल्लद्वयं भजेत्।

माणिक्यरसे।—चपलः,—पारदः, कोलभागं—कर्षभागम् इत्यर्थः। वानरी—शूकशिम्बी, सुरा—सुरामांसी, अजाजी—जीरकम्। हयमारः,—करवीरः ॥ ३४—४६ ॥

तालेश्वररसे।—शङ्खः,—शङ्खभस्म, अग्निः,—चित्रकः, शिखी—अपामार्गः, सूर्य्यपयः,—अर्कदुग्धम्। "गोमूत्रे पचितम्" इति।—सर्वचूर्णापेक्षया अष्टगुणेन गोमूत्रेण पाचितमित्यर्थः, छान्दसत्वात् ह्रस्वः। कैटिमम्—किटिमम् एवः कैटिमम्; तल्लक्षणं यथा भावप्रकाशे,—"श्यावं किणखरस्पर्शं परुषं किटिमं स्मृतम्" इति ॥ ४७ ॥

कुष्ठे चास्थिगते चापि शाखानासाविभुग्नके ।
स्वरभङ्गे क्षतक्षीणे मण्डलेषु महत्स्वपि ॥ ५० ॥
औडुम्बरं हन्ति शिवामधुभ्यां कृच्छ्रञ्च कुष्ठं त्रिफलाजलेन ।
गुड़ार्द्रकाभ्यां गजचर्मसिध्म-विचर्चिकास्फोटविसर्पकण्डूम् ॥ ५१॥
निहन्ति पाण्डुं विविधां विपादीं सरक्तपित्तां कटुकासिताभ्याम् ।
खादेद् द्विजोरं त्वमृतायुतञ्च समुद्गयूषं सघृतञ्च दद्यात् ॥ ५२ ॥
रोहीतकजटाक्काथमनुपानं प्रयच्छति ।
चतुर्दशदिनस्यान्ते कुष्ठं शुष्यति यत्नतः ॥ ५३ ॥
क्षुद्बोधो जायतेऽत्यर्थमत्यर्थं सुभगं वपुः ।
अत्यर्थं पचते भुक्तमत्यर्थं सुखमाप्नुयात् ॥ ५४ ॥
अरुणौडुम्बरं कुष्ठमृष्यजिह्वां कपालिकाम् ।
पुण्डरीकं काकणञ्च दद्रुकुष्ठं सुदुस्तरम् ॥ ५५ ॥
स्फुटरूपं सर्वकुष्ठं महाकुष्ठं सुदारुणम् ।
तथा चर्मदलं हन्याद् विसर्पं परिसर्पकम् ॥ ५६ ॥
सिध्मं विचर्चिकां गाढ़ां किटिमञ्च विशेषतः ।
पामाञ्चालसकञ्चैव किलासञ्च विनाशयेत् ।
वर्जयेत् सततं कुष्ठी मत्स्यमांसादिभोजनम् ॥ ५७ ॥

राजतालेश्वरे ।—गवां जलै,—गोमूत्रैः । मण्डललक्षणं यथा,—-"श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् । कृच्छ्रमन्योऽन्यसंसक्तं कुष्ठं मण्डलमुच्यते ॥" इति । सिध्मलक्षणं यथा—"श्वेतं ताम्रं तनु च यत् रजोघृष्टं विमुञ्चति । प्रायेणोरसि तत्सिध्ममलाबुकुसुमोपमम् ॥" इति । विचर्चिका—"सकण्डूः पिड़का श्यावा बहुस्रावा विचर्चिका" इत्युक्तलक्षणा । विस्फोटम्—"स्फोटाः श्यावारुणाभासा विस्फोटाः

कुष्ठहरितालेश्वरः।—

हरितालं भवेद्भागं द्वादशात्र विशुद्धिमत्।
गन्धकोऽपि तथा ग्राह्यो रसः समात्र दीयते ॥ ५८ ॥
कृष्णाभ्रकमपि श्लक्ष्णं खल्ले कृत्वा विमर्दयेत्।
अङ्कोठमूलनीरेण सेहुण्डीपयसाऽथवा ॥ ५९ ॥
अर्कदुग्धेन सम्पिष्य करवीरजलेन च।
काकोडुम्बरनीरेण पेषणीयो रसो भृशम् ॥ ६० ॥
शुद्धताम्रकटोरायां क्षेपणीयो रसेश्वरः।
विधिवत् पच्यते याम-षट्कञ्चायं रसेश्वरः ॥ ६१ ॥
पञ्चगुञ्जाप्रमाणेन काकोडुम्बरवारिणा।
कुष्ठाष्टादशसंख्येषु देय एष भिषग्वरैः ॥ ६२ ॥
अचिरेणैव कालेन विनाशं यान्ति निश्चयः।
पथ्यसेवा विधातव्या प्रणतिः सूर्य्यपादयोः ॥ ६३ ॥
साधकेन तथा सेव्यो रसो रोगौघनाशनः।
पिप्पलीभिः समं दद्यात् कुष्ठरोगे रसेश्वरम् ॥ ६४ ॥

राजराजेश्वरो रसः।—

आतपे मर्दयेत् सूतं गन्धकं मृतताम्रकम्।
सुहस्तमर्दितं तालं यावत् तत्र विलीयते ॥ ६५ ॥
भृङ्गराजद्रवं दत्त्वा दिनमात्रं विमर्दयेत्।
त्रिफला खादिरं सारममृता वागुजीफलम् ॥ ६६ ॥

स्युस्तनुत्वचः” इत्युक्तलक्षणकम्। विपादीं—“वैपादिकं पाणिपाद-स्फुटनं तीव्रवेदनम्” इत्युक्तलक्षणान्विताम् ॥ ४८—५७ ॥

प्रत्येकं सूततुल्यं स्यात् चूर्णीकृत्य विमर्दयेत् ।
मध्वाज्याभ्यां लौहपात्रे कर्षाभ्यां भक्षयेत् ततः ॥ ६७ ॥
दद्रुकिटिमकुष्ठानि मण्डलानि विनाशयेत् ।
द्विगुञ्जेन निहन्त्याशु राजराजेश्वरो रसः ॥ ६८ ॥

पारिभद्ररसः ।—

मूर्च्छितं सूतकं धात्री फलं निम्बस्य चाहरेत् ।
तुल्यांशं खादिरैः क्वाथैर्दिनं मर्द्यञ्च भक्षयेत् ।
निष्कैकं दद्रुकुष्ठघ्नः पारिभद्राह्वयो रसः ॥ ६९ ॥

प्रलेपाः ।—

गन्धकं मूलकक्षारमार्द्रकस्य रसैर्दिनम् ।
मर्दितं हन्ति लेपेन सिध्मन्तु दिनमेकतः ॥ ७० ॥
कृष्णधुस्तूरजं मूलं गन्धतुल्यं विचूर्णयेत् ।
मर्द्यं जम्बीरनीरेण लेपनं सिध्मनाशनम् ॥ ७१ ॥
अपामार्गस्य पञ्चाङ्गं कदलीद्रवसंयुतम् ।
पुटदग्धञ्च गोमूत्रैर्लेपनं दद्रुनाशनम् ॥ ७२ ॥
चक्रमर्दस्य वीजञ्च दुग्धे पिष्ट्वा विमर्दयेत् ।
गन्धर्वतैलसंयुक्तं मर्दनात् सर्वकुष्ठजित् ॥ ७३ ॥

लङ्केश्वरो रसः ।—

भस्मसूताभ्रशुल्वानि गन्धं तालं शिलाजतु ।
अम्लवेतसतुल्यांशं त्र्यहं दत्त्वा विमर्दयेत् ॥ ७४ ॥

कुष्ठहरितालेश्वरे ।—सेहुण्डो—स्नुही । "विधिवत् पच्यते" इति । —ताम्रकटोरायां कृत्वा पुटपाकविधिना षड्यामं पाचनीयम् ॥५८—६८॥ पारिभद्ररसे ।—फलं निम्बस्येत्यन्वयः । प्रलेपे ।—"अपामार्गस्य

मध्वाज्याभ्यां वटीं कुर्य्यात् द्विगुञ्जां भक्षयेत् सदा ;
कुष्ठं हन्ति गजं सिंहो रसो लङ्केश्वरो महान् ॥ ७५ ॥
त्रिफलानिम्बमञ्जिष्ठा-वचापाटलमूलकम्
कटुकारजनीक्वाथं चानुपानं प्रयोजयेत् ॥ ७६ ॥

भूतभैरवो रसः ।—

शुद्धाः पञ्चदशात्र तालकमिताः शुद्धाश्च षड्गन्धकाः
सप्ताष्टौ नवतिन्तिड़ीयकफलात् काठिल्लकानां दश ।
सेहुण्डार्कपयोभिरेव सततं सञ्चूर्ण्य तद्भाव्यते
रोहीतस्य जटारसेन मृदितं श्लक्ष्णं ततः खल्लितम् ॥ ७७ ॥
एकीकृत्य समस्तमेतदपि तत् टङ्कैकमेतज्जयेत्
पश्चाद्दासविशुद्धवारिसहितं किञ्चिच्च तत् पीयते ।
ताम्बूलं शशिखण्डमण्डितवटी-मिश्रं ततः स्वापयेत्
शय्यायां मृगलोचनापरिभृतौ कर्म्माणि सम्पादयेत् ॥ ७८ ॥
देहं वीच्य सुखं मुखं न विरसं विज्ञाय सम्यक् सुधीः
छागीदुग्धमिहापि तं ननु दिनं तक्रञ्च तत् पाययेत् ।
नित्यं शान्तमिदं करोति नियतं सर्व्वौषधैर्वर्जितं
सामग्रामसमग्रमग्रिमतरं नीलञ्च पीतारुणम् ॥ ७९ ॥
श्वेतं स्फीतमनल्पकं भ्रशमति प्रायः क्रिमिव्याकुलं
गन्धालिप्रतिमं खटीकसदृशं कुष्ठञ्च चोत्सादयेत् ।

पञ्चाङ्गम्" इति—मूलपत्रपुष्पफलवल्कलरूपं पञ्चाङ्गम् । कदलीकन्दजैः रसैः मर्द्दयित्वा पुटेन दहेत्, तच्च क्षारं गोमूत्रेण दद्रुस्थाने लेपयेत् । गन्धर्व्वतैलम्—एरण्डतैलम् ॥ ६९—७६ ॥

भूतभैरवरसे ।—काठिल्लकं "करेला" इति वङ्गभाषा, सेहुण्डी—

कुष्ठाष्टादश भूतभैरव इति ख्यातः क्षितौ हन्ति च
वातव्याधिनिकृन्तनः कफकृतान् कुष्ठान् विशेषानयम् ॥ ८० ॥
हन्तीति ज्वरमुग्ररूपमधिकं दाहादिकञ्चामयम् ।
कुर्य्याद् रूपमनङ्गरङ्गगुणभृद्भृङ्गास्पदं विग्रहम् ॥ ८१ ॥
एवं स मासात् कुरुते समासात् पथ्यञ्च तथ्यं सकलं करोति ।
भुञ्जीत भक्तं सततं प्रयुक्तं घृतं शृतं वा विकृतं तदेव ॥ ८२ ॥
स्वच्छन्ददुग्धेन सुखेन जग्धं पथ्यान्नमेतत् प्रवदन्ति सन्तः ।
कुष्ठस्य दुष्टस्य निराकरोति गात्रञ्च कुर्य्यात् शुभगन्धयुक्तम् ॥८३॥

अर्केश्वरो रसः ।—

पलानीशस्य चत्वारि बलेर्द्वादश तावती ।
ताम्रस्य चक्रिका देया रसस्योर्द्ध्वं शरावकम् ॥ ८४ ॥
दत्त्वा विवद्धभाण्डस्थं पूरयेद् भस्मना दृढम् ।
अग्निं प्रज्वालयेद् याम-द्वयं शीतं विचूर्णयेत् ॥ ८५ ॥
पुटेद् द्वादशधा सूर्य्य-दुग्धेनालोड़ितं पुनः ।
वरापावकभृङ्गाणां त्रिभिर्द्रावैर्विभावयेत् ।
अयमर्केश्वरो नाम्ना रक्तमण्डलकुष्ठजित् ॥ ८६ ॥

महातालेश्वरो रसः ।—

तालताप्यशिलासूतं शुद्धं टङ्गणसैन्धवम् ।

स्नुही । रोहीतस्य जटारसेन—रोहीतकमूलरसेन, शशिखण्डमण्डिता—कर्पूरसहिता ॥ ७७—८३ ॥

अर्केश्वरे ।—ईशस्य—पारदस्य चत्वारि पलानि, बलेः,—गन्धकस्य द्वादशपलानि । वरा- त्रिफला, पावकः,- चित्रकः, भृङ्गः,- भृङ्गराजः ॥ ८४—८६ ॥

समं सञ्चूर्णयेत् खल्ले सूताद्‌ द्विगुणगन्धकम् ॥ ८७ ॥
गन्धाद्विगुणलौहञ्च जम्बीराम्लेन मर्दयेत्।
ततो लघुपुटे पाच्यं स्वाङ्गशीतं समुद्धरेत् ॥ ८८ ॥
त्रिंशदंशं विषञ्चात्र च्चिप्ता सर्वं विचूर्णयेत्।
माहिषाज्येन संमिश्रं निष्कार्द्धं भच्चयेत् सदा ॥ ८९ ॥
मध्वाज्यैर्वागुजीचूर्ण-कर्षं लिह्यात् ततः परम्।
सर्वान् कुष्ठान् निहन्त्याशु महातालेश्वरो रसः ॥ ९० ॥

विजयभैरवो रसः।—

सप्तकञ्चुकनिर्मुक्तमूर्च्छिशुद्धरसेन्द्रकम्।
मृत्कटाहान्तरे तत्तु स्थापयेच्च समन्त्रकम् ॥ ९१ ॥
सूताद्विगुणितं तालं कुष्माण्डद्रवशोधितम्।
दोलायन्त्रेण तैलादौ सप्तधा परिशोधितम् ॥ ९२ ॥
दत्त्वाऽऽप्लाव्य द्रवैर्भिण्ट्याः किञ्चिदाप्लाव्य युक्तितः।
तयोर्द्विगुणितं भस्म पलाशस्य परिच्चिपेत् ॥ ९३ ॥
पुनर्भिण्टोद्रवेणैव सर्वमाप्लाव्य यत्नतः।
खाखसार्करसैर्भूयः परिप्लाव्य च पाकवित् ॥ ९४॥
पचेदवहितो वैद्यः शालाङ्गारेण यत्नतः।
चतुर्विंशतियामन्तु पक्त्वा शीतलतां नयेत् ॥ ९५ ॥
अवतार्य्य काचपात्रे विधाय तदनन्तरम्।
प्रयत्नेन कृतप्राय-श्चित्तः शोधितदेहकः ॥ ९६ ॥
सिताहरीतकीयुक्तं खादेद्‌ रक्तिचतुष्टयम्।
रक्तिकैकक्रमेणैव वर्द्धयेद्‌ दिनसप्तकम् ॥ ९७ ॥

मधूदकं पिबेच्चानु नारिकेलजलञ्च वा ।
जिङ्गिनीसम्भवं क्वाथमथवा क्षौद्रनागरम् ॥ ९८ ॥
अभ्यङ्गं सुरभितैलैः कुर्य्यात् ताम्बूलचर्वणम् ।
पवनानलसूर्य्यांशु-मत्स्यमांसदधीनि च ॥ ९९ ॥
शाकं ककारपूर्वञ्च वर्जयेत् मतिमान् नरः ।
वातरक्तमाममिश्रमामञ्चापि सुदारुणम् ॥ १०० ॥
सर्वकुष्ठञ्चाम्लपित्तं विस्फोटञ्च मसूरिकाम् ।
विजयाख्यो रसो नाम्ना हन्ति दोषानसृग्दरान् ॥ १०१ ॥

कुष्ठारिरसः ।—

काकोडुम्बरिकाचूर्णं ब्रह्मदण्डी बलात्रयम् ।
प्रत्यहं मधुना लीढ़ं वातरक्तापहं नृणाम् ॥ १०२ ॥
क्षरद्रक्तं चलन्मांसं मासमात्रेण सर्वथा ।
गलत्पूयं पतत्कीटं त्रिटङ्कं सेव्यमीरितम् ॥ १०३ ॥

षड़ाननगुड़िका ।—

विषोषणं टङ्कणपारदञ्च सुगन्धचूर्णञ्च समांशयुक्तम् ।
जैपालचूर्णं द्विगुणं गुड़ाक्तं सम्मर्द्य सर्वं गुड़िका विधेया ॥१०४॥
विरेचनो सर्वविकारहन्त्री लघ्वी हिता दीपनपाचनीयम् ।

महातालेश्वरे ।—"त्रिंशदंशं विषम्" इति—सर्वचूर्णापेक्षया त्रिंशदंशं विषम् ॥ ८७—१०१ ॥

कुष्ठारिरसे ।—बलात्रयमिति—पीतपुष्पबला-श्वेतबला-नागबला-भेदात् ॥ १०२।१०३ ॥

कुष्ठे हिता तीव्रतरे हि शूले चामाशये चाश्मगते विकारे।
संशोधनी शीतजलेन सम्यक् संग्राहिणी चोष्णजलेन युक्ता ॥१०५॥

कुष्ठनाशनः।—

चिरविल्वपत्रं पथ्या शिरीषञ्च विभीतकम्।
काकोडुम्बरिकामूलं मूत्रैरालोड्य फेनितम् ॥ १०६ ॥
कर्षमात्रं पिबेद्रोगी गोस्तन्या सह टङ्कणम्।
सप्तसप्तकपर्य्यन्तं सर्वकुष्ठविनाशनम् ॥ १०७ ॥

अथ श्वित्रचिकित्सा।—

अथ श्वित्रस्य वक्ष्यामि नाशनोपायमुत्तमम् ॥ १०८ ॥

विजयानन्दो रसः।—

शुद्धसूतस्य भागैकं द्विभागं शुद्धतालकम्।
मृत्कटाहान्तरे पूर्वं स्थापयेच्च समन्वकम् ॥ १०९ ॥
द्वयोः समं पलाशस्य भस्म तस्योपरि क्षिपेत्।
वक्त्रं मृत्कर्पटैर्लिप्त्वा शोषयेच्च खरातपे ॥ ११० ॥
चतुर्विंशतियामन्तु पक्त्वा शीतलतां नयेत्।
अवतार्य्य काचपात्रे स्थापयेदतियत्नतः ॥ १११ ॥

षडाननगुड़िकायाम्।—ऊषणं—मरिचम्। "द्विगुणं गुड़ात्कम्" इति—सर्वचूर्णापेक्षया गुड़स्य द्वैगुण्यम् ॥ १०४।१०५ ॥

कुष्ठनाशने।—चिरविल्वः,—करञ्जः, तस्य पत्रम्। पथ्या—हरीतकी, गोस्तनी—द्राक्षा ॥ १०६।१०७ ॥

विधिवत् सेवितश्चासौ हन्ति श्वित्रं चिरन्तनम् ।
सर्वकुष्ठं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ११२ ॥
रसोऽयं श्वित्रनाशाय ब्रह्मणा निर्मितः पुरा ।
विजयानन्दनामाऽयं प्रसिद्धः क्षितिमण्डले ॥ ११३ ॥

श्वित्रदद्रुपाटलालेपः ।—

अश्वहा रजनी हेम प्रत्यक्पुष्पी प्रदाह्य च ।
चूर्णञ्च स्वर्जिकाक्षारं नीरं दत्त्वा प्रपेषयेत् ॥ ११४ ॥
प्रच्छयित्वा ततः स्थानं मण्डलाग्रेण लिम्पति ।
पाटलानि पतन्त्यङ्गे विस्फोटाश्चातिदारुणाः ॥ ११५ ॥
सम्भवन्ति तिला रक्ताः कृष्णवर्णा भवन्ति ते ।
मीलन्ति स्वशरीरे च दिव्यरूपो भवेन्नरः ॥ ११६ ॥

श्वित्रहरो लेपः ।—

सैन्धवं रविदुग्धेन पेषयित्वाऽथ मण्डलम् ।
प्रच्छयित्वा प्रलेपोऽयं श्वित्रकुष्ठविनाशनः ॥ ११७ ॥

मुखश्वित्रहरो लेपः ।—

मुखे श्वेते च सञ्जाते कुर्य्याच्चेमां प्रतिक्रियाम् ।
गन्धकं चित्रकाशीशं हरितालं फलत्रयम् ।
मुखे लिम्पेद्दिनैकेन वर्णनाशो भविष्यति ॥ ११८ ॥

कुष्ठविशेषत्वात् कुष्ठाधिकारे एव श्वित्रचिकित्सामाह,—अथेत्यादि ॥ १०८—११३ ॥

श्वित्रदद्रुपाटलालेपे ।—अश्वहा—करवीरः, रजनी—हरिद्रा, हेम—धुस्तूरः, प्रत्यक्पुष्पी—अपामार्गः ; एषां करवीरादीनां क्षारं ग्राह्यम् ॥ ११४—११८ ॥

श्वित्रनाशनलेपद्वयम्।—

गुञ्जाफलाग्निचूर्णस्य लेपनं श्वेतकुष्ठजित्।
शिलाऽपामार्गभस्मापि लिप्ता श्वित्रं विनाशयेत्॥ ११९ ॥

रसमाणिक्यम्।—

तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत्।
सप्तधा वा त्रिधा वाऽपि दध्नाऽम्लेन तथैव च॥ १२० ॥
शोधयित्वा पुनः शुष्कं चूर्णयेत् तण्डुलाकृति।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक्॥ १२१ ॥
बदरीपत्रकल्केन सन्धिलेपञ्च कारयेत्।
अरुणाभं ह्यधः पात्रं तावज्ज्वाला प्रदीयते॥ १२२ ॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभं हरेद्रसम्।
तद्रक्तिद्वितयं खादेत् घृतभ्रामरमर्दितम्॥ १२३ ॥
संपूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम्॥ १२४ ॥
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विचर्चिकाम्।
नासाऽऽस्यसम्भवान् रोगान् क्षतान् हन्ति सुदारुणान्।
पुण्डरीकं चर्मदलं विस्फोटं मण्डलं तथा॥ १२५ ॥

[इति कुष्ठरोग-चिकित्सा]।

गुञ्जेति।—अग्निः,—चित्रकः। शिला—मनःशिला॥११९—१२५॥

इति कुष्ठरोगाधिकारः।

अथ शीतपित्तोदर्द-कोठरोग-चिकित्सा ।—

क्षुद्रयोगाः ।—

यमानीगुड़संमिश्रः सूतभस्मद्विवल्लकः ।
शीतपित्तं निहन्त्याशु कटुतैलविलेपनम् ॥ १ ॥
सिद्धार्थरजनीकल्कं प्रपुन्नाड़तिलैः सह ।
कटुतैलेन संमिश्रमेतदुद्वर्त्तनं हितम् ॥ २ ॥
दूर्वानिशायुतो लेपः कण्डूपामाविनाशनः ।
क्रिमिदद्रुहरश्चैव शीतपित्तहरः परः ॥ ३ ॥
कुष्ठोक्ताञ्च क्रियां कुर्य्यात् सर्वां युक्त्या चिकित्सकः ।
शीतपित्ते तथोदर्द्दे कोठे चैव समासतः ॥ ४ ॥

[इति शीतपित्तोदर्द-कोठरोग-चिकित्सा]।

अथाम्लपित्तरोग-चिकित्सा ।—

अम्लपित्तान्तको रसः ।—

मृतसूताभ्रलौहानां तुल्यां पथ्यां विमर्दयेत् ।
माषमात्रं लिहेत् क्षौद्रैरम्लपित्तप्रशान्तये ॥ १ ॥

कुष्ठसाधर्म्यात् सादृश्याच्च तदनन्तरं शीतपित्तादिकमुच्यते । यमानी-गुड़संमिश्रं चतुर्गुञ्जामितं रससिन्दूरं भक्षणार्थं दद्यात्, अभ्यङ्गार्थं कटु-तैलम् ॥ १—४ ॥

इति शीतपित्तोदर्द-कोठरोगाधिकारः ।

लीलाविलासो रसः ।—

रसो बलिर्व्योम रविश्च लौहं धात्र्यक्षनीरैस्त्रिदिनं विमर्द्य ।
तदल्पघृष्टं मृदुमार्कवेण संमर्दयेदस्य च वल्लयुग्मम् ॥ २ ॥
हन्त्यम्लपित्तं मधुनाऽवलीढ़ं लीलाविलासो रसराज एषः ।
छर्दिं सशूलं हृदयस्य दाहं निवारयेदेष न संशयोऽस्ति ॥ ३ ॥

पानीयभक्तवटिका ।—

त्रिवृता मुस्तकञ्चैव त्रिफला त्र्यूषणं तथा ।
प्रत्येकन्तु पलं भागं तदर्द्धौ रसगन्धकौ ॥ ४ ॥
लौहाभ्रकविड़ङ्गानां प्रत्येकञ्च पलद्वयम् ।
एतत् सकलमादाय चूर्णयित्वा विचक्षणः ॥ ५ ॥
त्रिफलायाः कषायेण वटिकां कारयेत् भिषक् ।
एकैकां भक्षयेत् प्रातस्तक्रञ्चापि पिबेदनु ॥ ६ ॥
हन्ति शूलं पार्श्वशूलं कुक्षिवस्तिगुदे रुजम् ।
श्वासं कासं तथा कुष्ठं ग्रहणीदोषनाशिनी ॥ ७ ॥

अथ क्षुधावती गुड़िका ।—

तत्र अभ्रशुद्धिः ।—

आशुभक्तोदकैः पिष्टमभ्रकं तत्र संस्थितम् ।
कन्दमाणास्थिसंहार-खण्डकर्णरसैरथ ॥ ८ ॥

प्रागुक्तसङ्गत्यैव अम्लपित्तमुच्यते ।—अम्लपित्तान्तकरसे ।—"तुल्यां पथ्याम्" इति सर्वचूर्णतुल्यां हरीतकीम् ॥ १ ॥

लीलाविलासरसे ।—बलिः,—गन्धकः, व्योम—अभ्रभस्म, रविः,—ताम्रभस्म । धात्र्यक्षनीरैरिति—आमलकीविभीतकयोः क्वाथैः, मृदुमार्कवेण—कोमलभृङ्गराजदलरसेन ॥ २—७ ॥

तण्डुलीयक-शालिञ्च-कालमारिषजेन च ।
वृश्चीरवृहतीभृङ्ग-लक्ष्मणाकेशराजकैः ॥ ९ ॥
पेषणं भावनं कुर्य्यात् पुटञ्चानेकशो भिषक् ।
यावन्निश्चन्द्रकं तत् स्याच्छुद्धिरेवं विहायसः ॥ १० ॥

तत्र लौहशुद्धिः ।—

स्वर्णमाक्षिकशालिञ्च-ध्मातं निर्वापितं जले ।
त्रैफलेऽथ विचूर्ण्यैवं लौहं कान्तादिकं पुनः ॥ ११ ॥
वृहत्पत्र-करीकर्ण-त्रिफलावृद्धदारजैः ।
माणकन्दास्थिसंहार-शृङ्गबेरभवै रसैः ॥ १२ ॥

क्षुधावतीगुड़िकायाम् ।—अभ्रकं—कृष्णाभ्रकं ग्राह्यं, श्रेष्ठत्वात् ; तच्च सञ्चूर्ण्य आशुधान्यजातान्नोत्थे काञ्जिके अहोरात्रं स्थापयित्वा तेनैव पेषणीयम् ; ततः कन्दादिव्यस्तसमस्तानां स्वरसेन पुनः पेषणं भावनं पुटनञ्च बहुधा कुर्वीत यावन्निश्चन्द्रकत्वमभ्रस्य। खण्डकर्णः,—"खार-कोन" इति ख्यातः। [भैषज्यरत्नावल्यां तु—"घण्टाकर्णकः" इति पाठान्तरम्] तण्डुलीयक-कालमारिषयोरिति—स्वल्पपत्रवृहत्पत्रभेदेन द्विविधमारिषयोः ; मारिषस्तु—"नटेशाक" इति भाषया ख्यातः वङ्गेषु। वृश्चीरः,—श्वेतपुनर्नवा। भृङ्गः,—भृङ्गराजः, लक्ष्मणा—स्वनामख्याता। विहायस इति—अभ्रस्य। लौहशुद्धिमाह।—स्वर्णमाक्षिकशालिञ्चाभ्यां पिष्टाभ्यां कान्तलौहं लिप्त्वा भस्त्राग्नौ ध्मातं, ततः वक्ष्यमाणामृतसार-विधिना क्वथितत्रिफलाक्वाथे निर्वापितमित्यर्थः। तदेव निरुत्थमारितं लौहचूर्णं प्रक्षाल्य भानुपाकादिना शोधितं वृहत्पत्रकरिकर्णपलाशादि-स्वरसैः पुटितं कुर्य्यादित्यर्थः। अत्र पुटनद्रव्येषु मध्ये येषां स्वरसप्राप्ति-स्तेषां स्वरसो ग्राह्यः, येषां तु स्वरसो न लभ्यते तेषां क्वाथो ग्राह्यः। वृहत्पत्रं—लोध्रविशेषः, करिकर्णः,—पलाशविशेषः, शृङ्गबेरः,—आर्द्र-

दशमूलीमुण्डितिका-तालमूलीसमुद्भवैः ।
पुटितं साधु यत्नेन शुद्धिमेवमयो व्रजेत् ॥ १३ ॥

तत्र मण्डूरशुद्धिः ।—

वशिरं श्वेतवाट्यालं मधुपर्णी मयूरकम् ।
तण्डुलीयञ्च वर्षाभ्वं दत्त्वाऽधश्चोर्द्ध्वमेव च ॥ १४ ॥
पाक्यं सुजीर्णमण्डूरं गोमूत्रेण दिनत्रयम् ।
यथाऽन्तर्बाष्पदग्धं स्यात् तथा स्थाप्यं दिनत्रयम् ।
एवं विशोधितं लौह-किट्टं ग्राह्यं विचूर्णितम् ॥ १५ ॥

तत्र रसशुद्धिः ।—

जयन्त्या वर्द्धमानस्य आर्द्रकस्य रसेन तु ।
वायस्याश्चानुपूर्व्व्यैवं मर्दनं रसशोधनम् ॥ १६ ॥

तत्र गन्धकशुद्धिः ।—

गन्धकं नवनीताख्यं क्षुद्रितं लौहभाजने ।
त्रिधा चण्डातपे शुष्कं भृङ्गराजरसाप्लुतम् ॥ १७ ॥
ततो वह्नौ द्रवीभूतं त्वरितं वस्त्रगालितम् ।
यत्नाद् भृङ्गरसे क्षिप्तं पुनः शुष्कं विशुध्यति ॥ १८ ॥

कम् । मण्डूरशुद्धिमाह, वशिरमित्यादि ।—वशिरं—सूर्य्यावर्त्तः, "हुड़-हुड़े" इति वङ्गभाषा । श्वेतवाट्यालं—श्वेतबला, मधुपर्णी—गुडूची, मयूरकम्—अपामार्गः, तण्डुलीयम्—पत्रशाकविशेषः, "नटेशाक" इति वङ्गभाषा । वर्षाभ्वं—पुनर्नवा । वशिरादीनां मूलत्वक्पल्लवान् स्थालीमध्ये पातयित्वा तदुपरि पुराणमण्डूरं दत्त्वा तैरेव पल्लवादिभिराच्छाद्य गोमूत्रं दत्त्वा दिवसत्रयं व्याप्य दग्धं यथा स्यात् तथा पाको विधेयः । रस-शुद्धिमाह, जयन्त्या इत्यादि ।—वर्द्धमानः,—एरण्डः । गन्धकशुद्धिमाह,

अथ क्षुधावतीप्रस्तुतीकरणम्।—

गगनाद् द्विपलं चूर्णं लौहस्य पलमात्रकम्।
लौहकिट्टपलार्द्धञ्च सर्वमेकत्र संस्थितम्॥ १९॥
मण्डूकपर्णीवशिर-तालमूलीरसैः पुनः।
वरीभृङ्गकेशराज-कालमारिषजैरथ॥ २०॥
त्रिफलाभद्रमुस्ताभिः स्थालीपाकाद्विचूर्णितम्।
रसगन्धकयोः कर्षं प्रत्येकं ग्राह्यमेकतः।
तन्मर्द्दने शिलाखल्ले यत्नतः कज्जलीकृतम्॥ २१॥
वचा चव्यं यमानी च जीरके शतपुष्पिका।
व्योषं मुस्तं विड़ङ्गञ्च ग्रन्थिकं खरमञ्जरी॥ २२॥
त्रिवृता चित्रको दन्ती सूर्य्यावर्त्तः सितस्तथा।
भृङ्गमाणककन्दाश्च खण्डकर्णक एव च॥ २३॥
दण्डोत्पला केशराज-काला कर्कटकोऽपि च।
एषामर्द्धपलं ग्राह्यं पटघृष्टं सुचूर्णितम्॥ २४॥

गन्धकमित्यादि।—क्षुद्रितमिति—कुट्टितम्। गगनादित्यादौ।—वशिरं—श्वेतसूर्य्यावर्त्तः, वरी—शतमूली, भृङ्गः,—भृङ्गराजः। कालमारिषः,—"काँटानटे" इति वङ्गभाषा। अत्र गगनादिसर्वमेकीकृत्य मण्डूकपर्ण्यादिस्वरसेन एकस्थालीपाकः, ततः शतावर्य्या रसेन द्वितीयः स्थालीपाकः; ततस्त्रिफलादिक्वाथेन तृतीयः स्थालीपाकः। निश्चलस्तु—मण्डूकपर्ण्यादितालमूल्यन्तरसेन पुटनमाह; तत्तु न सम्यक् व्यवहारसिद्धम्। एतदनन्तरं यद्विधेयं तदाह—"रसगन्धकयोः कर्षम्" इत्यादि।—रसगन्धकयोः कर्षमिति च्छेदः; तस्मात् मिलितरसगन्धकयोः कर्षं इत्यर्थः। वचाचव्यादीनि प्रक्षेपद्रव्याणि। खरमञ्जरी—अपामार्गः।

प्रत्येकं त्रिफलायाश्च पलार्द्धं पलमेव च।
एतत्सर्वं समालोड्य लौहपात्रे तु भावयेत्॥ २५॥
आतपे दण्डसङ्घृष्टमार्द्रकस्य रसैस्त्रिधा।
तद्रसेन शिलापिष्टं गुड़िकां कारयेद्भिषक्॥ २६॥
बदरास्थिनिभां शुष्कां सुगुप्ताञ्च निधापयेत्।
तत् प्रातर्भोजनादौ तु सेवितं गुड़िकात्रयम्॥ २७॥
अम्लोदकानुपानञ्च हितं मधुरवर्जितम्।
दुग्धञ्च नारिकेलञ्च वर्जनीयं विशेषतः॥ २८॥
भोज्यं यथेष्टमिष्टञ्च वारिभक्ताम्लकाञ्जिकम्।
हन्त्यम्लपित्तं विविधं शूलञ्च परिणामजम्॥ २९॥
पाण्डुरोगञ्च गुल्मञ्च शोथोदरगुदामयान्।
यक्ष्माणं पञ्च कासांश्च मन्दाग्नित्वमरोचकम्॥ ३०॥
प्लीहानं श्वासमानाहमामवातं सुदारुणम्।
गुड़ी क्षुधावती सेयं विख्याता रोगनाशिनी॥ ३१॥

अविपत्तिकरं चूर्णम्।—

त्रिकटु त्रिफला मुस्तं विड़ञ्चैव विड़ङ्गकम्।
एला पत्रञ्च सर्वञ्च समभागं विचूर्णयेत्॥ ३२॥
यावन्त्येतानि चूर्णानि लवङ्गं तत्समं भवेत्।
सर्वचूर्णद्विगुणितं त्रिवृच्चूर्णं प्रदापयेत्॥ ३३॥
सर्वमेकीकृतं यावत् तावच्छर्करयाऽन्वितम्।
सर्वमेकीकृतं तत्तु स्निग्धभाण्डे निधापयेत्॥ ३४॥

काला—"कालियाकड़ा" इति वङ्गभाषा। कर्कटकः,—कर्कटशृङ्गी;

भोजनादौ ततोऽन्ते च मध्वाज्याभ्यामिदं शुभम् ।
शीततोयानुपानञ्च नारिकेलोदकं तथा ॥ ३५ ॥
ततो यथेष्टमाहारं कुर्य्यात् क्षीररसाशनः ।
अम्लपित्तं निहन्त्याशु विबद्धमलमूत्रकम् ॥ ३६ ॥
अग्निमान्द्यभवान् रोगान्नाशयेच्चाविकल्पतः ।
बलपुष्टिकरञ्चैव शूलदुर्नामनाशनम् ॥ ३७ ॥
प्रमेहान् विंशतिञ्चैव मूत्राघातान् तथाऽश्मरीम् ।
अविपत्तिकरं चूर्णमगस्त्यमुनिभाषितम् ॥ ३८ ॥

[इति अम्लपित्तरोग-चिकित्सा] ।

अथ विसर्प-विस्फोट-तन्तुकरोग-चिकित्सा ।—

कालाग्निरुद्रो रसः ।—

सूताभ्रकान्तलौहानां भस्म गन्धकमाक्षिकम् ।
वन्यकर्कोटकद्रावैस्तुल्यं मर्द्यं दिनावधि ॥ १ ॥
वन्यकर्कोटिकाकन्दे क्षिप्त्वा लिप्त्वा मृदा बहिः ।
भूधराख्ये पुटे पश्चाद्दिनैकं तद्विपाचयेत् ॥ २ ॥
दशमांशं विषं योज्यं माषमात्रन्तु भक्षयेत् ।
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत् ।

"प्रत्येकं त्रिफलायाश्च" इति—प्रत्येकमर्द्धपलं, तेन मिलितत्रिफलायाः सार्द्धं पलं भवतीत्यर्थः ॥ ८—३८ ॥

इत्यम्लपित्तरोगाधिकारः ।

पिप्पलीमधुसंयुक्तमनुपानं प्रकल्पयेत् ॥ ३ ॥

प्रक्रियान्तरम् ।—

पित्तनाशकभैषज्यं योगवाहिरसं सुधीः ।

कुष्ठोद्दिष्टक्रियां सर्वामपि कुर्य्याद्भिषग्वरः ॥ ४ ॥

विस्फोटकारिरसः ।—

गुडूचीनिम्बजैः क्वाथैः खदिरेन्द्रयवाम्बुना ।

कर्पूरत्रिसुगन्धिभ्यां युक्तं सूतं द्विवल्लकम् ।

विस्फोटं त्वरितं हन्याद्वायुर्जलधरानिव ॥ ५ ॥

स्नायुकारियोगः ।—

गव्यं सर्पिस्त्र्यहं पीत्वा निर्गुण्डीस्वरसं त्र्यहम् ।

विविधं स्नायुकन्वोग्रं हन्त्यवश्यं न संशयः ॥ ६ ॥

तन्तुकारियोगः ।—

सप्तपर्णशिफाकल्क-पानाद्वा लेपनात् तथा ।

मुषलीमूलपानात्तु तन्तुकाख्यो विनश्यति ॥ ७ ॥

[इति विसर्प-विस्फोट-तन्तुकरोगचिकित्सा] ।

अस्रपित्तवत् विसर्पस्यापि पित्तसम्भवस्यावश्यम्भावात्, तथा प्रायस्तुल्यचिकित्सितत्वाच्च तदनन्तरं विसर्पादिचिकित्सामाह, सूताभ्रेत्यादि ॥ १—३ ॥

विस्फोटकारिरसे ।— गुडूचीत्यादौ ।—त्रिसुगन्धि—एलागुडत्वक्-तेजपत्रञ्च । सूतं—भस्मसूतं, रससिन्दूरमित्यर्थः ॥ ५।६ ॥

तन्तुकारियोगे सप्तपर्णेत्यादौ ।—सप्तपर्णशिफा—सप्तपर्णमूलम् ॥७॥

इति विसर्प-विस्फोट-तन्तुकरोगाधिकारः ।

अथ मसूरिकारोग-चिकित्सा ।—

दुर्लभो रसः ।—

अथ शुद्धस्य सूतस्य मूर्च्छितस्य मृतस्य च ।
द्विबला पिप्पली धात्री रुद्राक्षघृतमाक्षिकैः ।
पापरोगान्तको योगः पृथिव्यामिव दुर्लभः ॥ १ ॥

[इति मसूरिकारोग-चिकित्सा] ।

अथ क्षुद्ररोग-चिकित्सा । —

क्षुद्ररोगेषु मतिमांस्तत्तदौषधयोगतः ।
भस्मसूतं प्रयुञ्जीत तथाऽत्र योगवाहिकम् ॥ १ ॥

[इति क्षुद्ररोग चिकित्सा] ।

विस्फोटप्रभेदत्वात् तथा प्रायस्तुल्यचिकित्सितत्वात् तदनन्तरं मसूरिकाचिकित्सामाह। दुर्लभरसे ।— द्विबलेति— श्वेतपीतपुष्पभेदात् बलाद्वयं ग्राह्यम् । "द्विबला" इत्यत्र "धवला" इति पाठान्तरम् ॥ १ ॥

इति मसूरिकारोगाधिकारः ।

मसूरिकाया अपि क्षुद्ररोगविशेषत्वात् मसूरिकाऽनन्तरं क्षुद्ररोगचिकित्सामाह । क्षुद्ररोगेत्यादौ ।—तत्तदौषधयोगत इति—तत्तद्रोगनाशकौषधयोगत इत्यर्थः । भस्मसूतं—रससिन्दूरम् ॥ १ ॥

इति क्षुद्ररोगाधिकारः ।

अथ मुखरोग चिकित्सा ।—

—०*०—

चतुर्मुखो रसः ।—

मृतं सूतं मृतं स्वर्णं द्वाभ्यान्तुल्यां मनःशिलाम् ।
विमर्दयेच्च तैलेन चातसीसम्भवेन च ॥ १ ॥
तद्गोलं वस्त्रतो बद्ध्वा लेपयेच्च समन्ततः ।
अतसीफलकल्केन दोलायन्त्रे त्र्यहं पचेत् ।
उद्धृत्य धारयेद्वक्त्रे जिह्वादन्तास्यरोगनुत् ॥ २ ॥

पार्वतीरसः ।—

पार्वतीकाश्मिसम्भूतौ दरदो मधुपुष्पकम् ।
गुडूची शाल्मली द्राक्षा धान्यभूनिम्बमार्कवम् ॥ ३ ॥
तिलमुद्गपटोलञ्च कुष्माण्डं लवणद्वयम् ।
यष्टिका धान्यकं भस्म चान्तर्दग्धं समं समम् ॥ ४ ॥
मुखरोगं निहन्त्याशु पार्वतीरस उत्तमः ।
पित्तज्वरं चिरं हन्ति तिमिरञ्च तृषामपि ॥ ५ ॥

मुखरोगहरी ।—

रसगन्धौ समौ ताभ्यां द्विगुणञ्च शिलाजतु ।
गोमूत्रेण विमर्द्याथ सप्तधाऽऽर्द्रद्रवेण च ॥ ६ ॥
•जातीनिम्बमहाराष्ट्री-रसैः सिध्यति पाकहा ।

क्षुद्ररोगाश्चतुश्चत्वारिंशत् मुखरोगास्तु पञ्चषष्टिः, अतो रोगगणत्व-सामान्यात् क्षुद्ररोगानन्तरं मुखरोगचिकित्सितमुच्यते ।—पार्वतीरसे ।—

कणामधुयुता हन्ति मुखरोगं सुदारुणम् ।
गुञ्जाष्टकमिता तालु-गलौष्ठदन्तरोगनुत् ॥ ७ ॥

महाराष्ट्र्यादि प्रतिसारणम् ।—

महाराष्ट्र्यखगन्धाभ्यां मुखञ्च प्रतिसारयेत् ।
धारणात् सेवनाच्चैव हन्ति सर्वान् मुखामयान् ॥ ८ ॥

पर्पटीरसप्रयोगोपदेशः ।—

सर्वास्यामयजित् सेव्यो मधुना पर्पटीरसः ॥ ९ ॥

पथ्यावटी ।—

पथ्याबालककुष्ठञ्च गोमूत्रेण प्रसाधयेत् ।
एषा च वटिका हन्ति मुखदौर्गन्ध्यसन्ततिम् ॥ १० ॥

[इति मुखरोग-चिकित्सा] ।

अथ कर्णरोग-चिकित्सा ।—

—०*०—

कफकेतुरसः ।—

व्योषमिज्जलवीजञ्च शङ्खभस्म विषान्वितम् ।
मरीचसदृशं खादेत् कफकेतुं महारसम् ॥ १ ॥

पार्वतीसम्भूतः,—गन्धकः । काशीसम्भूतः,—पारदः, (छान्दसत्वात् ह्रस्वः) । दरदः,—हिङ्गुलः । मार्कव—भृङ्गराजः ॥ १—९ ॥

पथ्यावटिकायाम् ।—सर्वचूर्णापेक्षया अष्टगुणेन गोमूत्रेण पाचितम् ॥ १० ॥

इति मुखरोगाधिकारः ।

भैरवो रसः ।—

सूतं गन्धो विषञ्चैव टङ्कणं सकपर्दकम् ।
मरिचेन समायुक्तञ्चार्द्रतोयेन भावितम् ॥ २ ॥
वह्निमान्द्यञ्चामरोगं श्लेष्माणं ग्रहणीगदम् ।
सन्निपातं तथा शोथं हन्ति श्रोत्रोद्भवं गदम् ॥ ३ ॥

विधानान्तरम् ।—

योगवाहिरसाः सर्वे प्रयोक्तव्या भिषग्वरैः ।
कर्णरोगेषु सर्वेषु पीनसादिषु नित्यशः ॥ ४ ॥

[इति कर्णरोग-चिकित्सा] ।

अथ नासारोग-चिकित्सा ।—

— -०*०——

पञ्चामृतो रसः ।—

शुद्धसूतं समादाय गन्धभागद्वयं ततः ।
त्रिभागं टङ्कणञ्चापि विषं भागचतुष्टयम् ॥ १ ॥
पञ्चभागं तथा देयं मरिचस्य प्रयत्नतः ।
शृङ्गवेररसैः पिष्ट्वा गुड़िका पञ्चरक्तिका ॥ २ ॥

मुखरोगेषु जिह्वाश्रयरोगोऽभिहितः, जिह्वा चेन्द्रियाधिष्ठानम् ; अत इन्द्रियाधिष्ठानदृष्टिसाम्यात् तदनन्तरं कर्णरोगचिकित्सितमुच्यते । भैरवरसे ।—कपर्दकं—वराटकम् । आर्द्रतोयेनेति—आर्द्रकरसेन ॥ १—४ ॥

इति कर्णरोगाधिकारः ।

अनुपानं हितं योज्यं सर्व्वरोगप्रशान्तये ।
जलदोषोद्भवे रोगे महत्युग्रे जलोदरे ॥ ३ ॥
सन्निपातेषु रोगेषु नासाव्याधौ सपीनसे ।
व्रणशोथे व्रणे चैव उपदंशे भगन्दरे ॥ ४ ॥
नाड़ीव्रणे ज्वरे चैव नखदन्तविषातुरे ।
पञ्चामृतरसो योज्यः सर्व्वरोगप्रशान्तये । ५ ॥

[इति नासारोग-चिकित्सा]।

अथ नेत्ररोग-चिकित्सा ।—

——०*०——

नेत्राशनिरसः ।—

अभ्रं ताम्रं तथा लौहं माक्षिकञ्च रसाञ्जनम् ।
पातनायन्त्रसंशुद्धं गन्धकं नवनीतकम् ॥ १ ॥
पलप्रमाणं प्रत्येकं गृह्णीयाच्च विधानवित् ।
सर्व्वमेकीकृतं चूर्णं वैद्यैः कुशलकर्म्मभिः ॥ २ ॥

उक्तसङ्गत्यैव कर्णरोगचिकित्साऽनन्तरं नासारोगचिकित्सितमुच्यते। पञ्चामृतरसे ।—गन्धभागद्वयमिति—एकभागापेक्षया गन्धकस्य द्वैगुण्यम्, एवं त्रिभागमित्यादि ॥ १—५ ॥

इति नासारोगाधिकारः ।

उक्तसम्बन्धादेव नेत्ररोगचिकित्सामाह । नेत्राशनिरसे ।—"अभ्रं

ततस्तु भावना कार्य्या त्रिफलाभृङ्गराजकैः।
ततः प्रक्षिप्य चूर्णञ्च पिप्पलीमूलयष्टिका ॥ ३ ॥
एला पुनर्नवा दारु पाठा भृङ्गं शटी वचा।
उत्पलं चन्दनञ्चैषां श्लक्ष्णचूर्णं प्रदापयेत् ॥ ४ ॥
माषमेकं प्रदातव्यं घृतश्रीमधुमर्दितम्।
मर्दनं लौहदण्डेन पात्रे लौहमये दृढ़े ॥ ५ ॥
उष्णोदकञ्चानुपानं प्रयोक्तव्यं सुखावहम्।
यावतो नेत्ररोगांश्च पानादेव विनाशयेत् ॥ ६ ॥
सरक्ते रक्तपित्ते च रक्ते चक्षुःस्रुतेऽपि च।
नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे ॥ ७ ॥
अभिष्यन्देऽधिमन्थे च पिष्टे चैव चिरन्तने।
नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च।
युञ्जीत तान् निहन्त्येव वृत्रमिन्द्राशनिर्यथा ॥ ८ ॥

नयनामृतलौहम्।—

त्रिकटु त्रिफला शृङ्गी शटी रास्ना महौषधम्।
द्राक्षा नीलोत्पलञ्चैव काकोली मधुयष्टिकम् ॥ ९ ॥
वाय्यालं केशराजञ्च कण्टकारीद्वयं पलम्।
लौहाभ्रयोः पलं दत्त्वा वक्ष्यमाणेन भावयेत् ॥ १० ॥

ताम्रं तथा लौहम्" इत्यत्र "अभ्रं ताम्रं रसं लौहम्" इति पाठान्तरम्। "गन्धकं नवनीतकम्" इति—नवनीताख्यगन्धकम्, "आमलसार्हो गन्धक" इति ख्यातः। त्रिफलाभृङ्गराजकैरिति—त्रिफलारसैः भृङ्गराजरसैश्च। भृङ्गं—गुड़त्वक्। "भृङ्गम्" इत्यत्र "शृङ्गम्" इति पाठे—कर्कटशृङ्गी। श्रीमधु—कमलमधु ॥ १—८ ॥

त्रिफलायाश्च तोयेन भृङ्गराजरसेन वा ।
भावयित्वा वटी कार्य्या बदरास्थिनिभा शुभा ।
यावतो नेत्ररोगांश्च निहन्यान्नात्र संशयः ॥ ११ ॥

चतशुक्लहरो गुग्गुलुः ।—

अयःसयष्टीत्रिफलाकणानां चूर्णानि तुल्यानि पुरेण नित्यम् ।
सर्पिर्मधुभ्यां सह भक्षितानि शुक्लानि काचानि निहन्ति शीघ्रम् ॥१२

तिमिरहरलौहम् ।—

त्रिफलापद्मयष्ट्याह्व-युक्तं सायं निषेवितम् ।
लौहं तिमिरकं हन्ति सुधांशुस्तिमिरं यथा ॥ १३ ॥

[इति नेत्ररोग-चिकित्सा]।

अथ शिरोरोग-चिकित्सा ।—

रसचन्द्रिका वटी ।—

त्रैलोक्यविजयावीजं वीजमुन्मत्तकस्य च ।
कण्टकारीवीजकञ्च इज्जलं वीजमेव च ॥ १ ॥

नयनामृतलौहे ।—शृङ्गी—कर्कटशृङ्गी, वाट्यालं—श्वेतबला । कण्टकारीद्वयं—कण्टकारी वृहती च ॥ ८—११ ॥

चतशुक्लहरगुग्गुलौ ।—पुरेण—गुग्गुलुना, स च सर्वचूर्णसमः ॥१२॥

तिमिरहरलौहे ।—सर्वचूर्णसमं लौहं प्रदेयम् ॥ १३ ॥

इति नेत्ररोगाधिकारः ।

वीजञ्च वृद्धदारस्य समौ गन्धकपारदौ।
आर्द्रकैर्वटिका कार्य्या कलायपरिमाणतः ॥ २ ॥
एषा तोयानुपानेन प्रातः खाद्या हिताशिना।
चिरजं सर्वजञ्चैव शिरोरोगं सुदारुणम् ॥ ३ ॥
आमवातं श्लेष्मरोगं मन्यास्तम्भं गलग्रहम्।
ग्रहणीं श्लीपदं हन्ति ह्यन्त्रवृद्धिं भगन्दरम् ॥ ४ ॥
कामलां शोथपाण्डुत्वं पीनसार्शोगुदामयान्।
वासुदेवेन कथिता वटिका रसचन्द्रिका ॥ ५ ॥

शिरोवज्ररसः।—

पलं सूतं पलं गन्धः पलं लौहं पलं रवेः।
गुग्गुलोः पलचत्वारि तदर्द्धं त्रिफलारजः ॥ ६ ॥
यष्टीमधु कणा शुण्ठी गोक्षुरं क्रिमिनाशनम्।
तोलकं दशमूलञ्च प्रत्येकं परिकल्पयेत् ॥ ७ ॥
क्वाथेन दशमूल्याश्च यथास्वं परिभावयेत्।
घृतयोगेन कर्त्तव्या माषैकप्रमिता वटी ॥ ८ ॥
छागीदुग्धेन वा सेव्या मधुना पयसाऽथवा।
वातिकीं पैत्तिकीञ्चैव श्लैष्मिकीं सान्निपातिकीम् ॥ ९ ॥
शिरोऽर्त्तिं नाशयत्याशु वज्रं मुक्तमिवासुरम्।
शिरोवज्ररसो नाम चन्द्रनाथेन भाषितः ॥ १० ॥

कर्णनासानेत्रादीनामधिष्ठानत्वेन चक्षूरोगचिकित्साऽनन्तरं शिरोरोग-चिकित्सितमुच्यते।—रसचन्द्रिकावटिकायाम्।—त्रैलोक्यविजयावीजमिति—इन्द्राशनवीजम्, उन्मत्तकस्य च वीजमिति—धुस्तूरवीजम् ॥१—५॥

चन्द्रकान्तरसः।—

मृतसूताभ्रकं तीक्ष्णं ताम्रं गन्धं समं समम्।
स्नुहीक्षीरैर्दिनं मर्द्यं ततस्तु माषमात्रकम् ॥ ११ ॥
मधुना मर्दितं सेव्यं लौहपात्रे दिने दिने।
सूर्य्यावर्त्तादिकान् तूर्णं शिरोरोगान् विनाशयेत् ॥ १२ ॥

महालक्ष्मीविलासः।—

लौहमभ्रं विषं मुस्तं फलत्रयकटुत्रयम्।
धुस्तूरं वृद्धदारञ्च वीजमिन्द्राशनस्य च ॥ १३ ॥
द्वयं गोक्षुरकञ्चैव पिप्पलीमूलमेव च।
एतत् सर्वं समं ग्राह्यं रसे धुस्तूरकस्य च ॥ १४ ॥
भावयित्वा वटी कार्य्या द्विगुञ्जाफलमानतः।
महालक्ष्मीविलासोऽयं सन्निपातनिवारकः ॥ १५ ॥

[इति शिरोरोग-चिकित्सा]।

शिरोवज्ररसे।—रविः,—ताम्रम्। "तदर्द्धं त्रिफलारजः" इति—गुग्गुलोरर्द्धं त्रिफलाचूर्णमित्यर्थः ॥ ६—१० ॥

चन्द्रकान्तरसे।—माषमात्रकमिति।—या मात्रा निर्दिष्टा, तादृशी मात्रा तु अधुना न प्रयुज्यते वैद्यैः, दुःसहत्वात्ताम्रघटितस्यौषधस्य; परन्तु माषा एव मात्रा यस्येत्यादिरूपमर्थं विहाय—"माषः" कलायविशेषः, तादृशी मात्रा प्रमाणमस्येति माषमात्रकं माषकलायसदृशमित्यर्थे कृते व्यवहारसङ्गता मात्रा स्यात्। तावत्येव मात्रा प्रयुज्यते वृद्धैः ॥११।१२॥

महालक्ष्मीविलासे।—धुस्तूरं—धुस्तूरवीजम्; एवं वृद्धदारकवीजम् इन्द्राशनस्य च वीजं ग्राह्यम्। गोक्षुरद्वयमिति—स्वल्पपत्रबृहत्पत्रभेदात् गोक्षुरद्वयं ग्राह्यम् ॥ १३—१५ ॥

इति शिरोरोगाधिकारः।

अथ प्रदररोग-चिकित्सा ।—

—०*०—

प्रदरान्तकलौहम् ।—

हरितालं लौहताम्रे वङ्गमभ्रं वराटिका ।
त्रिकटु त्रिफला चित्रं विडङ्गं पटुपञ्चकम् ॥ १ ॥
चविका पिप्पली शृङ्गं वचा हवुषपाकलम् ।
शटी पाठा देवदारु एला च वृद्धदारकम् ॥ २ ॥
एतानि समभागानि सञ्चूर्ण्य वटिकां कुरु ।
शर्करामधुसंयुक्तां घृतेन भक्षयेत् पुनः ॥ ३ ॥
रक्तं श्वेतं हन्ति पीतं नीलं प्रदरदुस्तरम् ।
कुक्षिशूलं कटीशूलं योनिशूलञ्च सर्वजम् ॥ ४ ॥
मन्दाग्निमरुचिं पाण्डुं कृच्छ्रश्वासञ्च कासनुत् ।
आयुःपुष्टिकरं बल्यं रजोवर्णप्रसादनम् ॥ ५ ॥

प्रदरान्तको रसः ।—

शुद्धसूतं तथा गन्धः गन्धतुल्यञ्च रूप्यकम् ।
खर्परञ्च वराटञ्च शाणमानं पृथक् पृथक् ॥ ६ ॥
तोलकत्रितयञ्चैव लौहचूर्णं क्षिपेत् सुधीः ।
दिनैकं कन्यकानीरैः मर्दयेच्च भिषग्वरः ।
असाध्यं प्रदरं हन्ति भक्षणात् नात्र संशयः ॥ ७ ॥

स्त्रीपुंसां साध रणविकाराणां तथा पुरुषप्रतिनियतस्य उपदंशादे-श्चिकित्सोक्ता, इदानीं स्त्रीनियतरोगाणां चिकित्सा वक्तव्या ; तत्र च योनिव्यापद्विशेषेऽप्यार्त्तवप्रवृत्तिसम्भवात् प्रथमं दुष्टार्त्तवप्रवृत्तिस्वरूपस्य

मधुकादिचूर्णम् ।—

यष्टीमधुनिशाचूर्ण-तोलकेन समन्वितम् ।
वङ्गभस्मार्कपत्रस्य रसेनाप्लाव्य पीयते ।
प्रातः प्रातः प्रतिदिनं प्रदरं हन्ति दुस्तरम् ॥ ८ ॥

पुष्करलेहः ।—

रसाञ्जनं शुभा शृङ्गी चित्रकं मधुयष्टिकम् ।
धान्यतालीशगायत्री-द्विजीरं त्रिवृता बला ॥ ९ ॥
दन्तीत्र्यूषणकञ्चापि प्रलाईञ्च शिलाजतु ।
चतुःपलं माक्षिकस्यामलस्य च क्षिपेत् ततः ॥ १० ॥
जातीकोषलवङ्गञ्च कक्कोलं मृद्वीकाऽपि च ।
चातुर्जातकखर्जूरं कर्षमेकं पृथक् पृथक् ॥ ११ ॥
प्रक्षिप्य मर्दयित्वा च स्निग्धभाण्डे निधापयेत् ।
एष लेहवरः श्रीदः सर्वरोगकुलान्तकः ।
यत्र यत्र प्रयोज्यः स्यात् तत्तदामयनाशनः ॥ १२ ॥
अनुपानं प्रयोक्तव्यं देशकालानुसारतः ।
सर्वोपद्रवसंयुक्तं प्रदरं सर्वसम्भवम् ॥ १३ ॥
द्वन्द्वजं चिरजञ्चैव रक्तपित्तं विनाशयेत् ।
कासश्वासाम्लपित्तञ्च क्षयरोगमथापि वा ॥ १४ ॥

प्रदरस्य चिकित्सितमुच्यते । प्रदरान्तकलौहे ।—वराटिका—कपर्दः । पटुपञ्चकं—पञ्चलवणं, शङ्खं—शङ्खनाभिः, पाकलं—कुष्ठम् ॥ १-८ ॥

पुष्करलेहे ।—शुभा—वंशलोचना, गायत्री—खदिरः । द्विजीरमिति—जीरकं कृष्णजीरकञ्च । "पलाईञ्च शिलाजतु" इत्यत्र "पला-

सर्वरोगप्रशमनो बलवर्णाग्निवर्द्धनः।
पुष्कराख्यो लेहवरः सर्वत्रैवोपयुज्यते ॥ १५ ॥

धात्र्यादिचूर्णम् ।—

धात्री च पथ्या च रसाञ्जनञ्च विचूर्ण्य सर्वं सजलं निपीतम्।
अनन्तरक्तस्रवमुग्रवेगं निवारयेत् सेतुरिवाम्बुवेगम् ॥ १६ ॥
रक्तपित्तहरं सर्वं प्रदरे नूतने तथा।
रक्तातीसारकथितं सर्वमत्र प्रयोजयेत् ॥ १७ ॥

[इति प्रदररोग-चिकित्सा]।

अथ योनिव्यापच्चिकित्सा। -

वातज्वरचिकित्साऽतिदेशः क्षालनादौ त्रिफला च।—

समस्तं वातजित् कर्म योनिव्यापत्सु शस्यते।
क्षालनस्वेदलेपांश्च वरानीरेण कारयेत् ॥ १ ॥

पथ्यादिक्षालनम् ।—

प्रक्षालयेद्भगं नित्यं पथ्यामलकवल्कलैः।
वृद्धाऽपि कामिनी नित्यं बालावत् कुरुते रतिम् ॥ २ ॥

[इति योनिव्यापच्चिकित्सा]।

ईश्च पृथक् पृथक्" इति पाठान्तरम्। चातुर्जातकम्—एला-तेजपत्र-गुड़त्वक् नागेश्वरम् ॥ ८—१७ ॥

इति प्रदररोगाधिकारः।

स्वाधिकारानुवृत्तेः प्रदुष्टार्त्तवकार्य्यत्वाच्च तदनन्तरं योनिव्यापच्चिकित्सितमुच्यते। समस्तमित्यादौ।—वरानीरेण—त्रिफलाक्काथेन ॥१।२॥

इति योनिव्यापदधिकारः।

अथ सूतिकारोग-चिकित्सा ।—

—०*०—

सूतिकारिरसः ।—

रसगन्धकक्कष्णाभ्रं तदर्द्धं मृततामकम् ।
चूर्णितं मर्दयेद् यत्नाद्भेकपर्णीरसेन च ॥ १ ॥
छायाशुष्का वटी कार्य्या द्विगुञ्जाफलमानतः ।
क्षीरत्रिकटुना युक्ता सूतिकाऽऽतङ्कनाशिनी ।
ज्वरं तृष्णाऽरुचिश्वासं शोथं हन्ति न संशयः ॥ २ ॥

सूतिकाविनोदरसः ।—

रसगन्धकतुल्यञ्च त्र्यहं जम्बीरमर्दितम् ।
त्रिभावितं त्रिकटुना देयं गुञ्जाचतुष्टयम् ।
गर्भिण्याः शूलविष्टम्भ-ज्वराजीर्णेषु योजयेत् ॥ ३ ॥

चिन्तामणिरसः ।—

चिन्तामणिरसे देयं तुल्यस्थाने सुवर्णकम् ॥ ४ ॥

बृहत्सूतिकाविनोदरसः ।—

शुण्ठ्या भागो भवेदेको द्वौ भागौ मरिचस्य च ।
पिप्पल्याश्च त्रिभागं स्यादर्द्धभागञ्च व्योमकम् ॥ ५ ॥
जातीकोषस्य भागौ द्वौ द्वौ भागौ तुल्यकस्य च ।

क्रमप्राप्तत्वात् तथा विशिष्टस्त्रीरोगचिकित्साभिधानार्थं सूतिकारोग-चिकित्सितमुच्यते। सूतिकारिरसे ।—"तदर्द्धं मृततामकम्" इति—एकभागापेक्षया ताम्रस्यार्द्धभागत्वम् । भेकपर्णी—"थानकुनी" इति

सिन्धुवारजलेनैव मर्दयेदेकयामतः ।
मधुना सह भोक्तव्यः सूतिकाऽऽतङ्कनाशनः ॥ ६ ॥

अपरसूतिकारिरसः ।—

टङ्कणं मूर्च्छितं सूतं गन्धकः हेम तारकम् ।
जातीफलं तथा कोषं लवङ्गैले च धातकी ॥ ७ ॥
वत्सकेन्द्रयवं पाठा शृङ्गीविश्वाऽजमोदिका: ।
गुड़ी प्रसारणीनीरैश्चतुर्गुञ्जाप्रमाणतः ॥ ८ ॥
भक्षयेत् तद्रसैः प्रातः सूतिकाऽऽतङ्कशान्तये ।
जीर्णज्वरं हन्ति शोथं ग्रहणीप्लीहकासनुत् ॥ ९ ॥

सूतिकाघ्नो रसः । —

रसगन्धकलौहाभ्रं जातीकोषं सुवर्णकम् ।
समांशं मर्दयेत् खल्ले छागीदुग्धेन पेषयेत् ॥ १० ॥
गुञ्जाद्वयप्रमाणेन वटिकां कुरु यत्नतः ।
ज्वरातीसाररोगघ्नः सूतिकाऽऽतङ्कनाशनः ।
सूतिकाघ्नो रसो नाम ब्रह्मणा परिकीर्त्तितः ॥ ११ ॥

सूतिकान्तको रसः ।—

रसाभ्रगन्धकव्योषं सुवर्णमाक्षिकं विषम् ।
सर्वमेकीकृतं चूर्णं खादेद्रक्तिचतुष्टयम् ॥ १२ ॥
सूतिकाग्रहणीरोगं वह्निमान्द्यञ्च नाशयेत् ।
अतिसारञ्च शमयेदपि वैद्यविवर्जितम् ।
कासश्वासातिसारघ्नो वाजीकरण उत्तमः ॥ १३ ॥

ख्याता । सूतिकाविनोदरसोक्ततुल्यस्थाने सुवर्णप्रयोगे चिन्तामणिरस इति संज्ञा बोध्या ॥ १—६ ॥

गर्भचिन्तामणिरसः। –

जातीफलं टङ्गणञ्च व्योषं दैत्येन्द्ररक्तकम्।
तच्चूर्णं समभागेन मर्दितं प्रहरद्वयम् ॥ १४ ॥
जम्बीररसयोगेन वटीं कुर्य्याद्विचक्षणः।
गुञ्जाद्वयप्रमाणान्तु खलु वैद्यः प्रयत्नतः ॥ १५ ॥
आर्द्रकस्य रसेनैव भक्षयेदुष्णवारिणा।
निहन्ति सर्वरोगञ्च भास्करस्तिमिरं यथा ॥ १६ ॥

अपरगर्भचिन्तामणिरसः।—

रसं तारं तथा लौहं प्रत्येकं कर्षमानतः।
कर्षत्रयं तथा चाभ्रं कर्पूरं वङ्गताम्रकम् ॥ १७ ॥
जातीफलं तथा कोषं गोक्षुरश्च शतावरी।
बलाऽतिबलयोर्मूलं प्रत्येकं तोलकं शुभम् ॥ १८ ॥
वारिणा वटिका कार्य्या द्विगुञ्जाफलमानतः।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः।
गर्भिण्या ज्वरदाहञ्च प्रदरं सूतिकाऽऽमयम् ॥ १९ ॥

बृहद्गर्भचिन्तामणिरसः।—

सूतं गन्धः तथा स्वर्णं लौहं रजतमाक्षिके।
हरितालं वङ्गभस्माप्यभ्रकं समभागिकम् ॥ २० ॥

अपरसूतिकारिरसे।—तारकं—रौप्यं, कोषं—जातीकोषं, वत्सकः,—कुटजः॥ ७—१३ ॥

गर्भचिन्तामणिरसे।—व्योषं—त्रिकटु, दैत्येन्द्ररक्तकं—हिङ्गुलम् ॥ १४—१६ ॥

भावना खलु दातव्या रसैरेषां पृथक् पृथक्।
ब्रह्मीवासाभृङ्गराज-पर्पटीदशमूलकैः॥ २१॥
सप्तधा भावयेद्वैद्यो गुञ्जामानां वटीं चरेत्।
गर्भचिन्तामणिरयं पूर्ववद्गुणकारकः॥ २२॥

गर्भविनोदरसः।—

देयं त्रिभागं त्रिकटु चतुर्भागञ्च हिङ्गुलम्।
जातीकोषं लवङ्गञ्च प्रत्येकञ्च त्रिकार्षिकम्॥ २३॥
सुवर्णमाक्षिकस्यापि पलार्द्धं प्रक्षिपेद् बुधः।
जलेन मर्दयित्वाऽथ चणमात्रा वटी कृता।
निहन्ति गर्भिणीरोगं भास्करस्तिमिरं यथा॥ २४॥

सूतिकाहररसः।—

लवङ्गं रसगन्धौ च यवक्षारं तथाऽभ्रकम्।
लौहं ताम्रं सीसकञ्च पलमानं समाहरेत्॥ २५॥
जातीफलं केशराजं भृङ्गैलामुस्तकं वरा।
धातकीन्द्रयवं पाठा शृङ्गी विल्वञ्च बालकम्॥ २६॥
कर्षमानञ्च सञ्चूर्ण्य सर्वमेकत्र कारयेत्।
बदरास्थिप्रमाणेन वटिकां कारयेद्भिषक्॥ २७॥
गन्धालिकापत्ररसैरनुपानं प्रदापयेत्।
सर्वातीसारशमनः सर्वशूलनिवारणः॥ २८॥

अपरगर्भचिन्तामणिरसे।—तारं—रौप्यं, कोषं—जातीकोषं, शता-वरी—शतमूली॥ १७—२४॥

सूतिकाशोथपाण्डुत्व-सर्वज्वरविनाशनः ।
सूतिकाहरनामाऽयं रसः परमदुर्लभः ॥ २९ ॥

महाऽभ्रवटी ।—

अभ्रकं पुटितं ताम्रं लौहं गन्धकपारदम् ।
कुनटी टङ्कणं क्षारं त्रिफला च पलं पलम् ॥ ३० ॥
गरलञ्च तथा माष-चतुष्कञ्चैव चूर्णितम् ।
तत् सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः ॥ ३१ ॥
ग्रीष्मसुन्दरकस्याट-रूषकस्य क्रमेण तु ।
रसैस्ताम्बूलवल्ल्याश्च दलोत्थैर्भावितं पृथक् ॥ ३२ ॥
द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ।
सर्वातीसारशमनं सर्वशूलनिवारणम् ॥ ३३ ॥
सूतिकाशोथपाण्डुत्व-सर्वज्वरविनाशनम् ।
नाशयेत् सूतिकाऽऽतङ्कं वृक्षमिन्द्राशनिर्यथा ॥ ३४ ॥

अपरमहाऽभ्रवटी ।—

मृतमभ्रञ्च लौहञ्च कुनटी ताम्रकं तथा ।
रसगन्धकटङ्कञ्च यवक्षारफलत्रिकम् ॥ ३५ ॥
प्रत्येकं तोलकं ग्राह्यमूषणं पञ्चतोलकम् ।
सर्वमेकीकृतं चूर्णं प्रत्येकेन विभावयेत् ॥ ३६ ॥

सूतिकाहररसे ।—वरा—त्रिफला, गन्धालिकापत्ररसैः,—प्रसारणीपत्ररसैः ॥ २५—२९ ॥

महाऽभ्रवटिकायाम् ।—कुनटी—मनःशिला, क्षारं—यवक्षारः, गरलं—विषं, ग्रीष्मसुन्दरकस्य—"गोमा" इति ख्यातस्य, अटरूषकस्य—वासकस्य ॥ ३०—३४ ॥

ग्रीष्मसुन्दरसिंहास्य-नागवल्ल्या रसेन च।
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
योजयेत् सर्वथा वैद्यः सूतिकारोगशान्तये॥ ३७॥

रसशार्दूलः।—

अभ्रं ताम्रं तथा लौहं राजपट्टं रसं तथा।
गन्धटङ्कमरीचञ्च यवक्षारं समांशकम्॥ ३८॥
तथाऽत्र तालकञ्चैव त्रिफलायाश्च तोलकम्।
तोलकञ्चामृतञ्चैव षड्गुञ्जाप्रमिता वटी॥ ३९॥
ग्रीष्मसुन्दरकस्यापि नागवल्लीरसेन च।
भावयेत् सप्तधा हन्ति ज्वरं कासाङ्गसंग्रहम्।
सूतिकाऽऽतङ्कशोथादि-स्त्रीरोगञ्च विनाशयेत्॥ ४०॥

महारसशार्दूलः।—

अभ्रकं पुटितं ताम्रं स्वर्णं गन्धश्च पारदः।
शिला टङ्गं यवक्षारः त्रिफलायाः पलं पलम्॥ ४१॥
गरलस्य तथा ग्राह्यमर्द्धतोलकसम्मितम्।
त्वगेला पत्रकञ्चैव जातीकोषलवङ्गकम्॥ ४२॥
मांसी तालीशपत्रञ्च माक्षिकञ्च रसाञ्जनम्।
एषां द्विकार्षिकं भागं देयञ्चापि विचक्षणैः॥ ४३॥

अपरमहाऽभ्रवटिकायाम्।—ऊषणं—मरिचं, ग्रीष्मसुन्दरं—"गीमा" इति वङ्गभाषा। सिंहास्यं—वासा, नागवल्ली—ताम्बूलम्॥ ३५—३७॥

रसशार्दूलरसे।—राजपट्टं—कान्तपाषाणं, गन्धं—गन्धकम्, अमृतं—विषम्॥ ३८—४०॥

द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ।
भावना च प्रदातव्या पूर्वोक्तेन रसेन च ॥ ४४ ॥
निहन्ति विविधान् रोगान् ज्वरान् दाहान् वमिं भ्रमिम् ।
तथाऽतिसारकञ्चैव वह्निमान्द्यमरोचकम् ।
विशेषाद् गर्भिणीरोगं नाशयेदचिरेण च ॥ ४५ ॥

बृहद्रसशार्दूलः ।—

रसस्य द्विगुणं गन्धं शुद्धं संमर्दयेद् दिनम् ।
प्रतिलौहं सूततुल्यमष्टलौहं मृतं क्षिपेत् ॥ ४६ ॥
ब्राह्मी जयन्ती निर्गुण्डी यष्टीमधु पुनर्नवा ।
नलिका गिरिकर्ण्यर्क-कृष्णधूर्त्तदुरालभाः ॥ ४७ ॥
अटरूषः काकमाची द्रवैरेषां विमर्दयेत् ।
गुञ्जात्रयं चतुर्गुञ्जं सर्वरोगेषु योजयेत् ।
रोगोक्तमनुपानं वा कवोष्णं वा जलं पिबेत् ॥ ४८ ॥

तत्र अष्टलौहानि ।—

सुवर्णं रजतं ताम्रं कांस्यं पित्तलमेव च ।
नागं वङ्गं तथा लौहं धातवोऽष्टौ प्रकीर्त्तिताः ॥ ४९ ॥

[इति सूतिकारोग-चिकित्सा]।

महारसशार्दूले ।—शिला— मनःशिला, पत्रकं— तेजपत्रं, माक्षिकं— स्वर्णमाक्षिकम् । पूर्वोक्तेन रसेन— रसशार्दूलोक्तग्रीष्मसुन्दरकनागवल्ली-रसेन ॥ ४१—४५ ॥

बृहद्रसशार्दूलरसे ।—प्रतिलौहमिति—वक्ष्यमाणाष्टलौहम् । नलिका —सुगन्धिद्रव्यविशेषः, गिरिकर्णी—अपराजिता, कृष्णधूर्त्तः,—कृष्ण-

अथ तृतीयोऽध्यायः ।

—०✱०—

अथ बालरोग-चिकित्सा ।—

—०✱०—

बालरसः ।—

पलं शुद्धस्य सूतस्य गन्धकस्य पलं तथा ।
सुवर्णमाक्षिकस्यापि भागार्द्धं संप्रकल्पयेत् ॥ १ ॥
ततः कज्जलिकां कृत्वा पात्रे लौहमये दृढ़े ।
केशराजस्य भृङ्गस्य निर्गुण्ड्याः स्वरसेन च ॥ २ ॥
शुभे शिलामये पात्रे लौहदण्डेन मर्द्दयेत् ।
राजिकासदृशीश्चैव वटिकां कारयेद्भिषक् ॥ ३ ॥
एकैकां वटिकां खादेन्नागवल्लीदलद्रवैः ।
हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणम् ॥ ४ ॥
चिरज्वरञ्च कासञ्च शूलं सर्व्वभवं तथा ।
शिशूनां रोगनाशाय शिवेन परिकीर्त्तितः ॥ ५ ॥

धुस्तूरः,. अटरूषः,—वासा । "द्रवैरेषां विमर्द्दयेत्" इति—एषां प्रत्येकशः स्वरसैः सप्तवारं भावयेदित्यर्थः ॥ ४६—४९ ॥

इति सूतिकारोगाधिकारः ।

बालरोगाणां दुष्टस्तन्येन सम्भवादनन्तरं बालरोगचिकित्सितमुच्यते ।

बालरोगान्तकरसः ।—

पलं शुद्धस्य सूतस्य गन्धकस्य च तत्समम् ।
सुवर्णमाक्षिकस्यापि चार्द्धभागं नियोजयेत् ॥ ६ ॥
ततः कज्जलिकां कृत्वा पात्रे लौहमये दृढ़े ।
केशराजस्य भृङ्गस्य निर्गुण्ड्याः पर्णसम्भवम् ॥ ७ ॥
स्वरसं काकमाच्याश्च ग्रीष्मसुन्दरकस्य च ।
सूर्य्यावर्त्तकवर्षाभू-भेकपर्णीरसैस्तथा ॥ ८ ॥
श्वेतापराजितायाश्च रसं दद्याद्विचक्षणः ।
देयं रसार्द्धभागेन चूर्णं मरिचसम्भवम् ॥ ९ ॥
शुभे शिलामये पात्रे यामं दण्डेन मर्दयेत् ।
शुष्कमातपसंयोगाद् गुड़िकां कारयेद्भिषक् ॥ १० ॥
प्रमाणं सर्षपाकारं बालानाञ्च प्रयोजयेत् ।
हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणम् ॥ ११ ॥
कासं पञ्चविधञ्चापि सर्वरोगं निहन्ति च ।
शिशूनां रोगनाशाय निर्मितोऽयं महारसः ॥ १२ ॥

[इति बालरोग-चिकित्सा] ।

बालरसे ।—"भागार्द्धं संप्रकल्पयेत्" इति—अर्द्धपलभागम् । "कज्ज-लिकाम्" इत्यत्र "पर्पटिकाम्" इति पाठान्तरम् ॥ १—५ ॥

बालरोगान्तकरसे ।—"वर्षाभू" इत्यत्र "शालिञ्च" इति भैषज्य-रत्नावल्यां धृतः पाठः ॥ ६—१२ ॥

इति बालरोगाधिकारः ।

अथ चतुर्थोऽध्यायः।

———○○———

अथ विष-चिकित्सा।—

—○○—

विषवज्रपातो रसः।—

निशां सटङ्कञ्च सजातिकोषं तुल्यं समांशं कुरु देवदाल्याः।
रसेन पिष्ट्वा विषवज्रपातो रसो भवेत् सर्वविषापहन्ता॥ १॥
निष्कोऽस्य संजीवयति प्रयुक्तो नृमूत्रयोगेन च कालदष्टम्।
जटाविषेणाकुलितं तथाऽन्यैर्विषैर्नरञ्चाशु तथाऽऽतुरञ्च॥ २॥

भीमरुद्रो रसः।—

सूतराजस्य तोलैकं गन्धकस्य तथैव च।
अभ्रात् कर्षं ततो देयं तोलैकं कान्तलौहकम्॥ ३॥
परोक्तेनौषधेनैव भावयेच्च पृथक् पृथक्।
विशालावृहतीब्राह्मी-सौगन्धिकसुदाड़िमैः॥ ४॥
मर्कव्याश्चात्मगुप्तायाः स्वरसेन पृथक् पृथक्।
एकरक्तिकमानेन वटिकां कारयेद् भिषक्॥ ५॥

इदानीम् आतुरहितचिकित्सापारिशेष्यात् विषचिकित्सामाह। विषवज्रपातरसे।—निशा—हरिद्रा, सटङ्कं—टङ्कणलाजसहितं, देवदाल्याः, —हस्तिघोषकस्य॥ १।२॥

भीमरुद्ररसे।—सूतराजस्य—पारदस्य, विशाला—गोरचककंटी,

वटीमेकां भक्षयित्वा पिबेच्छीतजलं ततः ।
भीमरुद्रो रसो नाम चासाध्यमपि साधयेत् ।
कुक्कुरस्य शृगालस्य विषं हन्ति सुदुस्तरम् ॥ ६ ॥

[इति विष-चिकित्सा] ।

अथ पञ्चमोऽध्यायः ।

—००—

अथ रसायन-वाजीकरणाधिकारः ।

—००—

अथ रसायनलक्षणम् ।—

स्वस्थस्यौजस्करं किञ्चित् किञ्चिदार्त्तस्य रोगनुत् ।
यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् ॥ १ ॥

श्रीमन्मथो रसः । —

रसगन्धकयोर्ग्राह्यं कर्षमेकं सुशोधितम् ।
अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धं सुविचक्षणः ॥ २ ॥

सौगन्धिकं—नीलोत्पलं, मर्कटी—अपामार्गः, आत्मगुप्ता—शूकशिम्बी ॥ ३—६ ॥

इति विषाधिकारः ।

भेषजं तावद्द्विविधम्, आतुरहितं, स्वस्थहितञ्च। स्वस्थहितमपि द्विविधं, रसायन-वाजीकरणभेदात् । अत्र आतुरहितं तावदुक्तमेव,

कर्पूरं शाणकं दद्यादङ्गञ्च कोलसम्मितम्।
ताम्रं कोलार्द्धकं तत्र निःशेषमारितं क्षिपेत्॥ ३ ॥
लौहं कर्षं सुजीर्णञ्च वृद्धदारकवीजकम्।
विदारी शतमूली च चुरवीजं बला तथा॥ ४ ॥
मर्कट्यतिबला चैव जातीकोषफले तथा।
लवङ्गं विजयावीजं श्वेतसर्जं यमानिका॥ ५ ॥
एतेषां चूर्णमादाय प्रक्षिपेत् शाणसम्मितम्।
गुञ्जाद्वयञ्च भोक्तव्यं कोष्णं क्षीरं पिबेदनु॥ ६ ॥
गृहे यस्य शतं स्त्रीणां विद्यतेऽतिव्यवायिनः।
न तस्य लिङ्गशैथिल्यमौषधस्यास्य सेवनात्॥ ७ ॥
न च शुक्रं क्षयं याति न बलं ह्रासतां व्रजेत्।
कामरूपी भवेद्दिव्यो वृद्धः षोड़शवर्षवत्॥ ८ ॥
रसायनवरो बल्यो वाजीकरण उत्तमः।
रसः श्रीमन्मथो नाम महेशेन प्रकाशितः॥ ९ ॥

माहेश्वररसः।—

रसं भस्मीकृतं कोलं गन्धकं शोधितं समम्।
लौहं कर्षद्वयं ताम्रमर्द्धकोलकसम्मितम्॥ १० ॥
सुवर्णं जारितं दद्यात् शाणार्द्धं सुविचक्षणः।
अभ्रं कर्षद्वयं दद्यात् शाणार्द्धं चन्द्रचूर्णकम्॥ ११ ॥

सम्प्रति स्वस्थहितं वाच्यम्। श्रीमन्मथरसे।—"कोलसम्मितम्" इत्यत्र "तोलकं तथा" इति पाठान्तरम्। चुरवीजमिति—कोकिलाक्षवीजं, मर्कटी—शूकशिम्बी, जातीकोषफले इति—जातीकोषं, जातीफलञ्च। विजयावीजं—शक्राशनवीजम्। श्वेतसर्जं,—श्वेतधूनकः॥ १—९॥

श्यामावीजं वरीञ्चैव बलामतिबलां तथा ।
एलाञ्च शङ्खपुष्पञ्च शाणमानं विनिक्षिपेत् ॥ १२ ॥
जलेन वटिकां कृत्वा गुञ्जामात्रां प्रदापयेत् ।
सेवनादस्य कन्दर्प-रूपो भवति मानवः ॥ १३ ॥
सहस्रं याति नारीणामुत्साहो जायतेऽधिकः ।
नित्यं स्त्रीसेवनाद् यस्तु क्षीणशुक्रो भवेन्नरः ॥ १४ ॥
महाशुक्रो भवेत् सोऽपि सेवनादस्य नान्यथा ।
महाबलो महाबुद्धिर्जायते नात्र संशयः ॥ १५ ॥
स्थूलानां कर्षकः श्रेष्ठः कृशानां पुष्टिकारकः ।
रसो विनाशयेद्रोगान् सप्तसप्ताहभक्षणात् ॥ १६ ॥

पूर्णचन्द्रो रसः :—

सूताभ्रलौहं सशिलाजतु स्याद्विडङ्गताप्ये मधुना घृतेन ।
संमर्द्य सर्वं खलु पूर्णचन्द्रो माषोऽस्य वृष्यो भवति प्रयुक्तः ॥१७॥

कार्श्यहरलौहम् ।—

श्वेता-पुनर्नवा-दन्ती-वाजिगन्धात्रिकत्रयैः ।
शतमूलीबलायुक्तैरेभिर्लौहं प्रसाधितम् ॥ १८ ॥
हिनस्ति नियतं कार्श्यमपि भृङ्गरसैः सह ।
नास्त्यनेन समं लौहं सर्वरोगान्तकं मतम् ।
दीपनं बलवर्णाग्नेर्हृष्यं तच्चोत्तमोत्तमम् ॥ १९ ॥

माहेश्वररसे ।—रसभस्म—रससिन्दूरं,　　चन्द्रचूर्णकं—कर्पूरम् ।
श्यामावीजं—वृद्धदारकवीजं, वरी—शतमूली ॥ १०—१६ ॥
पूर्णचन्द्ररसे ।—ताप्यं—मनःशिला ॥ १७ ॥

नारदीय-लक्ष्मीविलासो रसः।—

प्रलं कृष्णाभ्रचूर्णस्य तदर्द्धं रसगन्धकम्।
कर्पूरस्य तदर्द्धञ्च जातीकोषफले तथा ॥ २० ॥
वृद्धदारकवीजञ्च वीजमुन्मत्तकस्य च।
त्रैलोक्यविजयावीजं विदारीमूलमेव च ॥ २१ ॥
नारायणी तथा नाग-बला चातिबला तथा।
वीजं गोक्षुरकस्यापि नैचुलं वीजमेव च ॥ २२ ॥
एतेषां कार्षिकं चूर्णं पर्णपत्ररसेन च।
निष्पिष्य वटिका कार्य्या त्रिगुञ्जाफलमानतः ॥ २३ ॥
निहन्ति सन्निपातोत्थान् गदान् घोरान् सुदारुणान्।
वातोत्थानपि पित्तोत्थान् नास्यत्र नियमः क्वचित् ॥ २४ ॥
कुष्ठमष्टादशविधं प्रमेहान् विंशतिं तथा।
नाड़ीव्रणं व्रणं घोरं गुदामयभगन्दरम् ॥ २५ ॥
श्लीपदं कफवातोत्थं चिरजं कुलसम्भवम्।
गलशोथमन्त्रवृद्धिमतीसारं सुदारुणम् ॥ २६ ॥
कासपीनसयक्ष्मार्शः स्थौल्यं दौर्बल्यमेव च।
आमवातं सर्वरूपं जिह्वास्तम्भं गलग्रहम् ॥ २७ ॥
अर्दितं गलगण्डञ्च वातशोणितमेव च।
उदरं कर्णनासाक्षि-मुखवैरस्यमेव च ॥ २८ ॥

काम्यहरलौहे।—वाजिगन्धा—अश्वगन्धा। अत्र सर्वसमं लौहं प्रदेयम् ॥ १८।१९ ॥

नारदीय-लक्ष्मीविलासे।—"तदर्द्धं रसगन्धकम्" इति—अर्द्धार्द्धं मिलितरसगन्धकमित्यर्थः। "कर्पूरस्य तदर्द्धम्" इति—मिलितरस-

सर्वशूलं शिरःशूलं स्त्रीणां गदनिसूदनम् ।
वटिकां प्रातरेकैकां खादेन्नित्यं यथाबलम् ॥ २९ ॥
अनुपानमिह प्रोक्तं मांसं पिष्टं पयो दधि ।
वारिभक्तसुरासीधु-सेवनात् कामरूपधृक् ॥३० ॥
वृद्धोऽपि तरुणस्पर्द्धी न च शुक्रस्य संक्षयः ।
न च लिङ्गस्य शैथिल्यं न केशा यान्ति पक्वताम् ॥ ३१ ॥
नित्यं स्त्रीणां शतं गच्छेन्मत्तवारणविक्रमः ।
द्विलक्षयोजनी दृष्टिर्जायते पौष्टिकः परः ॥ ३२ ॥
प्रोक्तः प्रयोगराजोऽयं नारदेन महात्मना ।
रसो लक्ष्मीविलासोऽयं वासुदेवो जगत्पतिः ।
अभ्यासादस्य भगवान् लक्षनारीषु वल्लभः ॥ ३३ ॥

श्रीकामदेवरसः ।—

पारदं पलमेकं स्यात् द्विपलं शुद्धगन्धकम् ।
रक्तकार्पासतोयेन घृष्ट्वा काचस्य कूप्यतः ॥ ३४ ॥
निक्षिप्य टङ्कणेनैव मुखं तस्य निरोधयेत् ।
वालुकायन्त्रमध्यस्थं कूप्यञ्च कुरु तत् दृढम् ॥ ३५ ॥
अहोरात्रं पचेदग्नौ शास्त्रवित् कुशलो भिषक् ।
शीते चादाय पात्रस्थं कूपिकान्तरलम्बितम् ॥ ३६ ॥

गन्धकार्द्धं, तेन रसगन्धककर्पूराणि तुल्यभागानि । उन्मत्तकस्य बीजं— धुस्तूरबीजम् । त्रैलोक्यविजया—सिद्धिरिति वङ्गभाषा, विदारी—भूमिकुष्माण्डः, नारायणी—शतावरी, नागबला—गोरक्षचाकुलिया ॥ २०—३३ ॥

दरदेन समं रक्तं सोज्ज्वलं भस्म यद्भवेत्।
भक्षयेन्माषमेकञ्च घृतेन मधुना सह ॥ ३७ ॥
पश्चात् दुग्धं गुड़ञ्चाज्यं कृष्णेक्षुमपि शर्कराम्।
द्राक्षाखर्जूरमधुक-प्रभृतीनथ भक्षयेत् ॥ ३८ ॥
त्रिफला मधुना शान्तिं याति पित्तं चिरोत्थितम्।
निर्गुण्डिकारसेनात्र दुर्वारा वातवेदना।
प्रशमं याति वेगेन नूतनञ्च वपुर्भवेत् ॥ ३९ ॥
अर्द्धाऽऽवर्त्तितदुग्धेन खेद्यति यद्ययं रसः।
बन्ध्याऽपि च भवत्येव जीववत्सा सपुत्रिका ॥ ४० ॥
कामदेवाह्वयः सूतः कामिनां कामदः सदा।
यस्य प्रभावतो बल्यो रम्यश्च रमते स्त्रियम् ॥ ४१ ॥

अनङ्गसुन्दरो रसः।—

शुद्धसूतं समं गन्धं त्र्यहं कह्लारजैर्द्रवैः।
मर्दितं बालुकायन्त्रे यामं सम्पुटके पचेत् ॥ ४२ ॥
रक्तागस्त्यद्रवैर्भाव्यं दिनमेकं सिताऽम्बुजैः।
यथेष्टं भक्षयेच्चानु कामयेत् कामिनीशतम् ॥ ४३ ॥

हेमसुन्दरो रसः।—

मृतसूतस्य पादांशं हेमभस्म प्रकल्पयेत्।
क्षीराज्यदधिसंमिश्रं माषैकं कांस्यपात्रके ॥ ४४ ॥
लेहयेत् मासषट्कन्तु जरामरणनाशनम्।

श्रीकामदेवरसे।—रक्तकार्पासपुष्परसमर्दितः सगन्धकः रसः रससिन्दूरवत् बालुकायन्त्रे काचकूपिकायां पचनीयः ॥ ३४—४१ ॥

वागुजीचूर्णकर्षैकं धात्रीफलरसाप्लुतम् ।
अनुपानं पिबेन्नित्यं स्याद्रसो हेमसुन्दरः ॥ ४५ ॥

'अमृतार्णवो रसः ।—

सूतभस्म चतुर्भागं लौहभस्म तथाऽष्टकम् ।
अभ्रभस्म च षड्भागं गन्धकस्य च पञ्चकम् ॥ ४६ ॥
भावयेत् त्रिफलाक्काथैस्तत्सर्वं भृङ्गजैर्द्रवैः ।
शिग्रुवह्निकटुक्काथैर्भावयेत् सप्तधा पृथक् ॥ ४७ ॥
सर्वतुल्या कणा योज्या गुडैर्मिश्रा पुरातनैः ।
निष्कमात्रं सदा खादेत् जरामृत्युनिवारणम् ॥ ४८ ॥
ब्रह्मायुः स्यात् चतुर्मासे रसोऽयममृतार्णवः ।
कौरण्टकस्य पत्राणि गुडेन भक्षयेदनु ॥ ४९ ॥

बृहत्पूर्णचन्द्रो रसः ।—

द्विकर्षं शुद्धसूतस्य गन्धकञ्च द्विकार्षिकम् ।
लौहभस्म पलञ्चाभ्रं जारितञ्च पलांशिकम् ॥ ५० ॥
द्वितोलं रजतञ्चैव वङ्गभस्म द्विकार्षिकम् ।
सुवर्णं तोलकञ्चैव ताम्रं कांस्यञ्च तत्समम् ॥ ५१ ॥
जातीफलञ्चेन्द्रपुष्पमेला भृङ्गञ्च जीरकम् ।
कर्पूरं वनिता मुस्तं कर्षं कर्षं पृथक् पृथक् ॥ ५२ ॥

अनङ्गसुन्दररसे ।—कह्लारजैः,—रक्तोत्पलजैः, रक्तागस्त्यद्रवैः,—रक्तवकपुष्पस्वरसैः ॥ ४२—४५ ॥

अमृतार्णवे ।—सूतभस्म इति—रससिन्दूरम् । कौरण्टकः,—पीतझिण्टी ॥ ४६—४९ ॥

बृहत्पूर्णचन्द्ररसे ।—इन्द्रपुष्पं—लवङ्गं, भृङ्गं—गुड़त्वक्, वनिता—

सर्वं खल्लतले क्षिप्त्वा कन्यारसविमर्दितम्।
भावयित्वा वरातोयैः केवुकानां रसेन च॥ ५३॥
एरण्डपत्रैरावेष्ट्य धान्ये रात्रिदिनोषितम्।
उद्धृत्य मर्दयित्वा तु वटिकां चणसम्मिताम्॥ ५४॥
खादेच्च पर्णखण्डेन संयुक्तां व्याधिनाशिनीम्।
सर्वव्याधिविनाशाय काशीराजेन भाषितः॥ ५५॥
पूर्णचन्द्ररसो नाम सर्वरोगेषु योजयेत्।
बल्यो रसायनो वृष्यो वाजीकरण उत्तमः॥ ५६॥
अयमष्ठीलिकां हन्ति कासश्वासमरोचकम्।
आमशूलं कटीशूलं हृच्छूलं पित्तशूलकम्॥ ५७॥
अग्निमान्द्यमजीर्णञ्च ग्रहणीं चिरजामपि।
आमवातमम्लपित्तं भगन्दरमपि द्रुतम्॥ ५८॥
कामलां पाण्डुरोगञ्च प्रमेहं वातशोणितम्।
नातः परतरः श्रेष्ठो विद्यते वाजिकर्मणि॥ ५९॥
रसस्यास्य प्रसादेन नरो भवति निर्गदः।
मेधाञ्च लभते वाग्मी तुष्टिपुष्टिसमन्वितः॥ ६०॥
मदनस्य समां कान्तिं मदनस्य समं बलम्।
गीयते मदनेनैव मदनस्य समं वपुः॥ ६१॥
प्रियाश्च मदनप्रायाः पश्यन्ति मदनाकुलाम्।
स्त्रीणां तथाऽनपत्यानां दुर्बलानाञ्च देहिनाम्॥ ६२॥

प्रियङ्गुः। वरातोयैरिति—त्रिफलाक्वाथैः। केवुकः,—केमुकवृक्षः, "केँउ" इति वङ्गभाषा। "केवुकानाम" इत्यत्र ""'कवुकाणाम्," तथा

क्षीणानामल्पशुक्राणां वृद्धानां वातरेतसाम् ।
ओजस्तेजस्करश्चायं स्त्रीषु कामविवर्द्धनः ॥ ६३ ॥
अभ्यासेन निहन्ति मृत्युपलितं सर्वामयध्वंसकः
वृद्धानां मदनोदयोदयकरः प्रौढ़ाङ्गनासङ्गमे ।
नित्यानन्दकरः सुखातिसुखदो भूपैः सदा सेव्यते
दृष्टः सिद्धफलो रसायनवरः श्रीपूर्णचन्द्रो रसः ॥ ६४ ॥

चन्द्रोदयरसः ।—

पलं मृदुस्वर्णदलं रसेन्द्रात् पलाष्टकं षोड़श गन्धकस्य ।
शोणैः सुकार्पासभवप्रसूनैः सर्वं विमर्द्याथ कुमारिकाऽद्भिः ॥६५॥
तत्काचकुम्भे निहितं सुगाढ़ं मृत्कर्पटैस्तद्दिवसत्रयञ्च ।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रसः पल्लवरागरम्यः ॥ ६६ ॥
संगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव ।
जातीफलं सोषणमिन्द्रपुष्पं कस्तूरिकाया इह शाण एकः ॥ ६७ ॥
चन्द्रोदयोऽयं कथितोऽस्य वल्लो भुक्तोऽहिवल्लीदलमध्यवर्त्ती ।
मदोद्धतानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यवश्यम् ॥ ६८ ॥
शृतं घनीभूतमतीव दुग्धं गुरूणि मांसानि समण्डकानि ।
माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि चात्र ॥६९॥

"धान्ये रात्रिदिनोषितम्" इत्यत्र "धान्यराशौ दिनत्रयम्" इति भैषज्य-रत्नावल्यां धृतः पाठः ॥ ५०—६४ ॥

चन्द्रोदयरसे ।—शोणैः सुकार्पासभवप्रसूनैरिति—रक्तकार्पासकुसुमैः । "पलं पलानि चत्वारि कर्पूररजस्तथैव" इत्यत्र "पलञ्च सम्यक् पलञ्च कर्पूररजस्तथैव" इति पाठान्तरम् । प्रस्तुतप्रणाली,—शोधितं स्वर्ण-

रतिकाले रतान्ते वा सेवितोऽयं रसेश्वरः।
मानहानिं करोत्येष प्रमदानां सुनिश्चितः॥ ७० ॥
कृत्रिमं स्थावरञ्चैव जङ्गमञ्चैव यद्विषम्।
न विकाराय भवति साधकेन्द्रस्य वत्सरात्॥ ७१ ॥
यथा मृत्युञ्जयोऽभ्यासात् मृत्युं जयति देहिनाम्।
तथाऽयं साधकेन्द्रस्य जरामरणनाशनः॥ ७२ ॥

बलीपलितनाशनस्तनुभृतां वयःस्तम्भनः
समस्तगदखण्डनः प्रचुररोगपञ्चाननः।
गृहे च रसराडयं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः॥ ७३ ॥

इन्द्रपुष्पं लवङ्गं स्यात् कार्पासकुसुमद्रवैः।
तन्त्रान्तरे प्रसिद्धोऽयं मकरध्वजनामतः॥ ७४ ॥

मकरध्वजः।—

स्वर्णभागो च वङ्गञ्च मौक्तिकं कान्तलौहकम्।
जातीकोषफले रूप्यं कांस्यकं रससिन्दुरम्॥ ७५ ॥
प्रवालं कस्तूरी चन्द्रमभ्रकञ्चैकभागिकम्।
स्वर्णसिन्दूरतो भागाश्चत्वारः कल्पयेद्बुधः॥ ७६ ॥
नातः परतरः श्रेष्ठः सर्वरोगनिसूदनः।
सर्वलोकहितार्थाय शिवेन परिकीर्त्तितः॥ ७७ ॥

दलं खण्डशः कृत्वा पारदेन सह मर्दयेत्; यदा च स्वर्णदलं सम्यक् पारदेन सह मिलितं स्यात्, तदा यथोक्तमानं गन्धकं दत्त्वा रक्तकार्पास-पुष्परसेन घृतकुमारिकारसेन च मर्दयित्वा कज्जलनिभं तत् शुष्कं

वसन्ततिलको रसः ।—

हेम्नो भस्मकतोलकं घनयुगं लौहात् त्रयः पारदात्
चत्वारो नियतन्तु वङ्गयुगलञ्चैकीकृतं मर्दयेत् ।
मुक्ताविद्रुमयो रसेन समता गोक्षुरवासेक्षुणा
सर्वं वन्यकरीषकेण सुदृढं तत्तत् पचेत् सप्तधा ॥ ७८ ॥
कस्तूरीघनसारमर्दितरसः पश्चात् सुसिद्धो भवेत्
कासश्वाससपित्तवातकफजित् पाण्डुक्षयादीन् हरेत्
शूलादिग्रहणीं विषादिहरणो मेहांस्तथा विंशतिम्
हृद्रोगादिहरो ज्वरादिशमनो वृष्यो वयोवर्द्धनः ॥
श्रेष्ठः पुष्टिकरो वसन्ततिलको मृत्युञ्जयेनोदितः ॥ ७९ ॥

वसन्तकुसुमाकरो रसः ।—

द्विभागं हाटकं चन्द्रं त्रयो वङ्गाहिकान्तकाः ।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकं तथा ॥ ८० ॥
भावयेद् गव्यदुग्धेन भावनेक्षुरसेन च ।
वासालाक्षारसोदीच्य-रम्भाकन्दप्रसूनकैः ॥ ८१ ॥

कुर्य्यात्; पश्चात् रससिन्दूरवत् पचेत् । ततः काचकूपिकाऽन्तर्गतम् अरुणसमप्रभं मकरध्वजमादाय कर्पूरादिभिः सह मेलयित्वा खल्ले मर्दयेत् । मात्रा गुञ्जाद्वयमिता । अहिवल्लीदलं—पर्णपत्रम् ॥ ६५-७७ ॥

वसन्ततिलकरसे ।—घनम्—अभ्रं, नियतं—गन्धकम् । वृद्धास्तु रसगन्धकयोरभावे स्वर्णसिन्दूरं व्यवहरन्ति । घनसारं—कर्पूरम् ॥ ७८।७९ ॥

वसन्तकुसुमाकररसे ।—हाटकं—स्वर्णं, चन्द्रं—कर्पूरम्, अहिः,—

शतपत्ररसेनैव मालत्याः कुङ्कुमोदकैः ।
पश्चान्मृगमदैर्भाव्यं सुगन्धिरससम्भवैः ॥ ८२ ॥
कुसुमाकरविख्यातो वसन्तपदपूर्वकः ।
गुञ्जाद्वयेन संसेव्यः सितामध्वाज्यसंयुतः ॥ ८३ ॥
मेहघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा ।
वलीपलितहश्चैव स्मृतिभ्रंशं विनाशयेत् ॥ ८४ ॥
तुष्टिदो बल्यमायुष्यः पुत्रप्रसवकारणः ।
प्रमेहान् विंशतिञ्चैव क्षयमेकादशं तथा ।
तथा सोमरुजं हन्ति साध्यासाध्यमथापि वा ॥ ८५ ॥

नीलकण्ठो रसः ।—

सूतकं गन्धकं लौहं विषं चित्रकपद्मकम् ।
वराङ्गरेणुकामुस्तं ग्रन्थेरलानागकेशरम् ॥ ८६ ॥
त्रिकटु त्रिफला चैव शुल्वभस्म तथैव च ।
एतानि समभागानि द्विगुणो गुड़ उच्यते ॥ ८७ ॥
संमर्द्य वटकं कृत्वा भक्षयेत् चणकोन्मितम् ।
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ॥ ८८ ॥
हिक्कायां ग्रहणीदोषे शोथे पाण्डामये तथा ।

सीसकम् । केचित्तु "वङ्गाहिकान्तकाः" इत्यत्र "रसाहिकान्तकम्" इति पठन्ति । रम्भाकन्दप्रसूनकैरिति—रम्भामूलरसैः पुष्परसैश्च । "शतपत्ररसेन" इत्यत्र "शतपुष्पीरसेन" इति केचित् पठन्ति; अपरे तु "मालत्याः कुङ्कुमोदकैः" इत्यत्र "मालत्याः कुसुमोदकैः" इति पठन्ति; एतत्तु न सम्यक् व्यवहारसिद्धम् ॥ ८० —८५ ॥

मूत्रकृच्छ्रे मूढ़गर्भे वातरोगे च दारुणे ॥ ८९ ॥
नीलकण्ठो रसो नाम ब्रह्मणा निर्मितः पुरा ।
अनुपानविशेषेण सर्वरोगहरो भवेत् ॥ ९० ॥

महानीलकण्ठो रसः ।—

पलैकं नागभस्माथ भावयेत् तिमिपित्ततः ।
वङ्गं नागं सुमृतं स्वर्णं तोलैकं चापि मिश्रयेत् ॥ ९१ ॥
द्विपलं भस्मसूतस्य त्रिपलं मृतमभ्रकम् ।
त्रिपलं लौहभस्माथ सर्वमेकत्र कारयेत् ॥ ९२ ॥
भावयेच्च पृथक् कन्या ब्राह्मी निर्गुण्डिका शमी ।
मुण्डी शतावरी छिन्ना कोकिलाक्षस्य बीजकैः ॥ ९३ ॥
मुषली वृद्धदारोऽग्नि-द्रवैरेभिर्भिषग्वरः ।
ततः सञ्चूर्णयेत् सर्वं तुल्यमेकादशाभिधम् ॥ ९४ ॥
वराव्योषाब्दवङ्गैरेला-जातीफललवङ्गकम् ।
पूजयेद् बिल्वपत्राद्यैर्नीलकण्ठं महेश्वरम् ॥ ९५ ॥
द्विगुञ्जं भक्षयेदस्य मृत्युञ्जयमनुस्मरन् ।
क्षयमेकादशविधं ग्रहणीं रक्तपित्तकम् ॥ ९६ ॥
विविधान् वातजान् रोगान् चत्वारिंशच्च पैत्तिकान् ।
हन्ति सर्वामयानेव कामिनीनां शतं व्रजेत् ॥ ९७ ॥

नीलकण्ठरसे ।—वराङ्गं—गुड़त्वक्, ग्रन्थिः,—ग्रन्थिपर्णं, “गाठियाला” इति लोके । द्विगुणो गुड़ इति—एकभागापेक्षया ॥८६—९०॥

महानीलकण्ठरसे ।—नागः,—सीसकं, मुण्डी—मुण्डिरी, छिन्ना—गुडूची, मुषली—तालमूली, अग्निः,—चित्रकः, वरा—त्रिफला, अब्दः,

एकविंशतिरात्राद्धं परिहार्य्यं त्यजेदिह ।
यथेष्टाहारचेष्टो हि कन्दर्पसदृशो नरः ॥ ९८ ॥
मेधावी बलवान् प्राज्ञो बह्वाशी भीमविक्रमः ।
पुत्रार्थिनी तथा नारी रम्यं पुत्रं प्रसूयते ।
अस्य सूतस्य माहात्म्यं वेत्ति शम्भुर्न चापरः ॥ ९९ ॥

बृहच्छृङ्गाराभ्रम् ।—

पारदं गन्धकञ्चैव टङ्कणं नागकेशरम् ।
कर्पूरं जातीकोषञ्च लवङ्गं तेजपत्रकम् ॥ १०० ॥
एतेषां कर्षभागाणि सुवर्णं तत्समं भवेत् ।
शुद्धकृष्णाभ्रचूर्णञ्च चतुष्कपिचुभागिकम् ॥ १०१ ॥
तालीशं घनकुष्ठञ्च मांसी पुष्पं वराङ्गकम् ।
एलावीजं त्रिकटुकं त्रिफला करिपिप्पली ॥ १०२ ॥
एषां कर्षद्वयञ्चैव पिप्पलीक्वाथभावितम् ।
अनुपानं प्रयोक्तव्यं चोचं क्षौद्रसमायुतम् ॥ १०३ ॥
नानारोगप्रशमनं विशेषात् कासरोगनुत् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥ १०४ ॥

—सुस्तकम् । एकविंशतिरात्राद्धम्—एकादशरात्रम् ; यद्यपि एकविंशतिरात्रार्द्धेन सार्द्धदशदिनं भवितुमर्हति, तथापि परिहार्य्यवर्जने अर्द्धरात्रस्य लोकेऽदृष्टत्वात्, दशैकादशयोर्मध्ये एकादशस्यैव आधिक्यात् औत्कर्षाच्च एकादशरात्रमेव परिहार्य्यं त्यजेत् इति बोध्यम् । एकादशदिनादूर्द्ध्वं यथेष्टाहारचेष्टो भवेत् ॥ ९१—९९ ॥

बृहच्छृङ्गाराभ्रे ।—"सुवर्णं तत्समम्" इति—एकभागसमम् । चतुष्क-